वहिरिन्द्रियसन्निकर्षानन्तरं तत्र पटत्वेन घटप्रत्यक्षोत्पादात्तत्र घटत्वज्ञानाभावाद्व्यभिचारवारणाय स्वविषयक
ज्ञानाजन्यत्वनिवेशः द्रव्यत्वसामान्यलक्षणाजन्यप्रत्यक्षवारणाय घटत्वातिरिक्तेत्यादीति चेन्न। तथापि
नियतघटत्वद्रव्यत्वोभयप्रत्यक्षसमूहालम्बनस्थले परापरकार्यकारणभावापत्तेः किंतु घटत्वादिप्रकारतानिरू
पितत्वलौकिकान्यघटादिमुख्यविशेष्यताशालिचाक्षुषत्वावच्छिन्नं प्रति चाक्षुषप्रकारीभूतघटत्वादि
नां घटत्वादिप्रकारताशालिचाक्षुषत्वादिनां वा हेतुता वाच्या। प्रथमे विषयत्वसमवायघटितसामा
नाधिकरण्यं। द्वितीये च समवायघटितसामानाधिकरण्यं प्रत्यासत्तिः विशेष्यतायां घटत्वप्रकार

न.कं.
तानिरूपितत्वनिवेशात् द्रव्यत्वादिना सामान्यलक्षणाजन्यज्ञानेन व्यभिचारः निर्विकल्पकानंतरो
३२ त्पन्नघटपुरुषविशेष्यकचाक्षुषे व्यभिचारवारणाय लौकिकान्यत्वनिवेशः' घटत्वप्रकारकतद्वृत्त्यस्मर
णजन्ये घटाद्युपनीतभाने घटत्वप्रकारकचाक्षुषस्य कारणविरहात् व्यभिचारवारणाय विशेष्य
तायां संयुक्तत्वनिवेशः पुरुषविशेष्यतात्वं च प्रकारतान्यविशेष्यतात्वं वहिरिन्द्रियजन्यज्ञाने उपनीतं
विशेषणतयैव भासते मानसत्वनियमः इति नियमाद्विशेषणत्वेनैव घटादेर्भानात् तत्पुरुषविशेष्य
त्वमिति। कारणतावच्छेदककोटौ घटत्वादिप्रकारताकत्वनिवेशात् निर्विकल्पकोत्तरं सामान्यलक्ष
णाजन्यघटवद्भूतप्रत्यक्षापत्तिः पूर्वोक्तनिर्दोषवशात् उपनेनाऽगृह्यमाणेन स्मरणप्रकारीभवता घटत्वे
न घटवद्भूतचाक्षुषवारणाय चाक्षुषत्वनिवेशः' समवायेन घटत्वप्रकारकज्ञानं वा कालिकसंबंधेन

यत्त्वाश्रयपावत्त्वस्य स्वप्नाप्रतिवारणाय संबंधविशेषोपि निवेशनीय इति प्राचीनमतनिगर्वः नवीनमते द
र्शयितुं शंकते । नन्विति । तदाश्रयेति । सामान्याश्रयेत्यर्थः साक्षात्कारः स्यादिति । चाक्षुषसाक्षात्कारः स्या
दित्यर्थः तेन मानससाक्षात्कारे दृष्टेपि न क्षतिः नवीनमतम् । पि प्रेत्य सिद्धान्तयति । यत्तु सामान्यमिति ।
यदित्यस्य सामान्येत्यर्थः मित्यन्वयः न त्वकारकतदाश्रयेति । मानससाक्षात्कारसामग्रीसत्त्वादिति । किंचे
ति । सामग्री च तत्तत्संनिकर्षालोकसंयोगादिरूपा सहकारित्वादिति । वह्निरिन्द्रियजन्यतानेसह
कारित्वादित्यर्थः विप्रकृष्टस्य न यनस्य च चक्षुःसंयोगादिरूपसामग्र्यसत्त्वान्न प्रत्यक्षमिति भावः ।
न च धूलीपटले धूमभ्रमानंतरं धूमादिति ज्ञानेन स्यात् धूमत्वाश्रयलौकिकप्रत्यक्षसामग्र्यसत्त्वा
दिति वाच्यं तदाश्रयेत्यस्य तद्धर्मप्रकारतानिरूपितविशेष्यताश्रयेत्यर्थात् धूमत्वप्रकारता

त·कं· निरूपितविषयोष्मताम्रपधूलीपटलेलौकिकप्रत्यक्षसामग्रीसत्वेनादोषात् । ननु प्राचीनम
३३ तेनत्सुरूपीपद्युमत्वाम्रपविषयकालौकिकचाक्षुषत्वावच्छिन्नंप्रतितत्सुरूषीपधूमत्वाम्रय
विषयकालौकिकचाक्षुषत्वावच्छिन्नंप्रतितत्सुरूषीपचक्षुःसन्निकर्षपर्शचितविशेषस्यक
तत्सुरूपीमत्वात्तुषप्रकारीभवद्धूमत्वत्वेनहेतुतयातेनैव विप्रकृष्टतनयनस्यापिमन्यसंप
त्तिवारणोगुरुत्वात्समयस्याःसहकारित्वकल्पनेनेतव्यप्रतेर्गौरवमितिचेन्मैवं अथतमर्शितो सि
दामिनीसंपातजनितद्धूमविषयकचाक्षुषोत्पत्तिप्रालोकसंयोगविरामेपिनाद्दृशकारणोप
त्वात्सकलद्रव्यसाक्षात्कारधारापाश्वापत्तेः नाद्दृशसामग्र्याःसहकारित्वकल्पनस्यावश्यक लम:
कत्वात् एवंचधूमत्वाश्रयप्रत्यक्षे ज्ञानप्रकारीभवद्धूमत्वत्वेनैवहेतुत्वात्नलिङ्गरूपभेदेनप्रत्य ३३

मेदेन वा कार्यकारणभावद्वयमपि लाघवं । अथैवं चक्षुःसंनिकर्षपरोवर्तिनि घटत्वग्रहप्रतिबं
धकदोषसत्वे घटत्वप्रकारकावच्छेदकचाक्षुषापत्तिः न च तदाश्रयेत्यस्य तद्धर्मविशिष्टेत्य
र्थः तथा च तद्धर्मविशिष्टलौकिकप्रत्यक्षसामग्र्याः सहकारित्वात् तद्धर्मांशेपि लौकिकप्र
त्यक्षसामग्री सहकारित्वलक्षणापत्तेने घटांशे दोषाभावघटितसामग्र्यसत्वान्न घटत्वाप्र
यापत्तत्पत्तिरिति वाच्यं । तथा सति धूलीपटले धूमभ्रमानंतरं माहानिज्ञानानुत्पाद
नेः धूमत्वांशे लौकिकप्रत्यक्षसामग्र्यसत्वादिति चेन्न तत्र पावकचाक्षुषस्वीकारेष्टाप
त्तेरिति नव्यमतनिगर्वः अत्र केचित् ज्ञानलक्षणाप्रत्यासत्त्यस्वीकारेस्तु रपि चंदनमित्या
दौ सौरभत्वादिभानानिर्वाहात् तत्स्वीकारे सौरभत्वसामान्यलक्षणयासौरभभाननिर्वाहे

च्छिन्नं प्रति सौरभत्वप्रकारकज्ञानत्वेन सामान्यलक्षणप्रत्यासत्तेर्हेतुत्वोपगमेन ४३

न.कं. पि सौरभत्ववृत्तिधर्मज्ञानाभावेन सौरभत्वभानस्य सामान्यलक्षणयानिर्वाहसंभवात्। अत एव दीधि

३५ तिकारैः अत एव सुरभिचन्दनमित्यादौ सौरभत्वादेर्विधानमित्याहुः। ननु न संगच्छते सौरभत्वप्रकारक

[illegible] सौरभविशेष्यकप्रत्यक्षत्वाव्‌ सौरभत्ववृत्तिधर्मज्ञानाभावेऽपि सौरभत्वज्ञानबलादेव सौरभत्वभा

नापपत्तेरिति ज्ञानलक्षणप्रत्यासत्तिस्वीकारो निरर्थकः अत एव सामान्यलक्षणाया प्रत्यक्षे जन

नीयेन तद्धर्मप्रकारतानिरूपितविशेष्यतांशे लौकिकप्रत्यक्षसामग्र्याः सहकारित्वान्नो विनाकथं

सामान्यलक्षणया सुरभिचन्दनमित्यादौ सौरभस्य सौरभत्वस्य वर्तमानमिति ज्ञानलक्षणस्वीका

रश्चावश्यकः इति चेन्न सामान्यलक्षणया तद्धर्माश्रयस्य सर्वे विशेष्यताशालिन्या लौकिकप्रत्यक्षे रम.

जननीये सम्भवन्त्यपि लौकिकप्रत्यक्षसामग्र्याः सहकारित्वात् प्रकृते तदभावेऽपि सौरभवि ३५

षेषणात् लौकिकप्रत्यक्षे जननीये बाधकाभावादित्याहुः। तन्न। यत्र सौरभत्वांशे उपनीतभानात्मकं सौरभ
त्वप्रकारकं चंदनविशेष्यकं सौरभं चंदनमिति भ्रमात्मकं ज्ञानं तत्र सौरभत्वज्ञानं सौरभत्वज्ञानरूपसा
मान्यलक्षणया न निर्वहति। सौरभत्वप्रकारतानिरूपितसौरभनिष्ठविशेष्यताशालिज्ञानत्वस्यै
व सौरभत्वज्ञानरूपसामान्यलक्षणाप्रत्यासत्तेः कार्यतावच्छेदकत्वात् तदुक्तं दीधितिकृता। इदं च
धर्मविषयकं ज्ञानं धर्मिणां प्रत्यासत्तिरित्येतदुपहितविषयकं ज्ञानं न तस्येति। तथा चंदनस्य सौरभत्वा
श्रयत्वेन तत्र सौरभत्वभानार्थं ज्ञानलक्षणास्वीकारस्यावश्यकः। न च तत्र दोषबलादेव सौरभत्व
भानमिति वाच्यं। प्रत्यक्षस्येंद्रियसंनिकर्षजन्यत्वनियमेन सौरभत्वांशे इंद्रियसंनिकर्षस्याव
श्यकत्वात्। तत्र च एवं चंदनत्वांशे लौकिकसंनिकर्षाभावादलौकिकसंनिकर्षस्यावश्यकत्वा

त॰ दी॰ साध्यव्याप्तिरिति प्राभाकराः नव्याचनाहूणनियमस्य सर्वेपिहृत्वास्तौरपत्वमानार्थेतानलतत्स्वीका
३५ रइति ननुव्याप्तिज्ञानस्यानुमितिहेतुत्वसंभवेपि केवलव्याप्तिज्ञानकालेनुमित्यापत्तिरित्याशंकनेन
६ नुमितिः। ननुपक्षधर्मताविशिष्टव्याप्तिज्ञानं कारणं। तच्च पर्वतस्त्रिधूमो वह्निव्याप्य इत्याकारकं तत्स
त्वे चानुमितस्तत्कस्याप्यविवादत्वात्तदुपायेन पाकल्पनेनेति सर्वत्र धूमवानिति पक्षवृत्तित्वावगाहि
ज्ञानं कारणमिति नावदुर्वचं वह्निव्याप्यधूमवानयं न इति ज्ञानादप्यनुमितिसंभवापत्तेः तत्राधिकताया भा
वेनानाभावात् किं नव्यस्तु गत्यापक्षवृत्तिविषयकं तत्वं च धूमो वह्निव्याप्यः इत्यत्रापि धूमत्वेन पर्वतीय
धूमविषयकत्वादक्षमतिसिन्ननोनुमित्यापत्तिरिति भावः यत्तु दृष्टान्ते धूमो वह्निव्याप्य इति ज्ञाना राम॰
त् दृष्टान्तेऽनुमित्यापत्तिरित्याशंक्य तेनेति नातितिमिरं दृष्टान्ते महानसादौ वह्निमत्त्वाज्ञानसत्त्वेन प ३५

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तया विरहादेवानुमितेरनुदयात् । अत्र यथासिद्धं नेष्यते । नहि व्याप्यत्वरूपेण पक्षताविशिष्टे हेतत्रा
निश्चयः कारणमिति तदर्थः । तथा सति पक्षतायाः परामर्शे कुक्षिनिवेशापत्याकारणतावच्छेदक
तापत्याकारणत्वानुपपत्तेः । किंतु पक्षत्वं साध्याधिकरणत्वमेव । तथा च व्याप्तिविशिष्टवैशिष्ट्याव
गाहित्वान कारणमित्यर्थो लभ्यते । ननु महानसादावपि संभवत्येवेति पक्षताविरहात्तत्रा
नुमितिरित्येवोपेयमिति । इष्टत्वेनेति । एकरूपावच्छिन्नव्याप्तिपक्षधर्मतावगाहित्वेन हेतुत्वो
क्तौ तु वह्निव्याप्यवानिति ज्ञानादनुमित्यनापत्तिरिति भावः । व्याप्यत्वप्रकारेणेति । व्याप्तिविशिष्ट
वैशिष्ट्यावगाहिज्ञानं कारणमित्यर्थः । तेनैवं रूपेण व्यभिचारसहचारयोर्ग्रहे वह्निव्यभि
चारित्ववह्निसहचरितधूमवदिति ज्ञानादेवं विशेष्यविशेषणतारमि । तिस्याये न वह्निव्या

विशेषणांतरापि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्पध्यमवानिनिज्ञानात्स्वानुमित्सत्त्वदपायसिरिति चेन्न । व्याप्तिविशिष्टवैशिष्ट्यावगाहि निश्चयत्वेन
लाघवेन कारणत्वे सिद्धे ततोऽनुमित्यभावेऽप्यापत्तेः लाघवं च व्याप्यंशे निश्चयत्वानिवेशेनान्यथा
ग्रहि व्याप्तिवदहि व्याप्यभाववद्वह्निमान्पर्वत इति व्याप्यंशे संशयात्मकज्ञानादनुमित्यापत्तेः व्याप्यंशे
निश्चयात्मकताहार्यज्ञानत्वेन कारणता वाच्येति गौरवान्नन्वस्मन्मते च विशिष्टवैशिष्ट्यावगाहित्वोपे
वि षयतावच्छेदकप्रकारकनिश्चयत्वेन विशेषणतावच्छेदकाभावप्रकारकज्ञानाभावत्वेन का
र्यकालवृत्तित्वावा कारणत्वेन व्याप्यंशे संशयात्मकताहार्यज्ञाने विशिष्टविषयत्वाभावेनैवापत्त्य
भावादिति दिक् । व्याप्तिविशिष्टवैशिष्ट्यावगाहित्वं च व्याप्यत्वावच्छिन्नप्रकारतानिरूपितपक्षतानिष्ठवि
शेष्यताशालित्वं न च व्याप्यपक्षोभयवैशिष्ट्यावगाहित्वेन तत्र व्याप्यत्वावच्छिन्नविषयतानिरूपितप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

श्वनिष्ठविषयताशालित्वमिति यावत्। एवं च वह्निव्याप्यो धूमः पर्वतेइत्याद्याधेयतासंसर्गकपर्व
तप्रकारकज्ञानस्यापि संग्रह इति बोध्यं। अप्रामाण्यज्ञानहृदयस्योत्तेजकत्वानुरोधेन निष्कम्पत्व
हृदयनिवेशानुरोधेन च तयोः स्पष्टमेव हेतुतापाश्चात्यव्यापकत्वात् अन्यथा सकविधेयतापर्यासत्त्वेः
प्रविधाप्रामाण्यज्ञानसत्त्वेनुमित्यनापत्तेः मिथो विशेष्यताविशेष्यभावे विनिगमनाविरहाच्च नाना
धेवयावच्छिन्ननानाधर्मावच्छिन्नावच्छेदकतापाश्चैक्यासंभवेनावच्छेदकतापाश्चासम्भव इति त्वा स
मवायः नन्वेवं वह्निव्याप्यो धूमः पर्वतेइतिज्ञानादनुमित्यवदृश्यापत्तिः तत्रात्मविशिष्टवैशिष्ट्या
वगाहित्वाभावादिति चेन्न तस्यापि स्वात्मत्वेनाहेतुत्वापगमात् अन्यव्यवहितोत्तरत्वनिवेशेन च
परस्परजन्यानुमितौ न क्वापि बाधः वस्तुतस्तु अनुमितेः पक्षविशेष्यकत्वनियमेन तादृशैरपि वि

त॰कौ॰ शिषेध्यवसायकत्वमित्याशयेन पक्षविशेष्यकपरामर्शस्य हेतुत्वेनानुमानविशेष्यकोपीति ध्येयं उक्ता
३८ तिप्रसंगं वारयति। नचेति। न चैवं वह्निव्याप्यधूमः धूमवान्पर्वत इति ज्ञानादनुमित्यनुदयापत्ति
रिति वाच्यं। तदुत्तरं परामर्शांगीकारेणानुपपत्तेरिति भावः। निष्कृष्टपदमिति। निष्कृष्टत्वंच
तद्घटकावाप्रकारकत्वे सति तत्प्रकारकत्वं। तथा च शुद्धपर्वतत्वावच्छिन्नविशेष्यतानिरूपित
वह्निव्याप्यधूमाभावप्रकारताशून्यत्वे सति शुद्धपर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्निव्या
प्यधूमप्रकारताशालिज्ञानत्वेन पर्वतोद्देश्यकवह्निविधेयकानुमितौ हेतुत्वं। नीलपर्वतो वह्निव्याप्यधूमा
भाववान्पर्वतो वह्निव्याप्यधूमवांश्चेति निर्णयपसंग्रहापग्रपमशुद्धत्वनिवेशः। नीलपर्वतो वह्नि त॰
व्याप्यधूमवान्नवेति संशयवारणाय द्वितीयशुद्धत्वनिवेशः। नीलपर्वतो वह्निव्याप्यधूमवानिति नि ३८

स्वपक्षस्य तादृश्यानुमितौ स्वातंत्र्येण हेतुतया न ततोऽनुमितित्वं तु पचपि । अथ पर्वतत्वसामानाधिकरण्ये
न धूमधूमाभावावगाहि वह्निव्याप्यधूमवान् वह्निव्याप्यधूमाभाववांश्च पर्वत इति ज्ञानादनुमितिस्तता
पत्तिरिति चेन्न । धर्मितावच्छेदकसामानाधिकरण्येनोभयकोट्यवगाहिज्ञानं समुच्चयः । अवच्छेद घ
कावच्छेदेनान्यतरकोट्यवगाहिज्ञानं संशय इति नियमात् । तथा च पर्वतत्वसामानाधिकरण्येन व
ह्निव्याप्यवत्ताज्ञानस्य हेतुतायां पर्वतत्वव्यापकत्वविशिष्टदैशिकविशेषणतासंबंधावच्छिन्न
धूमाभावप्रकारताशून्यत्वनिवेशः । पर्वतत्वावच्छेदेन वह्निव्याप्यवत्ताज्ञानहेतुतायां चोक्तदैशि
कविशेषणतासंबंधावच्छिन्नधूमाभावप्रकारताशून्यत्वनिवेश इति । अनुमितिं प्रति परामर्
शत्वेन हेतुतायां च कारणतात्वं स्वव्यक्तानन्यथासिद्धत्वनियतपूर्ववर्तित्वरूपधर्मद्वयविशिष्टरूप

त॰ के॰ रामर्शत्वावच्छेदेनकल्पनीयं। वह्निव्याप्यधूमो धूमवांश्चायं तत्रतिज्ञानद्वयस्यानुमितिहेतुत्वेतुपराम
३८ र्शहेतुत्वेनक्लृप्तनियतपूर्ववर्तिताकस्यतस्यैवानन्यथासिद्धत्वमात्रंकल्प्यतेतथाचविशिष्टपरा
मर्शत्वेनहेतुत्वमसंभवदुक्तिकमितिनिष्कृष्टमीमांसकमतेदूषणमिति। मीमांसकास्त्वित्यादिना।
व्याप्यतावच्छेदकेति। व्याप्यतावच्छेदकत्वेनगृहीतोयोधर्मस्तत्प्रकारकंपक्षधर्मताज्ञानमित्यर्थः।
त्मतएवानुपदंतद्रूपेण व्याप्तिग्रहादितिवक्ष्यति। यथाश्रुतेव्याप्त्यंशेप्रमात्मकज्ञानादनुमित्यनुद
यापत्तेः तत्रवस्तुगत्याव्याप्यतावच्छेदकायावत्तंव्याप्तिज्ञानेव्याप्यतावच्छेदकप्रकारकज्ञानेसहकारि
तादृशव्याप्तिज्ञानेनानुमितेर्जननीयायांसहकारिधूमोवह्निव्याप्योद्रव्यंपर्वतवृत्तीतिज्ञानादनुमि ल॰
त्यापत्तिंवारयतिव्याप्यतावच्छेदकमिति व्याप्यतावच्छेदकतयागृहीतमित्यर्थः। स्वमतेलाघवंदर्श ३८

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पत्ति। एवं चेति। ज्ञानत्वरूपाद्यपीत्यपि नावह्निव्याप्यधूमवान्पर्वत इति ज्ञानसंग्रहः। तथा चैतेन व्यापिकमते ज्ञा
नत्वरूपान्यपरामर्शकल्पनापित्वानुमितिस्वीकारे गौरवमपि निभावः। लाघवादिति। विशिष्टनिष्ठव्याप्यत्वरूपलघ्व
कधर्मावच्छेदेनानन्यथासिद्धत्वकल्पनापा गुरुधर्मरूपावच्छेदेनानन्यथासिद्धत्वकल्पनापेक्षया लघु
त्वादित्यर्थः। ननु कारणतावच्छेदकलाघवेऽपि पक्षधर्मावह्निव्याप्यधूमवान्पर्वत इति ज्ञानेनतोऽ
नुमितिस्तत्र भवतां विशिष्टपरामर्श कल्पयित्वानुमितिकल्पने नज्ञानं न तथैव साहित्यकल्पने गौरवं स्यात्
यपत्तापक्षेत्यत आह। किं चेति। वह्निव्याप्यवानिति ज्ञानत्वावच्छेदकधर्मत्वादीनां तत्राभावादि
त्यर्थः। तथा च लाघवात् विशिष्टवैशिष्ट्यावगाहिज्ञानत्वरूपलघ्वेक धर्मावच्छेदेन कारणत्वे सिद्धे
यत्र नाहं ज्ञानत्वं तत्राप्यन्तरा विशिष्टपरामर्शकल्पयित्वानुमितिस्वीकारः। लाघवानुरोधेन स

ते कं
३८

र्थापत्तापत्त्यापि व्याप्यत्वात्। फलमुखगौरवस्यादोषत्वात् मीमांसकमतेनु व्याप्त्यंशे निर्धर्मितावच्छेदका
त्व हि व्याप्यतानिनिरूपणाद्धूपरामर्शात् सर्वपक्षेवानुमित्यपलापइति वस्तुतस्तु व्याप्यतावच्छेदकप्रकार
कव्याप्तिज्ञानव्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानयोर्हेतुत्वेपि वह्निव्याप्यो धूम आलोकवा
न्पर्वतइतिज्ञानादनुमित्यापत्तिः आलोकत्वस्य वह्निगम्याव्याप्यतावच्छेदकत्वात्। व्याप्यतावच्छेद
कत्वेन गृह्यमाणो धर्मप्रकारकपक्षधर्मताज्ञानत्वेन हेतुत्वेपि न घा आलोकत्वस्यापि कदाचिद्व्या
प्यतावच्छेदकत्वेन ग्रहात्। तत्कालीनतत्पुरुषीयव्याप्यतावच्छेदकत्वप्रकारकग्रहविषयधर्मस्य
त्रैतत्कालीनतत्पुरुषीयत्वानिवेशेन गौरवात्। एतेन गृह्यमाणव्याप्त्यवच्छेदकताकधर्मप्रकारक
पक्षधर्मताज्ञानत्वेन पत्तधर्मताग्रहप्रकारीभवद्धर्मावच्छिन्नविशेष्यकव्याप्तिज्ञानत्वेन वा एककार्ये

राम
३८

णापचापि कारणत्वं कल्प्यत इत्यपि परास्तं । कालादिप्रवेशेन गौरवादिति धूमत्वप्रकारकव्याप्तिज्ञान
त्वेन धूमत्वप्रकारकपक्षधर्मताज्ञानत्वेनैव हेतुत्वं वाच्यं । तथा च वह्निव्याप्यो धूमः धूमवान्पर्वत इति ज्ञा
नद्वयस्य न तावत्पर्वतोद्देश्यकवह्निविधेयकानुमितिसामान्ये नियतपूर्ववर्तित्वं क्वचिद्वह्निव्याप्या
लोकवान्पर्वत इति परामर्शजन्यतादृशानुमितौ तयोरभावात् किंत्वनुमितिविशेषे तथात्वं तत्तु
विशिष्टपरामर्शस्याप्यवह्निव्याप्यवानिति परामर्शजन्यानुमितावसंभवेति किं लाघवमेत
न्मते इति न जानीम इति दिक् । ननु व्यभिचारज्ञानकालेपि निर्धर्मितावच्छेदकव्याप्यवत्तापरामर्श
संभवेनानुमित्यापत्तेर्व्यभिचारस्य हेत्वाभासत्वानुपपत्त्या हेतुतावच्छेदकमनिवेश्य निरूप्यत्वनि
र्वचनानुपपत्त्या व्याप्तेर्निर्वक्तुमशक्यतया च हेतुतावच्छेदकगर्भव्याप्यवत्तापरामर्शस्य हेतुत्वा

त॰कौ॰ यः। तथा च व्याप्यवानिति शाब्दपरामर्शस्थले कथमनुमितिरित्यस्वरसादाह॥ तस्मादिति वह्निव्याप्यवानि
४० त्यत्र वह्निरूपादिति वह्निव्याप्यधूमवानित्यत्र वह्निरूपादित्यर्थः। प्रसिद्धत्वादेवेत्येवकारेण मीमांसकाभिप्रेतज्ञान
रूपव्युदासः। व्याप्यांशे संशयादन्यत्र धर्मतांशे संशयाद्यनुमित्यापत्तिवारणाय व्याप्यांशे निश्चयत्वं पक्ष
धर्मतांशे च निश्चयत्वं निवेश्यं नैयायिकमते च व्याप्यांशे निश्चयत्वमनिवेश्य व्याप्तिविशिष्टवै
शिष्ट्यावगाहिनिश्चयत्वेनैव हेतुत्वमुपेयते व्याप्यांशे संशयात्मकज्ञाने च विशिष्टवैशिष्ट्यविषय
त्वाभावेनैवापत्त्यभावादिति पूर्वमेवावेदितत्वात्। एवं धर्मरूपावच्छेदेन हेतुत्वकल्पनात्सकधर्माव
च्छेदेनैव तत्कल्पनमुचितमित्याशयो विस्तरेण॥ तृतीयत्वमिति। अनुमितिकारणीभूतलिंगपरामर्श राम॰
स्य तृतीयत्वं कथमित्यर्थः। प्रथममिति। दृष्टांते यद्भूयोदर्शनं तत्प्रथममित्यर्थः। ततश्चेति। पर्वतेध ४०

मद्दर्शनानंतरं धूमो वह्निव्याप्य इति स्मरणात्मकं व्याप्तिज्ञानं द्वितीयमित्यर्थः। नहिशिष्टेति। व्याप्ति
विशिष्टेत्यर्थः। स्वज्ञापोव्याप्तौ वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानमेव तृतीयमिति भावः। केचित्तु दृ
ष्टान्ते धूमदर्शनं प्रथममित्यर्थः। व्याप्तिज्ञानदृष्टान्तीयधूमस्य व्याप्तिमत्पक्षज्ञानं द्वितीयमित्यर्थः। त
द्विशिष्टेति। दृष्टान्ते प्रागनुपलब्धव्याप्तिविशिष्टस्य हेतोः पक्षवृत्तित्वावगाहिज्ञानं तृतीयमित्यर्थः। त ९४
द्विशिष्टेति। दृष्टान्ते प्रागनुपलब्धव्याप्तिविशिष्टस्यैवेति व्याचष्टे। गौरवादिति। लिंगपरामर्शत्वा
वच्छिन्नां तृतीयलिंगपरामर्शत्वेन हेतुत्वे गौरवादित्यर्थः। न च प्रामाणिकं गौरवं न दोषायेत्यत आ
ह। व्यभिचारश्चेति। महानसादौ सिद्धिसत्वे पि सिषाधयिषाधीनानुमितेः स्वत्वात्तत्र तृतीयलिं
गपरामर्शाभावेन व्यभिचारादित्यर्थः। फलायोगव्यवच्छिन्नकारणत्वं स्वरूपकारणत्वमपि प्र

त॰ कॆ॰ ष्यपरामर्श एवानुमानमिति केचित्। एवं लिंगपरामर्शस्यानुमितिहेतुत्वे लिंगस्यापितत्त्वे विशिष्टे का
५१ रणताग्राहकं प्रमाणमस्ति बाधके विशेषणस्यापि कारणत्वं गृह्णातीति न्यायेन विशेषणीभूत
लिंगस्यापि कारणत्वग्रहात्। दंडत्वादेरपि घटकारणत्वापत्त्या सम्मतनिवेशः तत्राप्यसिद्धेरे
वबाधकत्वात्। एवं विनिगमनाविरहेणापि लिंगस्यानुमितिकरणत्वमित्याचार्याः तदुभयमतं निरा
कुर्वन् स्वमतमाह। सोपमिति। व्यापारपावादिति। फलायोगव्यवच्छिन्नकारणत्वस्य व्यापारव
द्साधारणकारणत्वापेक्षया गुरुत्वेन हेयत्वादिति भावः। यथा चैतत्तथा प्रत्यक्षपरिच्छेदे विवेचि
तं। ननु पचपयपमर्षोत्तरं सिद्धिनाशात्ततोनुमितिस्तत्र योग्यविभुविशेषगुणानां नाशत्वावच्छिन्नं तप॰
प्रतिस्वोत्तरोत्पन्नगुणत्वेन हेतुतया परामर्शस्यापि सिद्धिनाशकरूपव्यापारवत्त्वात्करणत्वं स ५१

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पवत्त्वेवेति चेन्न ॥ यज्ज्ञानं प्रति विषयस्य पज्ञजनकत्वेन तस्यैव तद्व्यापारत्वमिति नियमेन तज्ज्ञानीयैः स्वतन्त्रतया
त्वासंभवेन तस्यानुमानत्वांगीकारस्यासंभावितत्वादिति लिंगमिति अनुमितेः करणमित्यनुपपत्तेः
परामर्शव्यापारकमित्यनेन करणलक्षणसत्त्वं सूचितं । पूर्वेति अतीतानागतधूमविषयकोपन
मानसो वह्निव्याप्यवत्तापरामर्शस्तत्रानुमित्युत्पादापत्तेरित्यर्थः नच तत्रागमावादीनामेव लिं
गत्वमास्तामिति वाच्यं । तेषां तदानव्याप्यत्वेनापरामृश्यमानत्वादिति भावः नन्वतीतलिंगस्य
लेऽनुमिति पूर्वं तत्त्वसत्त्वेन हेतुत्वमप्रतिमतत्त्वाह अनन्यथेति अनुमित्यव्यवहितपूर्वक्षणा
वच्छेदेन तत्तत्सत्त्वमिति भावः ननु कारणत्वं कार्याव्यवहितपूर्वक्षणावच्छेदेन कारणतावच्छे
दकसंबंधावच्छिन्नकार्याधिकरणवृत्त्यभावप्रतियोगितानवच्छेदकधर्मवत्त्वं । तत्स्वातीत

न॰र्कं॰ नागतत्वमस्यत्वेनुमित्यव्यवहितपूर्वं धूमासत्वेपि तत्संबंधावच्छिन्नप्रतियोगिताकाभावस्यासंभ
५२ वादनुत्पत्तिमेव। तथाहि॥ तत्तावत्तादृगभावो ध्वंसप्रागभावौ भवतः तयोः संबंधावच्छिन्नप्रति
योगिताकत्वे सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वे च मानाभावेन तथात्वासंभवात्। तत्त्वेप्र
मासत्वेवा एकविशेषवति सामान्यधर्मावच्छिन्नप्रतियोगिताकध्वंसप्रागभावयोरत्युप
गमात् धूमाधिकरणे तयोरुक्तयात्वासंभवात्। नाप्यन्यतमाभावः प्रतियोगिवत् ध्वंसप्रागभाव
योरन्यतमाभावविरोधित्वादिति चेन्न। तयोर्विरोधित्वे मानाभावात्। अन्यथा अन्तरा उत्पन्नघटेर
कत्वप्रनाशनीतिप्रतीत्यनुपपत्तेः तस्माद्ध्वंसादिविशिष्टपत्वे धूमभाविरत्कत निरुक्तघटेपि तदापि एम॰
त्तेरिति सकलध्वंसप्रागभावयोरन्यतमाभावविरोधे मतेरन्यत्राधितयोरन्यतमानाधिकरण्ये(५२

वाधकाभावः । इत्थं चात्र तथाविधधूमवत्पक्षधूमो नास्तीति प्रतीत्या धूमात्यन्ताभावसत्त्वेनानुमितिरू
पकार्यसमानाधिकरणाभावप्रतियोगितानवच्छेदकधर्मवत्त्वरूपकारणस्य संभवान्नानुप
पत्तेरिति गमकमनुमानमिति दिक् । ननु धूमवति धूमात्यन्ताभावसत्त्वेपि स्वव्याप्यवृत्तित्वादी
नां संयोगादिकं प्रति हेतुत्वोपपत्त्यपेक्षाकारणतावच्छेदकं कार्याधिकरणवृत्त्यभावेऽस्त्वत्रा मा
वे प्रतियोगिवैयधिकरण्यं प्रवृत्तिमत्त्वाद्धेतुमत्ताग्रहविरोधितानियामकसंबंधेनावश्यं
विवक्षणीयं । एवं च धूमाधिकरणे धूमात्यन्ताभावसत्त्वेपि तत्स्वप्रतियोगिवैयधिकर
ण्याभावात् धूमवत्ताग्रहविरोधितानियामकसंबंधेन वह्निमत्ताभावाद्व्यनताहेश्यत्वं किं
त्वन्मतेऽवच्छेदकत्वनाहार्यो अभावस्तत्प्रतियोगितानवच्छेदकधर्म. वत्त्वं धूमे तु समेव । न च धूमा

त·र्कं· नधिकरणकालावच्छेदेन धूमाभावोपि प्रतियोग्यधिकरणस्यैवेति वाच्यं प्रतियोग्यधिकरणत्वं
४३ हि न प्रतियोग्यधिकरणावृत्तित्वं । सामानाधिकरण्यस्य व्याप्यवृत्तित्वे मानाभावात् किंतु प्रतियोग्य
नधिकरणावृत्तित्वं अन्योन्याभावस्य च व्याप्यवृत्तितया प्रतियोग्यधिकरणे न प्रतियोग्यनधिकर
णत्वसंभवः अन्यथाः व्याप्यवृत्त्यसंग्रहणादव्याप्तेरिति धूमाभावस्य प्रतियोग्यधिकरणत्वा
भावात् न चैवं रासभसंयोगादीनामपि घटकारणत्वापत्तिः तद्व्यक्तीनां तस्यापि प्रतियोगिवै
यधिकरण्याभावादिति वाच्यं । अनन्यथासिद्धिपदेनैव तद्वारणात् । न च रासभादीनामपि ते
नैव वारणे कारणतालक्षणे नियतपदवैयर्थ्यमिति वाच्यं ॥ स्वपमेव तावद्विभावय । न च रास ८५·
भसंयोगादिवत् लिंगस्याप्यन्यथासिद्धत्वमिति वाच्यं अन्यथासिद्धेरेकस्यानिर्वक्तुमशक्यतया

ननु व्याप्तिभेदकूटस्यैव निवेशनीयतया गौरवेण धूमव्याप्तिमत्तानिवेशात्। विशिष्टकारणताग्राह
कं प्रमाणमस्ति बाधके विशेषणस्यापि कारणत्वग्रहणादिति नियमस्य सत्त्वाच्चान्यथा इन्द्रिय
संयोगादीनां हेतुत्वे इन्द्रियस्यापि हेतुत्वानुपपत्तेः एवं विषयितया लिंगविशिष्टज्ञानं करणं ज्ञान
विशिष्टं लिंगं वेत्यत्र विनिगमनाविरहोऽपि तद्धेतुतासाधकः ननु परामर्शप्रमाणलिंगस्यानुमितिसामा
न्येन हेतुत्वं धूलीपटलादपि भ्रमानुमित्युदयेन तत्र लिंगाभावात्। न च प्रमानुमितौ तद्धेतुः अनुमिति
सामान्ये तु परामर्श एव हेतुरिति वाच्यं यत्सामान्ये यत्सामान्यं प्रयोजकं न हि शेषे न हि शेषस्यैवास
ति बाधके प्रयोजकत्वात् परामर्शमात्रस्यैवानुमितिप्रमात्वप्रयोजकत्वौचित्यादिति चेत्। लिंगमत्र
नतावच्छेदकविशिष्टपक्षधर्मतावत्त्वेन धूलीपटलेन तत्र स्यात्. किं तु न तद्धेतुत्वं तत्र स्य च न त्राप्यतृप्तत्वादि
ने

त.कें.

५४

त्ति किंचिदेतद्विशेषणार्थमतमसत्वविशिष्टमेवेति। मैवं कार्याधिकरणवृत्तिर्योत्यन्ताभावप्रतियोग्यधिकरणतानवच्छे-
दककार्याव्यवहितपूर्ववृत्तित्वावच्छेदेन कार्याधिकरणवृत्त्यभावप्रतियोगितानवच्छेदकधर्मवत्वे सति का-
र्याधिकरणे सत्वस्यैव कारणत्वपदार्थत्वात्। तस्य चातीतानागतलिंगे सत्वादिति दिक्। नवीनास्तु
व्यहितवर्त्तिलिंगज्ञानत्वेन कारणतां क्रमोपेतोक्रमि यमावकाशो विनिगमनाविरहो वा भवेत्। किंतु
ज्ञानत्वेनैवेति न लिंगस्य हेतुत्वं। व्याप्तिप्रकारकपक्षधर्मताज्ञानरूपपरामर्शात्मकविशेषसा-
मग्री विरहाच्च न पर्वते किंचिज्ज्ञानादनुमित्यापत्तिरित्याहुः। ननु पक्षविशेष्यविशेषणा मितित्यापे
नपरामर्शादनुमितिरिति तत्र व्याप्तिज्ञानस्य परामर्शद्वारा कारणत्वासंभव इत्यत आह साध्यज्ञानं ल्प
वेति। ननु साध्यत्वं सिद्धिकर्मत्वादिरूपं तत्रापरं तत्रत आह लिंगज्ञानं वेति। लिंगनिवेशोपियोर

वादाह जन्यज्ञानेति जन्यपदं नित्यस्य स्वरूपयोग्यत्वे फलावश्यंभावइति निश्चयमभिप्रेत्य तदनङ्गी
कारेतु नोपादेयमेवतत् स्मृतिप्रसंगइति। परामर्शध्वंसकालीनघटज्ञानादनुमितिप्रसंगइत्यर्थः व्या
पारेण। परामर्शरूपव्यापारेणतन्निरासात् स्मृतिप्रसंगनिरासात्। नचैवं घटज्ञानेपर्वतोवह्निमानि
त्यनुमितिजनकत्वव्यवहारापत्तिरिष्टत्वात् कार्यत्वेनज्ञानत्वेन कार्यकारणभावात् यद्यन्यस्मैपित
ज्जनकत्वव्यवहारस्यांगीकृतत्वात् स्वानुमितित्वावच्छिन्नजनकत्वव्यवहारेणतन्न्यूनेइति वाच्यं
तावतातत्स्माभावादिति स्वेनावृत्तपरामर्शरूपव्यापारद्वाराज्ञानमनुमितिकरणमितिसिद्धं
नन्वत्र पत्र वह्निव्याप्यधूमवानितिस्मरणात्मकः परामर्शस्तत्रानुमितिर्नस्यात्। परामर्शव्याप
रकस्यज्ञानस्यतत्राभावादित्यतआह। ज्ञानपदमिति। स्वविषयकेति। तथाचस्वविषयकत्वेनैव

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त.कौ. अनुमितिकरणत्वेन संस्कारस्यैव स्मरणात्मकपरामर्शद्वारा समवायेनानुपपत्तिरिति भावः नन्वस
४५ विषयकत्वात् स्वज्ञानत्वापेक्षया गुरुत्वेन ज्ञानत्वमेव न्यूनकत्वावच्छेदकं न चोक्तानुपपत्तिः तत्रापि
स्वजन्यसंस्कारजन्यस्मरणरूपपरामर्शस्यैव व्यापारत्वे समवायादिन्यमित्याह एवं नानुभवत्व
मेवेति। उपयुक्तमवांघेनानुमानस्वरूपं निरूपयन् द्वितीयभागमाह॥ तत्रेति अनुमानं अनुमितिकर
णं। ननु केवलान्वयित्वमत्यन्ताभावाप्रतियोगित्वं तच्च वेदं वाच्यं ज्ञेयत्वादित्यत्रोपपत्तावपि
इदं वाच्यं घटत्वादित्यादौ न व्याप्तेरसंगतत्वात् पारिभाषिककेवलान्वयिपदार्थमाह त
त्रेति। तेषु मध्ये इत्यर्थः केवलान्वयिसाध्यकेति। केवलान्वयिसाध्यविधेयकानुमितिजनकत्वे ल.
नत्वमित्यर्थः इदं वाच्यं घटत्वादित्यत्रापि केवलान्वयिवाच्यत्वरूपसाध्यकत्वात् संग्रह इति भा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वः साध्यविशेषणीभूतकेवलान्वयित्वं निर्वक्ति। तत्र यद्वृत्ति। अत्यंताभावाप्रतियोगित्वं केवलान्वयि
त्वमित्यर्थः नन्वेवमाकाशाभावादीनां केवलान्वयित्वानुपपत्तिः आकाशात्यंताभावप्रतियोगित्वा
दिति चेन्न वृत्तिमदत्यंताभावाप्रतियोगित्वस्यैव विवक्षितत्वात् आकाशस्य वृत्तिमदभाववृत्तित्वेन दो
षः केचित्तु घटाभावो नास्तीति प्रतीत्या घटाभावाभावसिद्धावपि आकाशाभावो नास्तीति प्रतीतेरभा
वादाकाशाभावाभावप्रसिद्धा नाभावः प्रतियोगित्वं च स्वरूपसंबंधविशेष एव। नन्वत्यंताभावविरहात्म
त्वमिति नाकाशे आकाशाभावप्रतियोगित्वानुपपत्तिः एवं च वृत्तिमत्त्वविशेषणानुपादानेपि न क्ष
तिरित्याहुः वस्तुतस्तु संयोगाभावादीनां केवलान्वयित्वोपपत्तये प्रतियोगिव्यधिकरणत्वमप्यत्र
निवेशनीयं। प्रतियोगिव्यधिकरणत्वं चात्र प्रतियोग्यनधिकरणवृत्तित्वं तेन प्रतियोग्यधिक

Sampurnanand Sanskrit University, Balmeeki Campus

त.कं. णोंवृत्तित्वे। ननु प्रतियोग्यधिकरणावृत्तित्वं॥ तथा सति अधिकरणभेदेनाभावभेदाभावात्संयोगा

४६ भावस्य संयोगाधिकरणावृत्तित्वाभावेन तादृशाभावं तत्प्रतियोगित्वात्संयोगस्यापि केवलान्व

यित्वापत्तेः तथा विवक्षितेनु संयोगानधिकरणवृत्तित्वविशिष्टसंयोगाभावप्रतियोगित्वा

त्तोक्तापत्तिः इत्थंच काशाद्यभावस्य निरुक्तप्रतियोगित्वेप्यधिकरणाभावेनैवाकाशाभाव

स्य केवलान्वयित्वापपत्ते हेतुमत्त्वसंत्ताभावेन देयं। न चैवमप्याकाशाभावस्य प्रतियोगित्वेपधि

करणाप्रसिद्ध्या तादृशाभावान्तरप्रतियोगित्वाकाशः इति व्याप्तिरिति वाच्यं। यादृशप्रतियोगितावं

च्छेदकसंबंधसामान्येयत्प्रतियोगि प्रतियोगिकत्वयादृशाभावाधिकरणानुयोगिकत्वोभयाभाव ल्प.

त्तादृशप्रतियोगितायाः स्वत्वस्य विवक्षितत्वात्। तस्य चाकाशाभावः केवलान्वयी॥ तथा च वृत्ति

१४ काशाभावसाधारणत्वात्. ध्वनिक्रियात्मकसंयोगादिरूपस्वाधिकरणसम्बन्धावच्छिन्नप्रतियोगिताक ६

निपातकसंयोगे आकाशप्रतियोगिकत्वाभावेनोभयाभावसत्त्वात्सोपि प्रतियोगिव्यधिकरणा
सयेतिनातिव्याप्तिरिति अन्योन्याभावप्रतियोगितानवच्छेदकत्वेसति वृत्तिमत्त्वं वा तत्त्वमिति दि
कृत्स्नं दर्शयति । यच्चेति । ननु पिधाविषयत्वमभिधेयत्वं अभिधा चास्माच्छब्दादयमर्थो बो
द्धव्य इत्याकारकेच्छा । सा चास्माकीनैव । तथा चास्माकीनयावत्तादृशेच्छाविषयत्वं यत्किंचित्ता
दृशेच्छाविषयत्वं वा न तत्त्वं ॥ तत्राद्यः यावदिच्छाविषयत्वस्य कुत्राप्यसत्त्वात् । नान्त्यः अस्मदीय
यत्किंचिदिच्छाविषयत्वस्य सर्वत्रासत्त्वादिति चेन्नत्राह । अभिधेयत्वमिति । भगवदिच्छायाः सर्व
विषयकत्वेन तद्विषयत्वस्य सर्वत्र सत्त्वादिति भावः । एतेनेवोपपादयति तत्त्वेति । तादृशशक्तिवि
षयत्वं चेत्यर्थः । अभिधेयत्वस्य तादृशेच्छारूपशब्दप्रवृत्तिरूपत्वे विषयतासंबंधस्य वृत्तिनियामक

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त॰कं॰ त्वेनशक्याभिधेयत्वमित्यर्थः पत्वावगाहिप्रतीत्यनुपपत्तेः तादृशशाब्दत्वानि विषयत्वरूपत्वमेव नम्या
४८ मिहितमपि निषेधं। ननु सामान्यतस्तत्पदजन्यत्वप्रकारकशाब्दबोधविशेष्यकेच्छाविषयत्वमेको धर्मो
नास्त्येव सर्वसाधारणो नत्वस्याभावात् किंतु विशिष्यघटपदजन्यत्वप्रकारकशाब्दबोधविशेष्यकेच्छा
विषयत्वादिकमेवानन्तं। तच्च प्रत्येकं न केवलान्वयीत्यत आह। वस्तुपदेति। तथा च वस्तुपदजन्यत्वप्रका
रकवस्तुबोधविशेष्यकेच्छाविषयत्वं सर्वसाधारणं संभवत्येवेति नोक्तानुपपत्तिरित्यर्थः। भगवद
ज्ञानविषयत्वादीति। प्रमेयत्वादिसामान्यलक्षणाप्रत्यासत्तिजन्यास्मदादिज्ञानविषयत्वस्यापि के
वलान्वयित्वमित्यपि बोध्यं। अनुमितिं प्रति साध्यसंदेहस्य पक्षतायाः कारणतया केवलान्वयिसा रामः
ध्यकस्थले संदेहाभावेनानुमितिः सा न स्यादित्यत आह अनुमानमिति। मीमांसकमते दूषयन्ति। अत्र केचि ४८

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हिति। पक्षतायाहेतुत्वेयुक्तिमाह पक्षेति साध्यवत्त्वेनेति। संदिग्धसाध्यवत्त्वं पक्षत्वमिति प्राचीनलक्षणा
स्यपरिसंदेहविषयीभूतसाध्यवत्त्वमर्थः तदानीं नानागतसाध्यकानुमितेरुच्छेद इति साध्यप्रकार
कसंदेहविशेष्यत्वमेव पक्षत्वमिति भावः अतः कथमितिंनयाचनपूर्वोक्तो विभाग इति भावः सिषा
धयिषेति' अत्र साध्यनिश्चयस्य [illegible] सिषाधयिषाविरहेणवैशिष्ट्यमेककालावच्छेदे
नैकाल्म्यहानिरिति। अतो न भिन्नकालीनपुरुषांतरीयसिषाधयिषाविरहसत्त्वेपि सिषाधयिषावतानानु धी ४
५१ मित्युपपत्तिः केवलान्वयिनि पक्षतानुपपादयति। साध्येति। इहापि केवलान्वयिसाध्यकस्थलेपि। सं
शयरूपस्यैतत्पक्षतेति भावः संशयं विनेति। घनगर्जितेन मेघानुमानस्थले इत्यादिः पक्षता संशयो नेति न
तापीति गदर्शनआग्निस्मरणादिना न ज्ञायमाननस्यानुमितस्य च वह्निपूर्ववर्तित्वमिति भावः ननु

नि २

न·कें· साध्यनिश्चयेऽनुमित्यनुत्पत्त्या साध्यनिश्चयाभावस्यैव पक्षतात्वसम्भवे कृतं विशिष्टान्तेनेत्यत आह
४८ साध्येति विशिष्टान्तमिति। सिषाधयिषाविरहविशिष्टत्वं साध्यनिश्चये विशेषणता। सिषाधयिषायाः वि
रहितेनानुमितेरुत्पत्त्या हानेः तदेवेति विशेषणाभावप्रयुक्तो विशिष्टाभावस्तत्राप्यस्त्येवेति भावः। सि
षाधयिषाविरहाभावस्य सिषाधयिषाया एव पक्षतात्वे सिषाधयिषाशून्यकाले सति च
साध्यनिश्चयेऽनुमित्यनुत्पत्त्या विशेषनिवेशेन विशिष्टाभावस्यैव पक्षतात्वम[illegible]तमेव
सु विशिष्टान्तमिति। सिषाधयिषाविरहविशिष्टत्वं साध्यनिश्चये विशेषणता। सिषाधयिषायाः विरहि
तेनानुमितेरुत्पत्त्या हानेः तदेवेति विशेषणाभावप्रयुक्तो विशिष्टाभावस्तत्राप्यस्त्येवेति भावः। सिषाधयि लय
षाविरहाभावस्य सिषाधयिषाया एव पक्षतात्वे सिषाधयिषाशून्यकाले सति च साध्यनिश्च

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पेऽनुमित्यनुपपत्त्या विशेष्यनिवेशो न विशिष्टाभावस्यैव पक्षतात्वमवसेयम्) ननु पर्वतो दृश्यपक्षवह्नि
विधेयकानुमितिं प्रति सिषाधयिषाविरहविशिष्टवह्निप्रकारकपर्वतविशेष्यकानिश्चयत्वाव
च्छिन्नाभावस्य पक्षतात्वादिति चेत्तथापि यत्र समये वह्निमान् पर्वत इत्याकारको निश्चयस्तदाहि वह्निप्रकारकपर्व
तविशेष्यकनिश्चयसत्त्वे पर्वतो वह्निमानित्यनुमित्यनुपपत्तिः एवं पर्वतो वह्निमानिति सिद्धि
सत्त्वेऽप्ययं वह्निमत्पर्वतो द्रव्यवानित्यनुमित्यनुदयापत्तिरित्यत आह। संयोगेनेति पर्वतत्वाव
च्छिन्नोद्देश्यतानिरूपितवह्नित्वावच्छिन्नविधेयताशालिसंयोगसंसर्गकानुमितिं प्रति पर्वतोद्दे
श्यतानिरूपितवह्नित्वावच्छिन्नविधेयताशालिसंयोगसंसर्गकानुमितिं प्रति पर्वतोद्देश्यकव
ह्निविधेयकानुमितिगोचरेच्छाविरहविशिष्टपर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्नित्वा

न. कें.
४९

वछिन्नप्रकारतानिरूपितसंयोगनिष्ठसांसर्गिकविषयताशालिनिश्चयत्वावछिन्नाभावत्वेन हेतु
त्वालोकानुपपत्तिरिति भावः । अत्र च घटानुमितीच्छासत्वे पर्वतो वह्निमानित्यनुमितिवारणाय पर्व
र्वतोद्देश्यकवह्निविधेयकानुमितिगोचरेच्छात्वेनेच्छाया निवेशः । अनुमितिर्जायतामित्याद्यनु
गतेच्छानां तत्तद्व्यक्तित्वेन पर्वते वह्निमनुमिनुयामित्याद्यनुगतेच्छानां तु पर्वतोद्देश्यकत्वप्रकार
तानिरूपितवह्निविधेयकत्वप्रकारताकानुमितिगोचरेच्छात्वेनोत्तेजकत्वं बोध्यं न तु साधारण्या
पर्वतोद्देश्यकवह्निविधेयकानुमितिगोचरेच्छात्वेन तथा सति घटानुमितिसामग्रीसत्वे पर्व
तो वह्निमानिति सिद्धिसत्वे ऽनुमितिर्जायतामितीच्छासत्वे वन्ह्यनुमित्यापत्तेः । सिध्यप्रतिबंधी ग्प.
भूतघटानुमित्सयापीच्छायाविषयसिध्यास्वापत्तेः प्रयोगानन्तानां तत्तद्व्यक्तित्वेनोत्तेजक ४९

त्वेनु अन्यानुमितिसामग्रीसमवधानकालीनानामेव तस्या विघे छानानुमेजनकतापाघतानुमितिसाम धकाभावा २
ग्रीकालीनायास्तस्याश्चानुमितौ अनुमेजकत्वात् अनुगतेच्छानां तु नानापूर्वोक्तानुगतरूपेणैवो
त्तेजकत्वमिति। ननु धूमे परामर्शसत्त्वे पर्वतो वह्निमानिति सिद्धिसत्त्वे समनंतरालोकेन वह्निमनुमिनु
यामितीच्छायां पर्वतो वह्निमानित्यनुमित्यापत्तिरिति चेन्न। धूमलिंगकानुमितिं प्रति धूमलिंगकत्वप्र
कारकेच्छाविरहविशिष्टसिद्ध्यभावत्वेन हेतुत्वात्। एवमालोकादिस्थलेपि। न तु कं दीधितिकारेणालिं
गविशेषेणानुमित्यवैसंवित्तिं पक्षताविति। अत एव वह्निव्याप्यधूमवान् वह्निव्याप्यालोकवांश्च पर्वत इ
ति समूहालंबनात्मकपरामर्शकाले सिद्धिसत्त्वे आलोकेन वह्निमनुमिनुयामितीच्छाकाले आ
लोकलिंगकानुमितिरनन्तरा तस्याश्च धूमपरामर्शजन्यत्वेन धूमलिंगकत्वात्। एवं धूमलिंग

त॰कें॰ ५० कत्वप्रकारकेच्छाविरहविशिष्टसिद्ध्यभावस्य प्रकारताभावाद्व्यभिचार इति अत्रालोकपरामर्शे विशि-
ष्टालोकलिंगकेच्छापाक्ष्यपि तत्रा तेजस्त्वमावश्यकं । एवं रूपलिंगकपरामर्शे विशिष्टरूपलिंगके-
च्छापाक्ष्यपि एवं च धूमलिंगकेच्छापाक्ष्यपि धूमपरामर्शे विशिष्टधूमापत्तेर्लाघवेन तेजस्त्वेन ए-
कस्यैव अनुमितिपक्षतयोः कार्यकारणभावस्तीति लिंगभेदेन पक्षतायाः कारणत्वेमानाभावः
इति चेन्न · स्वाव्यवहितोत्तरत्वसंबन्धेन धूमलिंगकेच्छाविरहविशिष्टसिद्धिविशिष्टं प-
र्वतद्व्यानुमितिं प्रति धूमलिंगकेच्छाविरहविशिष्टसिद्ध्यभावस्य हेतुत्वोपगमात् । उक्तसमूहा- प्र
लंबनस्थले च धूमलिंगकेच्छाविरहविशिष्टसिद्धिविशिष्टानुमितेरुत्पत्त्याव्यभिचारणाय तावान् ल॰
न चालोकस्थले धूमलिंगकेच्छाविरहविशिष्टसिद्ध्यभावं विनापि परामर्शसामग्रीबलाद्धूमलिंगकानु- ५०

पितिस्थलेन्नातादृशसामग्रीबलाद्धूमलिंगकपरामर्शकाले सिद्धिसत्त्वेप्यनुमित्यापत्तिरिति वाच्यं
धूमलिंगेछाविरहविशिष्टसिद्ध्यभावधूमपरामर्शघटितसामग्र्यालोकलिंगकेछावि
रहविशिष्टसिद्ध्यभावालोकपरामर्शोभयघटितसामग्र्योरन्यतरस्यैव तत्र नियामकत्वात् ।
अन्यथानतल्लिंगकपरामर्शविशिष्टतत्तल्लिंगकेछायाअप्युत्तेजकत्वे तादृशाभावकूटस्यैकत्र
निवेशेनैषामिष्यो विशेषणविशेष्यभावे विनिगमनाविरहप्रसंगात् ननु पर्वतो वह्निमा
वान्हि सिषाधयिषाकालेपि निर्मतित्वीयव्याप्तिप्रकारतानिरूपितविशेष्यतावछेदको धूमेन धूमेव ह्निलिं
गकत्वप्रकारकेत्वस्यामानाधिकरण्यापासंदेहेन वह्निव्याप्यवत्तानिराधिविशिष्टापासि
साधयिषा न हि विरहविशिष्टसिद्ध्यभावत्वेन कारणतात्वेसकच्छेदकेवैछापाउत्तेजकत्वेन तुलिं

न·के·
५१

गभेदेन। समूहालंबनस्थले चालोकलिंगकपरामर्शविशिष्टालोकलिंगकेच्छापायवतत्पाते
नव्याप्यिचारान्नवकाष्ठादिति चेन्मैवं तत्पाप्यनुमितिजीवनाभिस्वननुगतेच्छानामननुगमकरू
पाभावेनतत्तदिच्छाभावकूटस्यैवरूकत्वनिवेशनीयतयातेषां मिथोविशेषणविशेष्यभावे
विनिगमनाविरहात्सत्त्ववच्छेदकतायाव्यासज्यवृत्तित्वस्य चनिरस्तत्वात्। तस्मात्तत्तल्लिंगप
रामर्शकालीनतत्तदिच्छाभावं निवेश्यतत्तल्लिंगभेदेन पक्षतापार्हेतुत्वमेवोचितमितिदि
क्। केवलव्यतिरेकिणं लक्षयति। असत्सपक्षइति मिश्रसिद्धव्याघातभयादाह 'सत्वेचेतित्य
सत्सपक्षत्वे चेत्यर्थः 'पक्षमात्रेति' अतिस्थितसाध्यसाधनेसहचारकत्वमितिस्वरूपकी एम·
र्तनं' वस्तुविवक्षितं तथानिवेशेवैयर्थ्यात् किंतु अत्र निश्चितसाध्यकत्वं तत्वं। साध्यसाधन ५

लक्षणेऽग्रेतिशेषः

१ मतआह· निश्चीयते येनेति· साधनसहचारनिवेशप्रयोजनाभावेनतदनिवेश्यता निश्चितसाध्यकत्व

पोः इतरभेदपृथिवीत्वयोः ननु तत्रसाहचर्यसत्वेपि भ्रमात्मकतन्निश्चयसत्वान्नानिश्चितसाध्यकत्व
मेवनतदनुकूलंपक्षातिरिक्तइतिविशेषणेनेतिशंकतेनचेति एवकारेणपक्षातिरिक्तत्वस्य
व्यवच्छेदः उत्तरयति· घटादाविति प्रत्यक्षतएवेति घटेनजलादिरितिप्रतीतेः। नचपरमाणुष
सर्वाभाववत् स्वर्गादिस्वप्रतियोगिकत्वेनकथमितरभेदः प्रत्यक्षः योग्यानुपलब्धिविरहात्·
त्तमेयपिशाचान्योन्याभावोपिनप्रत्यक्षः किंतुवायवीतीतिवचनंतस्यलिंगग्रहोपक्षीणत्वादिति
वाच्यंतर्कितप्रतियोगिसत्वमनुपलब्धिविरोधितद्भावस्यैवयोग्यत्वान्ननैवंद्विविकप्रतियोगिकस्ये
व अन्यथाजलपरमाणौपृथिवीत्वाभावग्रहापत्तेः एवंचपिशाचभेदस्येवेतरभेदस्यापिप्रत्यक्ष
त्वोपपत्तिः निश्चितत्वादिति॥ननुपादान्तेचघटस्यपक्षसत्वान्नतेन निश्चयेपि पक्षातिरिक्ते निश्चि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

 त्साध्यकत्वसत्त्वेनेति भावः। पक्षतावच्छेदकावच्छिन्नातिरिक्तत्वं चात्र पक्षातिरिक्तत्वं बोध्यं तेनातः पक्षादे
 रपि पक्षांकिंचित्पक्षातिरिक्तत्वादुक्तदोषः। अन्यथेति। घटादावितरभेदनिश्चये इत्यस्यार्थः। नन्विति नेति
साध्यघटितेत्यस्यार्थः। विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य हेतुतया साध्यज्ञानं विना साध्यघटितव्या
प्तिज्ञानासंभवादिति भावः। साध्यनिश्चयेऽतरभेदनिश्चये। तस्य घटस्यापक्षत्वमिति। सिध्य
भाववत्त्वादिरूपं पक्षत्वमित्यर्थः। घटेऽतरभेदनिश्चयेनेतरभेदनिश्चयाभावरूपपक्षता
भावात्तत्त्वं पृथिवीसामान्यस्य पक्षत्वमिति भावः। पृथिवीत्वेति। पक्षतावच्छेदकावच्छेदेना
नुमितौ पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरेव प्रतिबंधकतया प्रकृते पृथिवीत्वसामानाधि
करण्येन घटादावितरभेदनिश्चयेऽपि पृथिवीत्वावच्छेदेनानुमितौ न पक्षतेति भावः। नन्वे

Nepal Sanskrit University, Balmiki Campus, Kathmandu

वच्छिन्नः सिद्धसाधनस्य दूषकत्वविलोपप्रसंग इति वाच्यं । प्रकृतावच्छेदकैक्येन तद्दूषकत्वस्येष्टत्वात् । प्रकृताव
च्छेदके नानात्वे एव तद्दूषकत्वांगीकारात् । यथा वाङ्मनसे अनित्ये मूर्त्तत्वादित्यत्रानित्यत्वावगितित्रदृढे दृढे
दूषणापाः सिद्धानोपयधर्मावच्छेदेनानित्यत्वानुमितिरिति ॥ तदवच्छेदेन पृथिवीत्वावच्छेदेन । एतन्नेति
इतरभेदनिश्चयाभावरूपपक्षताविरोधित्वादित्यर्थः विरोधित्वं च सहानवस्थानरूपं बोध्यं ॥ इहय
टेसः पृथिवीत्वावच्छेदेनेतरभेदनिश्चयः सर्वत्रैति· परमाण्वादिरूपपृथिव्यामपीत्यर्थः तन्निश्चये प
ति ॥ इतरभेदनिश्चयाभावादित्यर्थः परमाण्वादेरयोग्यतया प्रत्यक्षेणान्तत्र तस्य निश्चेतुमशक्यत्वा
त् । तथा च पृथिवीत्वसामानाधिकरण्येन विनिश्चयपक्षत्वेपि तन्नावच्छेदकावच्छेदेन निश्चयाभावसत्त्वा
त् घटादेः पक्षत्वमव्याहतमेवेति भावः इदं च घटादौ पृथिवीत्वेनेतरभेदनिश्चयमपि द्रष्टम् ॥ वस्तु
CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त. कौ. तत्रतु लाघवत्वेनैव जलेतरभेदवन्निरूपणेन पृथिवीत्वेन तद्वन्निरूपणात् पृथिवीत्वधर्मितावच्छेदककानुमिति
५३ स्तत्रैव बाधकाभावः तद्धर्मधर्मितावच्छेदककानुमितौ तद्धर्मधर्मितावच्छेदककसिद्धेरेव प्रतिबन्धकत्वा
दिति ध्येयं अत्रेति व्यतिरेकयोः साध्याभाववद्धेत्वभावयोः सहचारात् उक्तेति । अत्र पक्षासिद्धेर्दृष्टान्त
४ त्यर्थः लाघवेनानुमितिसामान्ये पक्षाप्रिज्ञानस्यैव हेतुत्वादिति भावः नचैवमितरव्यापकीभूताभाव
प्रतियोगिपृथिवीत्ववती पृथ्वीति परामर्शात् जलेतरभेदज्ञानस्य समकाले पृथिव्यामितरभेदज्ञानेत
रभेदविशिष्टकानुमितेरुच्छेदः एवं स्वातन्त्र्येणेतरभेदज्ञानसत्वे तादृशपरामर्शात् पृथिवीतरभेदवती
त्यनुमितेरप्यनुदयप्रसंग इति वाच्यं। अत्र पक्षाप्रिज्ञानस्यैवानुमितिहेतुत्वादिनामाचार्याणामपि एम.
तद्धेतुत्वादेरुक्षापत्तेः प्रांचत्सममनेनास्वरसः सूचितः सच विशेषणज्ञानविधया सहचारज्ञानस्यान्वयव्य ५३

प्तिग्रहे हेतुतया साध्याभाववद्धेत्वमात्रयोः सामानाधिकरण्यस्यान्वयव्याप्त्यघटकतया विशेषणत्वा
भावेन तत् ज्ञानस्य कथं तादृशव्याप्तिग्रहे हेतुत्वमिति न च व्यभिचारज्ञानविरोधिसहचारज्ञानत्वेनो
भयसहचारज्ञानयोरपि हेतुत्वमिति वाच्यं। आद्याभावानवगाहितया व्यतिरेकसहचारज्ञानस्य व्य
भिचारज्ञानविरोधित्वाभावात् अत्र केचित्। प्राचीनमतेऽन्वयव्याप्तिज्ञाने विपिन्नधर्मिकत्वे
पि व्यतिरेकसहचारज्ञानस्यान्वयव्यतिरेकाभ्यां पपा हेतुत्वं। अन्वयव्याप्तिज्ञानमेव चानुमितिसा
मान्यहेतुरित्यपेयमनेनाप्यन्वयसहचारज्ञानं व्यतिरेकव्याप्तिज्ञाने हेतुः तज्ज्ञानमेव चानुमितिसा
मान्ये हेतुरित्यस्यानां विनिगमकाभावात्। न चैवमन्वयव्याप्त्यवगाहि वह्निव्याप्यधूमवत्त्वायपरामर्शाद
नुमितेरनुपपत्तिरिति वाच्यं भवन्मते दूनरपेटाभावव्यापकीभूताभावप्रतियोगिपृथिवीत्ववतीहृषि

तर्क. वीतिव्यतिरेकव्याप्त्यवगाहिपरामर्शादनुमित्युदये इष्टापत्तेरिवप्रमापितत्वनदहृन्मादस्येष्टत्वादिति
५४ न त्वा अन्वयव्याप्तिज्ञानस्य हेतुत्वे लाघवस्यैव विनिगमकत्वात् न प्याहि व्यतिरेकयोर्व्याप्तिरभाव
निष्ठाधर्मेन हेत्वाख्यव्यापकीभूताभावप्रतियोगित्वसंबंधेन स्वनिरूपकाभावप्रतियोगि
त्वसंबंधेन वा तथा च हेतुगतत्वासंबंधेन व्याप्तिविशिष्टधूमवत्तावगाहिपरामर्शत्वेन हेतुत्वे गौ
रवं। सामानाधिकरण्यादिरूपान्वयव्याप्तिज्ञानस्यापि तु हेतुत्वे तु स्वरूपसंबंधेन वह्निनिरूपित
व्याप्तिविशिष्टहेतुमत्ताविषयस्यैव तत्त्वमिति लाघवं। किंचैवं साध्याभावाप्रसिद्धौ व्यतिरेकव्या
४ प्तिज्ञानासंभवेन केवलान्वय्यनुमानोच्छेदप्रसंगः इति दिक्। अन्वयव्याप्तिज्ञानमिव व्यतिरेकव्याप्ति एम.
ज्ञानमप्यनुमितिहेतुः न च केवलान्वय्यनुमित्यनुरोधेनावश्यकहेतुभावेनान्वयव्याप्तिज्ञानेने

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Valmeeki Campus, Kathmandu

वोपपत्तौ न स्वरूपघटककारणत्वकल्पने गौरवमिति वाच्यं । इतरभेदज्ञानशून्यकाले इतरव्यापकीभूता
भावप्रतियोगिपृथिवीत्ववती पृथ्वीत्यादिपरामर्शादितरभेदविशेष्यकानुमितेः स्वातन्त्र्येणे
तरभेदज्ञानसत्त्वे ऽपि तादृशपरामर्शादितरभेदविशेष्यकानुमितेश्चापलापप्रसंगेन तद्धेतु
त्वस्यावश्यकत्वात् । प्रामाणिकगौरवस्याऽदोषत्वात् । न चैवं परस्परव्यतिरेकेऽपि परस्परेण कार्यो
त्पादनात् परस्परजन्यानुमितौ तयोर्व्यभिचार इति वाच्यं । एवं सति पक्षसहचरितज्ञानव्यतिरेक
सहचारज्ञानयोरन्वयव्याप्तिज्ञानहेतुत्वे तत्र व्यभिचारवारणायाव्यवहितोत्तरत्वनिवेशस्यावश्यकत्वे
ऽपि परस्परजन्यानुमितौ व्यभिचारवारणायाव्यवहितोत्तरत्वस्य निवेशनीयत्वादिति अन्वयव्य
तिरेकव्याप्त्युभयविधव्याप्तिज्ञानस्यानुमितिहेतुत्वमिति नियमतो कारणत्वमापद्यते । साध्याभा

तर्कं·
५५
वेत्यादिना' अनुमितिः' साध्यविधेयकानुमितिः' ननु हेत्वभाववन्निरूपितसाध्याभावनिष्ठव्याप्तिज्ञानं
हेत्वभावविधेयकानुमितिजनकमनुसाध्यविधेयकानुमितिं· अनुमितौ व्यापकतावच्छेदकरूपे
ण व्यापकस्यैव मानं नियमात् अन्यथा वह्निव्याप्तिज्ञानान्‌ पटानुमित्यापत्तिरित्याशंकते नचेति अ
न्यव्याप्तिग्रहात्' अन्यनिरूपितव्याप्तिज्ञानात्।। हेत्वभाववन्निरूपितव्याप्तिज्ञानादिति यावत्' अन्यानु
मितिः' साध्यविधेयकानुमितिः' नचान्यव्याप्तिज्ञानस्यान्यविधेयकानुमितिजनकत्वे बाधकाभा
व इत्यत आह।। अतिप्रसंगादिति। घटनिरूपितव्याप्तिज्ञानात् पटविधेयकानुमितिप्रसंगादि
त्यर्थः' पक्षधर्मेनेति' स्वाश्रयव्यापकीभूताभावप्रतियोगित्वसंबंधेन साध्याभाववन्निष्ठव्याप्तिवि ल्प·
शिष्टहेतुमत्तावगाहिनिश्चयत्वस्यार्थः साध्यानुमापकत्वमिति। साध्यविधेयकानुमितिविशेष्यहेतु ५५

रित्यर्थः। व्यतिरेकव्याप्तिवत्ताहिपरामर्शोऽन्वयिहेतोरनुमितिजनक इति यावत्। व्यापकतावच्छेद
करूपेण व्यापकस्याभानमिति विषयमस्तु अन्वयव्याप्त्यवगाहिपरामर्शजन्यानुमितिस्थलसत्वेति
हृष्टमनुगृहीताविनाभेदस्य निष्प्रितत्वेन पृथिवीतरेभ्यो भिद्यते पृथिवीत्वाद्धेतव दित्यन्वये
वनतव्यतिरेकी निष्प्रितसाध्यवत्त्वमेव हेत्वंतत्वे प्रयोजकं न तु पक्षान्यत्वमपीति चेन्न। अन्वयस
हचारग्रहदशायां व्यतिरेकसहचारेणैव व्याप्तिग्रहोदयात्। नत्वक्तमाचार्यैः। अत्रालोनावदयंसमु
उपदेशः। केवलव्यतिरेकिलक्षणं नावसिद्धमिति। अन्वयव्यतिरेकिणं लक्षयति। उभयान्यत्वे सति के
वलान्वयिकेवलव्यतिरेक्यन्यत्वमित्यर्थः। प्रसिद्धानुमानमिति। वह्निमान्धूमादित्यर्थः। केचित्तु अन्वयस
हचारमात्रगृहीतव्याप्तिकत्वं केवलान्वयित्वं। व्यतिरेकसहचारमात्रगृहीतव्याप्तिकत्वं केवलव्यति

ग·कें· रेकित्वं उपपसहचारगृहीतव्याप्तिकत्वमन्वयव्यतिरेकित्वं दृष्टा विशेषेधूमस्यापि केवलान्वयित्वकेव
५६ व्यतिरेकित्वेदृष्टेएवंनचैवंविभागव्याघातः उपधेयसंकारेप्युपाधेरसंकरादिति अतएवाहसंक्षेपत्र
स्याहुः नन्वित्थंज्ञायमानलिंगस्यानुमानत्ववादिनये उपपद्यते। ननुलिंगज्ञानस्यानुमानत्वनये अत
एवानुपदमेवलवंहेतावपिहितइतिवक्ष्यतीतिचेन्न। तन्त्रानुमानेत्रिविधमित्यस्यानुमितिजनक।
लिंगज्ञानविषयीभूतंलिंगंत्रिविधमित्यर्थः नचानुमितिकरणस्यैवविभागोचित्यात् लिंगस्यत्रिवि
धत्वोक्तौ तेनमसंगतमितिवाच्यं। केवलान्वयिसाध्यकानुमितिजनकत्वकेवलव्यतिरेकिलिंगकानु
मितिजनकत्वान्वयव्यतिरेकमपलिंगकानुमितिजनकत्वपेदेनलिंगज्ञानस्यत्रिविधत्वेनलिंगस्या एम·
पित्रिविधत्वसंभवात्। वस्तुतोलिंगज्ञानस्यैवत्रिविधंत्वलिंगस्यानुनहियपत्वेनतत्वंकेवलान्व ५६

यिसाध्यकानुमानमित्यस्य चकेवलान्वयिसाध्यकानुमितिजनकज्ञानविषयत्वमर्थः। एवं पक्षाति
रिक्तेः निश्चितसाध्यकत्वमित्यस्य पक्षातिरिक्ते निश्चितसाध्यकानुमितिजनकज्ञानविषयत्वम
र्थः। उभयाभावत्वस्य च केवलान्वयि केवलव्यतिरिकिसाध्यकभिन्नसाध्यविधेयकानुमितिज
नकज्ञानविषयत्वमर्थः। एवं हेत्वावयिहितत्वस्य तादृशज्ञानविषयीभूते हेत्वावयिहितत्वम
र्थ इति न शंकापंककलंकलेशोपीति॥ तत्वनिर्णयविजयरूपैककार्यकारित्वात् प्रसंगाद्य
हेत्वाभासान्निरूपयति। एवमिति। तदाभासा हेत्वाभासाः हेतुवदाभासंत इति योगात् दुष्टा
धर्म्येव हेत्वाभासपदवाच्य इति ध्येयं॥ अनुमितितत्करणान्यतरप्रतिबंधकयथार्थज्ञानविष
यत्वं हेत्वाभासत्वं बाधतदभाववव्याप्यवज्ज्ञानादीनां साक्षादेवानुमितिप्रतिबंधकत्वात्

त·र्क· धसत्प्रतिपक्षयोर्लक्षणासमन्वयः । व्यभिचारज्ञानादीनामनुमितिकारणव्याप्तिज्ञानप्रतिबंधक १२
५८ त्वेनैव हि दुष्टत्वेन व्यभिचारादेर्हेत्वाभासत्वोपपत्तिः । अत एव व्यभिचारादिसंग्रहाय अनुमिति
प्रतिबंधकेति विहायानुमितितत्करणान्यतरेत्युक्तं । न च तद्धेतोरेवास्तु । किं तेनेति न्यायेन व्यभि
चारज्ञानस्यानुमितिप्रतिबंधकत्वमेवास्त्विति वाच्यं । धूमपरामर्शकाले आलोको वह्निव्यभि
चारीति व्यभिचारज्ञानकालेऽनुमित्युदयप्रसंगात् । न च तद्धर्मावच्छिन्नलिंगकानुमितौ तद्धर्माव
च्छिन्नविशेष्यकव्यभिचारज्ञानस्यैव प्रतिबंधकत्वमिति वाच्यं । गौरवात् । साक्षाद्विरोधिनो ज्ञान
स्य जनकज्ञानविघटकत्वेनैव विरोधित्वात् । न चैवं धूमो वह्निव्याप्य इति ज्ञानकालेऽपि नीलधूमो वह्नि ल्प·
पादिजन्यव्यभिचारज्ञानकालेऽप्यनुमित्युदयापत्तिरिति वाच्यं । इष्टत्वात् । न ह्येकं कारणं पूर्णं क्वचिदपि ५८

ष्यति। व्यभिचारादिभ्रमसमादायातिप्रसंगभंगाय पद्यार्थेति। विभजते॥ तत्रेति। तत्र त्रिविधे सव्यभिचारे नि
रूपणीये। साध्यवदन्येति। साध्याभाववद्वृत्तित्वमिति कृते धूमाभाववदयोगोलकवृत्तित्वेन धूमवा
न्वह्नेरित्यादौ लक्षणासंभवे कपिसंयोगी एतद्वृक्षत्वादित्यत्र कपिसंयोगाभाववद्वृत्तित्वादेतद्वृक्ष
त्वस्यापि तत्त्वापत्तिः प्रतियोगिवैयधिकरण्यादिनिवेशे चातिगौरवमिति तत्परित्यागः। अन्योन्या
भावस्य चाव्याप्यवृत्तित्वानुरोधः न च कपिसंयोगिघटोभयभेदवारणाय प्रतियोगिवैयधिकर
ण्यनिवेशावश्यकत्वमिति वाच्यं। साध्यतावच्छेदकावच्छिन्नसाध्यवत्त्वावच्छिन्नप्रतियोगिताक
भेदवद्वृत्तित्वस्य विवक्षणात्। नहि कपिसंयोगत्वावच्छिन्नवदन्यत्वस्य तद्वृक्षे सत्त्वमिति यदि
चान्योन्याभावस्याव्याप्यवृत्तित्वं विभाव्यते तथापि प्रतियोग्यवृत्तित्वस्यैव लाघवेन निवेशनी

ग-क्रे यत्वात् प्रतियोगितैवयधिकरण्यापेक्षया लाघवस्य स्फुटत्वात्। न च द्रव्यं गुणकर्मान्यत्वविशिष्टसत्ता
५८ दित्यत्र विशिष्टस्यानतिरिक्तत्वेन सत्ताया द्रव्यभिन्नगुणादिवृत्तित्वादतिप्रसंग इति वाच्यं। साध्य
वदन्यनिष्ठाधिकरणतानिरूपकतावच्छेदकहेतुतावच्छेदकावच्छिन्नत्वस्य तदर्थत्वात्। लक्ष्य
लक्षणं योजयति। यथेत्यादिना। यत्र साध्याभावोप्यव्याप्यवृत्तिः तदा कपिसंयोगी एतद्वृक्षत्वा
दित्यत्राव्याप्तिः प्रतियोग्यवृत्तित्वनिवेशे च गौरवमित्यत आह। साध्याभावाधिकरणेति।
साध्याधिकरणावृत्तित्वाभावत्वमत्र साध्यसामानाधिकरण्यं न तु साध्यानधिकरणावृत्तित्वं। अन्यथा
वह्न्यनधिकरणावृत्तिद्रव्यत्वादिसामानाधिकरण्यधूमेपि सत्वेन वह्निमान् धूमादित्यादावतिप्र ल्प
सङ्गापत्तेः। अत्र च साध्याधिकरणोऽवृत्तित्वं येन संबंधेन तेन संबंधेन तदधिकरणत्वविशे ५८

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वच्छिन्नाविशेषेणावाऽवृत्तित्वं तदधिकरणत्वं च बोध्यं। एतेन पर्वतीयवह्निसंबंधेनावृत्तित्वाद्धेतोः संयोगा
दिनाऽवृत्तिपर्वतत्वसामा नाधिकरण्यमादाय धूमाद्यावृत्तिव्याप्तिः संबंधसामान्येनावृत्ति
त्वाद्धेतोर्धूमवदन्यत्वादेरपि कालिकादिसंबंधेन धूमवद्वृत्तित्वात् तद्वृत्तिगगनादिरेव तत्सा
मानाधिकरण्यस्य च वह्न्यावृत्तिसमवायात्संमवायेनेरितिपरास्तं। तत्सामानाधिकरण्यं च तद
धिकरणे हेतुतावच्छेदकसंबंधेन संबंधित्वं। तेन कालिकादिसंबंधमादाय धूमाद्यावृत्ति
व्याप्तिः पक्षस्य साधारणादिसाधारणमितरत्र प्रायः प्रपंचेन संकराद्विति न्यायेन तत्साधारण्येऽपि
सति विरहः असाधारणत्वाद्यत्ताने पि तत्रातत्वाने ऽवृत्तिमतिबंधादिति पक्षसपक्षविपक्ष
व्यावृत्तत्वमसाधारणत्वं। निश्चितसाध्यवत्त्वमेवेति निश्चितसाध्याभाववद्व्यावृत्तत्वमि

यसंकरेप्युपाभे २

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त·कैं·

५२

तिपावृत्तं शब्दो नित्यः शब्दत्वादित्यादौ सर्वेभ्यो नित्येभ्योऽनित्येभ्यश्च शब्दस्य व्यावृत्तत्वात् लक्षणस
मन्वयः न च शब्दो नित्यः शब्दत्वादित्यत्र हेतौ शब्दे नित्यत्वानिश्चयदशायां निश्चितसाध्यवद्व्यावृ
त्तत्वादसाधारण्यापत्तिः इष्टत्वात्। असाधारणत्वसत्प्रतिपक्षत्वयोरनित्यदोषत्ववादिनां प्राचाम
तेनैतल्लक्षणादिति तन्मतं दूषयितुं स्वयं लक्षणमाह। साध्येति। ननु सपक्षव्यावृत्तत्वमसाधारण
त्वमित्यस्य का गतिरित्यत आह। द्वयमेवेति। एवं निरुक्तार्थकमेव न तु निश्चितसाध्यवद्व्यावृत्त
त्वं तत्त्वे न शब्दो नित्यः शब्दत्वादित्यस्य संग्रहः स्यादिति। अव्याप्तिरिति। अनित्ये शब्दे शब्दत्वा
भावस्य सत्त्वेन नित्यत्वव्यापकाभावप्रतियोगित्वस्य शब्दत्वे असत्त्वादिति भावः सद्धेतुत्वादिति।
ननु असाधारणत्वसत्प्रतिपक्षत्वयोरनित्यदोषत्ववादिप्राचीनमते सद्धेतावपि तत्संभवइति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

चेत्। बाधभ्रमेणानुमितिप्रतिबंधाद्बाधस्यापि नित्यदोषत्वापत्तिः यदि च बाधबुद्धेः प्रतिबंधात्तत्रानुमितिः
तत्र हेतुत्वेन दुष्टत्वमिति विभाव्यते। तदा प्रकृतेऽप्यसाधारण्यसत्प्रतिपक्षस्थले तदभावव्याप्यवत्ताज्ञाने
नानुमितिप्रतिबंधः न तु तत्र हेतुरपि दुष्टस्तस्य तुल्यत्वादिति भावः। एतज्ज्ञानं त्वसाधारण्यज्ञानं
साक्षात्। ग्राह्याभावव्याप्यावगाहित्वात्। व्यतिरेकीति। व्यतिरेकव्याप्तिसत्प्रतिपक्षदूषकत्वात्।
तथा च तदभावव्याप्यवत्ताज्ञानमुद्रयाऽनुमितिविरोधित्वमिति भावः। ननु साध्यव्याप्यवत्ताने साध्या
भावव्याप्यवत्ताज्ञानं न चात्र संभवतमिति सत्प्रतिपक्षताद्भेदप्र संगदित्याह नचैवमिति। एवं सत्प्रतिप
क्षत्वरूपत्वे। सत्प्रतिपक्षत्वपीति। तथा चैतस्य तदंतर्गतत्वे सव्यभिचारस्त्रिविध इति विभागव्याघात
इति भावः हेत्विति। साध्यव्याप्यहेतुसाध्याभावव्याप्यहेत्वोर्यद एवं सत्प्रतिपक्षत्वं। यथा ह्रदो

तर्कः

६०

वह्निमान् धूमात् ह्रदो वह्न्यभाववान् ह्रदत्वादित्यादौ प्रकृते चैकस्यैव ग्राह्यत्वस्योभयसाधकत्वेन तत

स्योभयलिंगकत्वघटितसत्प्रतिपक्षत्वमिति भावः। अत्र हेत्विति। तथा च साध्यसाधनयोः सहचारा

ग्रहे तान्वयव्याप्तिग्रहे तानान्वयित्वमिति भावः। तथा चेति। नित्यत्वाभावव्यापकीभूताभावप्रतियोगि

त्वरूपव्यतिरेकव्याप्त्यवगाहि नित्यत्वव्याप्यशब्दत्ववत्तापरामर्शात् साध्यमिवानित्यत्वाभावो नित्य

त्वं तथा च नित्यत्वव्यापकीभूताभावप्रतियोगित्वरूपव्यतिरेकव्याप्त्यवगाह्यनित्यत्वव्याप्यशब्दत्व

वत्तापरामर्शात् साध्याभावोपि साधनीयः। न च विरुद्धोभयसाधनं संभवतीति परस्परानुमितिप्रति

बंधस्तेनेत्यर्थः। विरुद्धयोः। साध्यसाध्याभावयोः। अनिर्णायक इति। अत्र सतीति शेषः। अनिर्णायकत्व एमः

ने न सत्प्रतिपक्षस्थले संशयाकारानुमितेरंगीकर्तव्यत्वे कोटिकारमननमाहर्षीति। तद्भावव्याप्य

मितौ बाधकाभावः । संशयत्वस्यार्थसमाजग्रस्तत्वेपि साध्यतदभावव्याप्यवत्तापरामर्शाभ्यां साध्यतदभावानुमितौ जायमानायां फलतः संशयानुमितेरुपपत्तेः । प्रत्यक्षस्थले तदभावव्याप्यवत्ताज्ञानस्य प्रतिबन्धकत्वेऽकल्पनीये प्रत्यक्षत्वस्य प्रामाण्यवैशिष्ट्यमतप्रकारकत्वावच्छिन्नप्रतिबध्यतावच्छेदकत्वं तु मते ३

वन्नाज्ञानस्य विशिष्टबुद्धिसामान्यविरोधितया सत्प्रतिपक्षस्थलेन संशयापादकानुमितिः । किंतु परस्य
यानुमितिप्रतिबंध एवेति सिद्धांतिमतेन तत्र प्रत्यक्षस्थले तदभावव्याप्यवत्ताज्ञानस्य प्रतिबंधक
त्वेपि अनुमितौ तस्य प्रतिबंधकत्वाकल्पनेन संशयापादनुमितिसाधारणमिति कथमनुमित्सापत्तिरि
तिनाशंकनीयं । इच्छाधीनत्वेनकत्वानुरोधेन विशिष्टैव प्रत्यक्षत्वेनिवेशप्रतिबध्यप्रतिबंधक
भावस्यावश्यकत्वात् । न च प्रकृतस्थले इच्छाधीनत्वेजकत्वान् न तु एव प्रत्यक्षान्यज्ञानत्वं तत्प्रति
बध्यतावच्छेदकं तच्चानुमितिसाधारणमिति वाच्यं । प्रत्यक्षान्यज्ञानत्वापेक्षया विशेषण
विशेष्यभावे विनिगमनाविरहेण तदपेक्ष्य प्रकृतत्वस्यैव तत्प्रतिबध्यतावच्छेदकत्वात् । प
रोक्षत्वजातेरनुभवत्वेन संकरात्तत्स्यान्यपि तत्वमिति अनुमितौ तस्य निबंधकत्वस्याक्षतत्वा
प्र

ना॰ कें॰ नसंशयानुमितौ किंचिद्बाधकमिति अत्राहुः तदभावव्याप्यवत्ताज्ञानविशिष्टेच्छात्वावच्छिन्नंप्रति
६१ तदभावव्याप्यवत्ताज्ञानस्यप्रतिबंधकत्वं। इच्छाविशिष्टत्वावच्छिन्नंप्रति च इच्छात्वेन हेतुत्वमिति
आहार्यानुमितेरंगीकारेण तदभावव्याप्यवत्ताज्ञानसत्वेन इच्छावलात् नापि तदभावव्याप्य
वत्ताज्ञानाभावकूटप्रकारेण वलात्संशयानुमित्यापत्तिरिति किं लाघवादाहु अहून्निसाध्यकत्व
मिति। न चैवं वक्ष्ममवानाकाशादिसाध्यकेरसंग्रह इति वाच्यं स्वरूपासिद्धएव तन्निवेशात्। केचित्तु
केवलान्वयिधर्मावच्छिन्नपक्षकत्वमनुपसंहारित्वं उदाहरणं च सर्वमनित्यंप्रमेयत्वादित्यादि
व्यतिरेकव्याप्तिग्रहप्रतिबंधकताबीजमित्याहुः साध्येति। साध्यतावच्छेदकसंबंधेन एम॰
साध्याधिकरणे हेतुतावच्छेदकसंबंधेनाहेतुत्वमित्यर्थः॥ तेन समवायेन वह्नेः साध्यतायां ६१

संयोगेन धूमहेतोः संयोगेन वह्न्यधिकरणवृत्तित्वेपि गोत्वाधिकरणे ऽव्याप्तस्य कालिकादिना वर्तमान
त्वेपि चनाव्याप्तिः साध्यतावच्छेदकावच्छिन्नाधिकरणानिष्ठाधिकरणतानिरूपकतानवच्छेदकहेतु
तावच्छेदकावच्छिन्नत्वमिति निष्कर्षः तेन गुणकर्मान्यत्वविशिष्टसत्तावान् गुणत्वात् गुणे गुणक
र्मान्यत्वविशिष्टसत्त्वादित्यादौ पर्याप्त्यंशे नाव्याप्तिः उपाधीति असाधारणत्वविरुद्धत्वाद्युपाधीनां मे
दादिसमर्थः विरुद्धत्वज्ञाने ऽसाधारणत्वाद्युपज्ञाने ऽप्यनुमितिप्रतिबंधादिति भावः सत्प्रतिपक्षः साध्य
सिद्धिविरोधिपरामर्शः तद्धेतुः सत्प्रतिपक्षितः इति योगार्थमपि मे स्यात् पक्ष इति। अत्र साध्य
धी प्रतिबंधकः परामर्शः सत्प्रतिपक्ष इत्येतावतैव सामंजस्ये पक्षे इति संपातायातमिति कश्चित्।
तत्र पक्षविशेषणकत्वलाभाय तत्पदस्यावश्यकत्वात् इदं च सत्प्रतिपक्षस्यानित्यदोषत्वांगीकर्तृमा

१४ साध्याभावव्याप्यवत्तापरामर्शस्य प्रत्यक्षादिविशेष्यकसाध्यवत्ताज्ञानाविरोधितया पक्षवि

त·र्कं· चीनमते लक्षणं वोध्यं। स्वमते तु पक्षे साध्याभावव्याप्यहेतुमत्त्वं सत्प्रतिपक्षः अत एव उभयमतसा
६२ धारणं पक्षे सद्धेतुमेव पश्याज्जलमित्यादिनोदाहृतवान्। नेदमुक्तमिति। उक्तत्वाभावव्याप्यात्तेजस्त्व
वदिदमिति ज्ञानमुक्तत्वरूपसाध्यधीप्रतिबंधकमिति भावः सत्प्रतिपक्षफलं तु परस्परप्रतिबंधेन
परस्परानुमितिप्रतिबंधकमिति भावः तथाहि। पर्वतो वह्निमान् धूमात् पर्वतो वह्न्यभाववान् पा
षाणमयत्वादित्यादौ वह्निव्याप्यवत्तापरामर्शे सत्यात्र वह्न्यभावानुमितिः वह्न्यभावव्याप्यवत्ता
परामर्शे सत्यात्र न वह्न्यनुमितेरप्युत्पत्तिः न हि विशिष्टबुद्धित्वावच्छिन्नं प्रति तदभावव्याप्यवत्तानि
श्चयस्य प्रतिबंधकत्वादिति निबंधकृनल्क्। प्रकृतसाध्यसाधकहेत्वोः किं तत्त्वमिति जिज्ञासैव सत्प्र एम·
तिपक्षफलं। अत एव प्रकृतसाध्यसाधकहेत्वोः किं तत्त्वमिति जिज्ञासाजनिकाव्याप्तिपक्षधर्मता

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पक्ष्यतिः प्रकारतासमवच्छिन्नतन्निरूपितत्वमपीत्याहुः रत्नकोषकारास्तु ॥ ननु कारकप्रत्यक्षे तदभा
वद्व्याप्यवत्ताज्ञानस्य प्रतिबन्धकत्वेपि प्रयोजनाभावेनानुमितौ तत्प्रतिबन्धकत्वस्याकल्पना
त्संशयपक्षस्यार्थसमाजग्रस्तत्वेपि साध्यतदभावव्याप्यवत्तापरामर्शप्रयोज्यसंशयमानानुमितिः
संशयरूपैव जायते। उभयप्रकारकत्वे निश्चयत्वायोगात् संशयानुमितिरेव सत्प्रतिपक्षफ
लमिति। ननु तदभावव्याप्यवत्ताज्ञानकाले तत्प्रकारकोपनीतभानानुदयेन तत्र तत्प्रतिबन्धक
त्वे कल्पनीये प्रसक्ततया निवेश्य तत्प्रकारकत्वहीनत्वमेव तत्प्रतिबध्यतावच्छेदकं तथानुमिति
स्साधारणमिति कश्चित्तु उभयपरामर्शकाले उभयविधेयकानुमितिरिति चेन्न ईदृशकाले व्या
हार्यप्रसक्तेर्मत्या वावश्यकत्वस्याशंकनया द्विप्रकारकेच्छानामुत्तेजकत्वानुरोधेन विशिष्यप्रति

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

त·र्कं·
६३

बंधकतापत्त्यावश्यकत्वात्। घटस्पार्शनसामग्रीसत्वे घटचाक्षुषेच्छायामसत्यां च चाक्षुषसामग्र्यां
घटस्पार्शनापत्तेस्तत्सामेकत्रनिवेशप्रयोगात् ततत्सामग्रीविशिष्टतत्तदिच्छाकूटस्योत्तेजकत्वे
चातिगौरवमिति। न च प्रत्यक्षस्थले इच्छायाश्चानुत्तेजकत्वात् तत्रैव प्रत्यक्षान्यज्ञानत्वेन तत्प्रतिबध्य
तावच्छेदकं न त्वनुमितित्वावधारणमिति वाच्यं' प्रत्यक्षान्यत्वज्ञानत्वयोर्विशेष्यविशेषणविशेष्य
भावे विनिगमनाविरहेण तद्रूपेण प्रत्यक्षत्वस्यैव तत्प्रतिबध्यतावच्छेदकत्वात्। परोक्षत्वजातेरसं
भवत्वेन संकरेण तस्यापितत्वमिति अनुमितौ तत्प्रतिबंधकत्वस्यात्रक्लृप्ततयानुमितौ न किंचिद्बा
धकमिति' अत्र केचित्' इच्छायाउत्तेजकत्वानुपगमे तत्तदभावव्याप्यवत्ताज्ञानविशिष्टान्यतावच्छि ल्प·
न्नप्रतितदभावव्याप्यवत्ताज्ञानत्वेनैकमेव प्रतिबंधकत्वम् इच्छाविशिष्टतावच्छिन्नप्रतितदिच्छात्वेन ६३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

हेतुतयाएककार्यकारणभावेनैव निर्वाहे तस्यानुमितिमात्रकारणतया न संशयानुमितिहेतुत्वमर्हे
ति। तदभावव्याप्यवत्ताज्ञानस्य विरोधितः सत्वात् आहार्यानुमितेरंगीकारे तदिच्छाकालेपि तदुत्प
त्तेः संभवादिति निर्गर्वः। असिद्धिं निरूपयति॥ असिद्धिस्त्विति॥ परामर्शेति। व्याप्तिप्रकारकपक्षध
र्मताज्ञानं परामर्शः तत्प्रतिबंधकत्वं च व्याप्यत्वासिद्धेर्व्याप्तिज्ञानविघटकत्वेन स्वरूपासिद्ध्याश्रय
सिद्ध्योस्तु पक्षधर्मताज्ञानविघटकत्वेन व्यभिचारादिज्ञानस्यापि व्याप्तिज्ञानविघटकत्वेन तद्वि
षये व्यभिचारादावतिप्रसंगात् व्यभिचाराद्यन्यत्वं प्रतिबंधकतावच्छेदकधर्मे विशेषणीयं परामर्श
प्रतिबंधकज्ञानविषयत्वं चित्त्वैर्घटपटादेरपि समूहालंबनात्मकज्ञानविषयत्वादतिव्याप्ति र
तः प्रतिबंधकतावच्छेदकत्वपर्यंतानुधावनं अवच्छेदकत्वं च विषयतया तत्प्रतिबंधकतावच्छेद

ने· के· कतापर्याप्त्यधिकरणत्वं तेनासिद्ध्यादिघटकेनातिव्याप्तिरिति। स्वरूपासिद्ध्याद्यन्यतमत्वमेव तत्त्वमि
६५ त्यपि केचित्। सांप्रसिद्धिः यथाक्रमेण लक्षणान्याह पक्षेत्यादिना पक्षतावच्छेदकविशिष्टपक्षे
हेतुतावच्छेदकावच्छिन्नहेतोरभावः स्वरूपासिद्धिरित्यर्थः। तेनोत्पत्तिकालीनो घटः पृथिवी गंध
प्रागभावादित्यादौ नातिप्रसंगः। न वा गुणो द्रव्यसत्त्वादित्यादौ विशिष्टस्यानतिरिक्ततया विशिष्ट
सत्ताभावप्रतियोगिनि सत्त्वेऽतिव्याप्तिः। तत्राप्युत्पत्तिकालीनत्वरूपपक्षतावच्छेदकविशिष्टे गंध
तेरभेदेपि त्वया घटाभावे तथाभावांगीकारात्। न चान्य एव घटाभावे घटाभावः अनवस्थापत्तेः॥ अप्रमि
तत्वाच्च। अत्रोच्यते॰ यदि भूतलविशेषो घटाभावस्तदा भूतले घटाभावस्य भावाधारताप्रत्ययो न
स्यात्· न हि भूतलं भूतलाधिकरणम्·। भूतले भूतलमिति प्रतीत्यापत्तेः। किंच· यत्रेदानीं घट आनी
तस्तत्र तत्स्थानीं तदधिकरणं घटाभावो न वा· आद्ये· इदानीं घटो नास्तीति प्रत्ययः स्यात्·। अन्त्ये ऽन्यदा
पि घटो नास्तीति प्रत्ययो न स्यात्·। किंच· कपाले घटो भविष्यति घटो नष्ट इति प्रतीते रिक्तकपाले पू
र्वं घट पूर्वभावः उत्तरकाले घटध्वंसः स्यादि कपालात्मा तदा भेदस्तत्प्रतीतिः स्यात्·। कपालस्य स
त्वात्·। अन्यथा कपालप्रतीतिरपि न स्यात्·। किंच· एवं मोक्षोपि दुःखाभावः आत्मरूपः स्यात्·। तथा चा
साध्यतापत्तिः। नित्यत्वादिति संक्षेपः॥ स्यादेतत्॰ एवं घटाभावो नास्तीति प्रतीत्या घटाभावाभावो प्यधि॰

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मंजरी
८

कस्मात्। स्यादेवेति चेत्तदभावोप्यधिकस्यादित्यनवस्था। केवलाधिकरणं तदभाव इति चेन्न हि सर्वत्रम
स्वाभावोऽतिरिक्तमधिकेन। भवद्भिरभ्युपगमस्य प्रसंगश्चैवं स्यात्। अत्राहुः। घटाभावाभावो घटएव॥
तन्मते घटाभावो नास्तीति प्रतीतिः। न च केवलाधिकरणरूप उक्तयुक्तेरिति संप्रदायः। नव्यास्तु घटाभा
वाभावोऽधिकएव अभावत्वेन प्रतीतेः नचाश्रयभ्रमः। बाधकाभावात्। तदभावस्तु घटाभावएव नाधि
क इति नानवस्थानमित्याहुः। स्यादेतत्। भूतलं घटभेदभिन्नं न वा। अन्त्ये आयातं भूतलमेव घटभेद
इत्यनेन। आद्ये तद्भेदभेदोप्यधिकः स्यात्। स्यादेवेति चेत्तद्भेदभेदोप्यधिकः स्यादित्यनवस्था। अथान
वस्थाभयात्तद्भेदभेदो नाधिकः किन्त्वधिकरणरूप इति चेन्न। भवद्भिरभ्युपगमप्रसंगः। अत्राहुः। भेदभेदो
प्यधिकएव। नचैवं तद्भेदोप्यधिकः स्यादिष्टत्वात्। न चेयमनवस्था दोषप्रसंगाय। प्रामाणिकत्वात्। एम ८
तदाहुः। सर्वेनावलवती ह्यन्यथानुपपत्तिरिति संक्षेपः। स चायमभावो द्विधा। अन्योन्याभावः संसर्गाभा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वस्थ· तत्रेदमिदं न भवति· इदमेतद्भिन्नमिति प्रतीतिसाक्षिकोऽभावोऽन्योन्याभावः। यदीदमाहुः। तादा
त्म्यसंबन्धावच्छिन्नप्रतियोगिताकोऽभावोऽन्योन्याभाव इति। तदन्योऽभावः संसर्गाभावः। सोपि त्रिविधः। अत्य
न्ताभावप्रागभावप्रध्वंसाभावभेदात्। तत्र नास्तीत्यनुभवसिद्धो नित्यः संसर्गाभावोऽत्यन्ताभावः। विनष्ट इति प्रती
तिसाक्षिक उत्पत्तिमानभावो ध्वंसः। स चाविनाशी· तद्विनाशकल्पनायां प्रमाणाभावात्। नहि विनाशो विनष्ट
इति प्रत्येति कश्चित्। तत्प्रागभावस्तु यद्यादिरूपप्रतियोगी तत्प्रागवस्था· उभयत्र ध्वंसो भविष्यतीति प्रत्यया
त्। विनाश्यभावः प्रागभावः। स च भविष्यतीत्यनुभवप्रतीतिसाक्षिकोऽरूपकत्वः० तस्य च ध्वंसः प्रतियोगी
तत्संसर्ग उभयत्र विनष्टः प्रागभाव इति प्रतीतेः। अत्यन्ताभावोऽन्योन्याभावश्च नित्यौ। नित्यश्चाभावो द्विविः
धः। एकमात्रवृत्ति धर्मावच्छिन्नप्रतियोगिताकोऽन्यश्च० न चात्र मानाभावः। घटवति घटपटौ न स्तः घ
टौ न घटपटौ· एकघटवति न घटौ· एको न द्वाविति प्रतीतेः। एकघटवति द्वित्वावच्छिन्नतदत्यन्ताभावस्य

मंजरी ९ एकस्मिन्नुभयान्योन्याभावस्य च सत्त्वात्। न च प्रतियोगिमति कथं तदभावस्तयोर्विरोधादिति वाच्यम्। प्रतियोगितावच्-
छेदकावच्छिन्ने नैवाभावस्य विरोधात्। न चैकोऽपि द्वित्वावच्छिन्नः। एको नास्तीत्यप्रतीतेः। अत एव दण्डिपुरुषाद्दण्डऽ
पन्नेति पुरुषे सत्यपि दण्डिपुरुषो नास्तीति धीबलाद्विशिष्टाभावो विशेषणावच्छिन्नविशेष्याभाववत्त्वोऽभ्युपे-
यते। न चैवं दण्डाभावप्रतीतिविषयाद्दण्डवत्यपि तथा प्रतीतेः। न वा पुरुषाभावप्रतीतिविषयः तस्य सत्त्वात्॥
तस्माद्यत्र विशेषणाभावो विशेष्याभाव उभयाभावो वा तत्र नो विशिष्टाभावोऽधिकोऽवसेयः। भट्टास्तु अभावो
नेन्द्रियग्राह्यः। इन्द्रियसन्निकर्षाणामभावात्। किन्त्वनुपलब्धिरूपप्रमाणगम्य इत्याहुः। तन्न। प्रमाणान्तरक-
ल्पनातः सन्निकर्षान्तरकल्पनाया लघुत्वात्। अन्यथा संयोगादीनां रूपानां सन्निकर्षाणामभावाद्रू-
पेऽपि प्रमाणान्तरकल्पनापत्तेः। तत्र घटं साक्षात्करोमीति प्रतीतेः प्रत्यक्ष एवायमिति चेत्। इहापि राम
पश्यामि घटाभावमिति प्रतीतेः प्रत्यक्ष एवेति तुल्यम्॥ किंच अनुपलब्धेः प्रमाजनने व्यापाराभावात् ९

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कथंप्रमाणत्वं॰व्यापारवद्धिकारणंकरणमित्युक्तम्॰॥नन्वेवंघटाभाववति घटोपलब्धावपिघटाभावप्रत्ययःस्या
त्॥इन्द्रियसंबद्धविशेषणतायाः सत्वादिति चेन्न॰योग्यानुपलब्धेरप्यभावग्रहे हेतुत्वात्।अथकेयंयोग्या
नुपलब्धिः।योग्यस्यप्रतियोगिनोऽनुपलब्धिः सहकारिणीतिमतंतन्न॰जलपरमाणौपृथिवीत्वाभावग्र
हापत्तेः।भवतिहिपृथिवीत्वंचक्षुर्योग्यंतदनुपलब्धिश्चजलपरमाणौ॰स्तंभेपिशाचभेदग्रहानुपपत्तेश्च॥
पिशाचस्यप्रतियोगिनोऽयोग्यत्वात्।अथयोग्येऽधिकरणेप्रतियोगिनोऽनुपलब्धिः सहकारिणीतिचेन्न।भू
तलेपिशाचात्यन्ताभावग्रहापत्तेः॥यत्तुअत्यन्ताभावग्रहेयोग्यप्रतियोग्यनुपलब्धिः अन्योन्याभावग्रहेचयो
ग्यऽधिकरणेप्रतियोगितादात्म्यानुपलब्धिः सहकारिणीतिमतंतन्न॥जलपरमाणौपृथिवीत्वात्य
न्ताभावग्रहापत्तेः॥वायोऽद्भूतरूपवद्भेदग्रहणापत्तेश्च।नचेष्टापत्तिः।अनुभवविरोधात्।अत्रोच्यते॰
योग्यसहकारिसंपन्नानुपलब्धिःकारणम्॥अतएवान्धकारेनघटाभावग्रहश्चक्षुषा।नचालोकाधिक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रणसन्निकर्षस्यापि हेतुत्वात्। न वा जलपरमाणौ पृथिवीत्वाभावग्रहः। योग्यसन्निकर्षाभावात्। कः सन्निकर्षो
योग्यः पृथिवीत्वाभावग्राहक इति चेत्· इन्द्रियसन्निकृष्टमहत्त्वोद्भूतरूपवद्विशेषणता। उद्भूतरूपव
त्त्वाभावे तु इन्द्रियसन्निकृष्टमहत्त्ववद्विशेषणता योग्यः सन्निकर्षः। अतो मनसि न तद्ग्रहः भवति च मह
ति वायोः। एवमन्यत्रापि सन्निकर्षाः योग्याः कार्यवशादुन्नेयाः पिशाचात्यन्ताभावस्य योग्यत्वादेव न गृ
ह्यते। का पुनरत्यन्ताभावे योग्यता· योग्यमात्रप्रतियोगिके योग्यधर्मावच्छिन्नप्रतियोगिताकत्वं वि
शेषणम्॥ एवमन्यत्राप्यनुभवानुसारेण योग्यता वाच्या· सर्वाभावसाधारणं किं योग्यत्वमिति चे
न्न किंचिदिति गृहाण। तत्किन्नैवाभावयोग्यतेति चेत् गुणयोग्यतावदननुगतस्यैव तत्त्वादि
ति संक्षेपः॥ अथ किमिदं चक्षुरादि· तैजसमिन्द्रियं· रूपग्राहकमहदिन्द्रियं वा चक्षुः। वायवीयमि
न्द्रियं स्पर्शग्राहकं महदिन्द्रियं वा त्वक्॥ आप्यमिन्द्रियं रसग्राहकं महदिन्द्रियं वा रसनं॥ पार्थिवमि

द्रियं गन्धग्राहकं महदिन्द्रियं वा घ्राणम्। महत्त्वं दं मनोवारणाय। कर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रम्। शब्दग्रा
हकं महदिन्द्रियं वा श्रोत्रम्। निस्पर्शमणुमनः। निस्पर्शपदं पार्थिवाद्यणुवारणाय। अणुपदं विभुवारणा
य। अत्र मीमांसकाः। मनो नाणु किन्तु विभु निस्पर्शद्रव्यत्वादात्मवत्। मनसस्त्वेवात्मभिन्नत्वे सति ज्ञा
नासमवायिकारणसंयोगाश्रयत्वमिति स्यात् तन्न। विभुत्वे आत्मना संयोगानुपपत्तेः। तथाहि। द्विविध
संयोगः कर्मजः अवयवसंयोगजश्च॥ न च विभोरात्मनः कर्मास्ति। मनो यदि विभु तदाऽस्यापि कर्माभावा
त् कुतः कर्मजसंयोगसंभवः। न चानयोरवयवोऽस्ति येन तत्संयोगजः संयोगः स्यात्॥ न च नित्य एव वि
भ्वोः संयोगोऽजसंयोगनिषेधात्। कुतो निषेध इति चेत्। मानाभावात्। संयोगत्वावच्छेदेन द्रव्यज
न्यत्वावधारणाच्च अप्रयोजकमिदमनुमानमिति संक्षेपः॥ ॥इति चूडामणिभट्टाचार्यकृतन्या
यसिद्धान्तमञ्जर्यां प्रत्यक्षपरिच्छेदः समाप्तिमगमत्॥ ॥अथानुमानं निरूप्यते। तत्रानुमिति

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मंजरी ११ करणमनुमानम्॰ अनुमितित्वं चानुमिनोमीत्यनुभवसिद्धो जातिविशेषः। जन्यज्ञानजन्यत्वा नजन्यत्वाव्यभि
चारीति। ज्ञानजन्येऽनित्ये निर्विकल्पे च तद्‌जन्यत्वं व्यभिचरति॰ तत्रापि प्रथमजन्यपदं चाक्षुषत्वादिवा॰
रणाय तद्धि ईश्वरज्ञानजन्यत्वाव्यभिचारि॰ उपमितीनां सर्वासां शब्दविषयकातिदेशवाक्यार्थज्ञानज
न्यत्वात्। शाब्दानुभवानां सर्वेषां च शब्दज्ञानजन्यत्वात्॰ न च शब्दज्ञानजन्यत्वव्यभिचारित्येवमस्तु॰
कः अनुमितित्वस्य ईश्वरीयशब्दज्ञानजन्यत्वाव्यभिचारित्वेनासम्भवात्॰ न च मोक्षजनकतावच्छे
दकं तत्वज्ञानवृत्तिसामान्यं जन्यज्ञानजन्यमात्रवृत्तीत्यपि तिव्याप्तिः॥ तस्य शब्दविशेषविषयकम
ननजन्यमात्रवृत्तित्वेन जन्यशब्दज्ञानजन्यत्वाव्यभिचारित्वात्। जातिपदं वा मानसा वृत्तिजाति
परम्॰ अत एव भक्तिइत्यालादेर्नुदासः। अनुभवपदं स्मृतिवारणायेति दिक्॰। ननु किमिदं तत्क रामः
रणमिति चेत्॰। व्याप्तिविशिष्टपक्षधर्मताघटकलिङ्गपदार्थज्ञानमिति गृहाण॰ ननु केयं व्याप्तिः॥ ११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न तावत्साध्यात्यन्ताभाववदवृत्तित्वम्। पर्वतीयवह्न्यत्यन्ताभाववति महानसे धूमस्य सत्त्वात्। नापि साध्या
वदन्यावृत्तित्वं व्याप्तिः। वह्निमत्पर्वतान्यचत्वरवृत्तित्वाद्धूमस्य। अथ साध्यवत्तावच्छिन्नान्योन्याभावव
दवृत्तित्वं विवक्षितम्। न च धूमवति वह्निमत्त्वावच्छिन्नान्योन्याभावो वर्त्तते धूमवान्न वह्निमानिति प्र
तीतेरिति चेन्न। केवलान्वयिसाध्यकेऽव्याप्तेः। अथ मीमांसकाः। केवलान्वयिसाध्यकमनुमानमेव न कु
तावदव्याप्तिशङ्का इत्याहुः। तन्न। इदं मेयत्वमनुमितो मीयत इत्यनुभवापलापापत्तेः। न च कारणबाधान्नानु
मितिरियम्। व्यभिचारेण तद्भङ्गात्। तद्दृष्टिज्ञानादेवानुमितिरित्याहुः। तन्न। अनन्यख्यातेरसिद्धेः। किंच। ज्ञे
यत्वसाध्यकेऽप्यव्याप्त्युद्धारात्। न स्थलीकमेतेषं भवति इष्यते। अन्ये तु कार्त्स्न्येन संबन्धो व्याप्ति
रित्याहुः। तत्र वदन्ति। कोऽयं कार्त्स्न्येन संबन्धः॥ कृत्स्नेन साध्येन हेतोः संबन्धः कृत्स्ने हेतौ साध्यसामानाधि
करण्यं वा। कृत्स्ने हेतुमति साध्यवत्त्वं वा। नाद्यः। प्रमित्यनुमानेऽव्याप्तेः। न हि धूमे सकलवह्निसा
४ कारणाभासिद्धेः॥ सौगतास्तु केवलान्वयिनि साध्यवदन्यदलीकमेव। अनन्यख्यातिसिद्धम् ४

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मानाधिकरणयव्याप्ति। अयःपिंडीयवह्नेर्धूमसामानाधिकरण्याभावात्। नद्वितीयः। एकव्यक्तिहेतावव्याप्तेः। ना
पित्ततीयः। एकव्यक्तिमात्रवृत्तिहेतावव्याप्तेः। अत्रोच्यते॰। साध्यसमानाधिकरणस्वसमानाधिकरण
यावत्कत्वं व्याप्तिः। यत्समानाधिकरणयावन्तो [illegible] समानाधिकरणास्तत्त्वं व्याप्तिरितियावत्। भव
तिचधूमसमानाधिकरणयावन्तोवह्निसमानाधिकरणा इति धूमेवह्निव्याप्तिः नतुवह्नौधूमस्यन
हिवह्निसमानाधिकरणयावन्तोधूमसमानाधिकरणाः अयःपिण्डत्वस्यवह्निसमानाधिकर
णस्यधूमासमानाधिकरणत्वात् यद्वाद्विष्टसमानाधिकरणयावन्तःसाध्यसमानाधिकरणास्तत्त्वं
वत्त्वंवा॰ भवतिचधूमत्वविशिष्टसमानाधिकरणयावन्तोवह्निसमानाधिकरणास्तद्वत्त्वंचधू
मे। नचद्दशांधूमंप्रतिवह्नित्वंनातोवह्नौधूमव्याप्तिः॥ अस्तिचेदंकेवलान्वयिनि॰ अभिधेयत्वत्व
विशिष्टसमानाधिकरणानां यावतामेयत्वसमानाधिकरणत्वात्। एवंचलाघवत्साध्यवदन्या·

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वृत्तित्वे सति साध्यसमानाधिकरणत्वं व्याप्तिः। नचेयं केवलान्वयिन्यस्ति· अतो न्यैदमनुमानमिति मी
मांसकमतं परास्तम्· ततोप्यस्य लघुत्वात्। अत्र चार्वाकाः॥ भवत्वियं व्याप्तिः· न चेयं शक्यग्रहा किं
चिद्धूमसमानाधिकरणं वह्न्यसमानाधिकरणं भविष्यतीति शंकाया दुर्वारत्वात्· नचेदृशशंका
यां व्याप्तिनिश्चयो भवितुमर्हति· तस्यास्तत्प्रतिबंधकत्वात्। नच भूयोदर्शनात्तन्निवृत्तिः। शतशः स
हचरितयोरपि व्यभिचारोपलब्धेः॥ नच तर्कात्तन्निवृत्तिः। तर्कस्य व्याप्तिग्रहमूलकत्वेनानवस्था
नात्। इत्थं च व्याप्तिग्राहकाभावात् व्याप्तेरग्रहे कुतोनुमानं स्यादिति। अत्रोच्यते· व्यभिचारज्ञान
विरहादिकमेव व्याप्तिग्राहकं· नच तच्छंकाविरहो दुःशकः। क्वचित्तर्कात् क्वचित्तन्मूलभूतव्याघा
तेः कोटिस्मरणाद्यभावादपि तन्निवृत्तेः। नहि सर्वदा व्यभिचारशंकाकोटिस्मृतिर्वाऽस्ति अनुभूयते
चेति दिक्· ननु सेयं व्याप्तिर्दृष्टांते तद्वृत्तिधर्मे गृहीता· नच पक्षीयेपि· तथा च कथं तदनुमितिः। पक्षवृ

मंजरी· त्तिधूमे व्याप्तिग्रहस्यानुमितिहेतुत्वादिति चेत्· अत्राहुः। उक्ता व्याप्तिर्दृष्टान्तवृत्तिहेतौ धूमत्वेन गृहीता प
१२ र्वते धूमं दृष्ट्वा स्मर्यते ततो विशेषणाज्ञानरूपात्तस्मादसति बाधे व्याप्तिविशिष्टत्वेन पक्षवृत्तिधर्मधूम·
ज्ञानं जायते· यद्वा दृष्टान्ते व्याप्तिज्ञानं जायमानं धूमत्वरूपसामान्यलक्षणाप्रत्यासत्त्या सकलधूमगो
चरमेव जायते इत्यदोषः। ननु सामान्यं यदि प्रत्यासत्तिस्तदाश्रयसाक्षात्कारजननी तदा निमीलित
नयनस्यापि धूमत्वेन सकलधूमसाक्षात्कारः स्यादिति चेन्न। यत्सामान्यं प्रत्यासत्तिस्तत्प्रकार
कतदाश्रयलौकिकसाक्षात्कारे जनकसामग्र्या अपि सामान्यप्रत्यासत्तौ सहकारित्वात्। ननु
व्याप्तिज्ञानस्यानुमितिहेतुत्वे यत्र धूमो वह्निव्याप्य इति ज्ञानं तत्रानुमितिः स्यात्। न च पक्षवृत्ति
धूमे व्याप्तिज्ञानं कारणं तच्चात्र नास्तीति वाच्यम्॥ धूमो वह्निव्याप्यो द्रव्यं पर्वतवृत्तीति ज्ञानादपि रामः
अनुमित्यापत्तेः। द्रव्यत्वेन रूपेण पर्वते धूमज्ञानस्य सत्वात्। उच्यते॰ व्याप्यत्वप्रकारेण पक्षे हेतुनि १२

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्चयोनुमितौहेतुः।ननुव्याप्तिज्ञानमात्रम्।नचधूमोवह्निव्याप्योऽयंपर्वतवृत्तीतिज्ञानंव्याप्यत्वेनप
र्वतेधूममवगाहतेयेनततोनुमितिःस्यात्।पर्वतोवह्निव्याप्यधूमवान्नवेतिसंशयादनुमितेर्माभू
दितिनिश्चयपदम्।मीमांसकास्तुव्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानंव्याप्तिज्ञानसहका
रि॰व्याप्यतावच्छेदकंचधूमत्वंतद्रूपेणाव्याप्तिग्रहात्।नतुऽयंत्वेनातोऽयंपर्वतवृत्तीतिज्ञानाद
नुमितिः।एवंचधूमोवह्निव्याप्योधूमवान्पर्वतइतिज्ञानद्वयादप्यनुमितिरित्याहुस्तन्न॰व्याप्यत्व
प्रकारकपक्षधर्मत्वज्ञानहेतुतायांलाघवात्॥किंचैवंवह्निव्याप्यवानितिज्ञानादनुमितिर्नस्या
त्।धूमत्वेनपक्षधर्मतानवगाहनात्।तस्माद्वह्निव्याप्यवानित्येवंरूपाव्याप्तिविशिष्टपक्षधर्मता
ज्ञानात्तृतीयलिंगपरामर्शत्वेनप्रसिद्धादेवानुमितिः।तृतीयत्वंकथमितिचेत्॰प्रथमंदृष्टान्ते
धूमज्ञानंततोव्याप्तिज्ञानं ततस्तद्विशिष्टपक्षधर्मताज्ञानमित्येवंरूपपरामर्शः।तृतीयत्वंप्रायिक

पि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मित्युक्तं न तु तेन रूपेण हेतुत्वं गौरवात् । व्यभिचाराच्चेति सिद्धं । सोयं परामर्शो नानुमितिकरणं व्यापाराभा
वात् । नापि परामृष्यमाणं लिंगं परामर्शव्यापारकं भूतभाविभ्यां लिंगाभ्यामनुमित्युदयापत्तेः
अनन्यथासिद्धनियतपूर्ववृत्तित्वं हि कारणम् । किंतु व्याप्तिज्ञानं साध्यज्ञानं लिंगज्ञानं जन्यज्ञानमा
त्रं वा परामर्शव्यापारकम् । न चातिप्रसंगः । व्यापारेणातन्निरासात् । ज्ञानपदं सविषयकमा
त्रपरम् । नातः स्मरणात्मकपरामर्शस्थले व्यभिचारः ॥ तत्र व्याप्तिविषयकसंस्कारस्य परामर्
र्शव्यापारकस्य सत्वात् । पूर्वानुभवस्यैव वा तत्र करणमिति निष्कर्षः । तच्चानुमानं त्रिविधम् । केव
लान्वयि केवलव्यतिरेक्यन्वयव्यतिरेकिभेदात् । तत्र केवलान्वयिसाध्यकमनुमानं केवला
न्वयि । तत्र यो धर्मः सर्वत्र वर्त्तते स केवलान्वयी । यथा अभिधेयत्वप्रमेयत्वज्ञेयत्वादि । अ
भिधेयत्वं न भगवदिच्छारूपशब्दशक्तिविषयत्वं तच्च सर्वत्रैव वर्त्तते । सर्वस्यैव भगवदिच्छा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयत्वात् । व्यपदेश्यत्वाच्च । एवं ज्ञेयत्वं ज्ञानविषयत्वं तच्च सर्वत्रैवास्ति सर्वस्यैव ज्ञानविषयत्वात् ।
एवं प्रमेयत्वं प्रमाविषयत्वं तच्च सर्वत्रैव वर्त्तते सर्वस्यैव भगवत्प्रमाविषयत्वात् । अत्र केचित् । यत्र
साध्यनिश्चयोस्ति तत्रानुमितेरनुपत्तेः । पक्षता अनुमितेरंगं साध्यवत्त्वेन संदिह्यमानत्वं तत्त्वं । नच प्रमे
यत्वेन संशयो भवितुमर्हति । व्यतिरेककोटेरप्रसिद्धेः । अतः कथमिदमनुमानमिति तन्न । सिषाध
यिषाविरहविशिष्टसाध्यनिश्चयाभावो हि पक्षता सा चेहाप्यस्ति न तु संशयः । संशयं विनाप्यनुमिते
रुद्भविकत्वात् । साध्यनिश्चये सत्यप्यनुमित्सायां सत्यामनुमितेरुपत्तेस्तत्र पक्षतासंपत्तये विशिष्टा
न्तं । तत्र सिषाधयिषासहितसाध्यनिश्चयोस्ति न तु तद्विरहसहित इति संक्षेपः । असत्पक्षः केवलव्य
तिरेकि । तत्त्वं च पक्षातिरिक्ते निश्चितसाध्यसाधनसहकारकत्वं । तथाहि । पृथिवी इतरेभ्यो भि
द्यते पृथिवीत्वात् । यन्नेतरेभ्यो भिद्यते तन्न पृथिवी । यथा जलं । नत्वियं पृथिवी तथा तस्मादितरेभ्यो भि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

घतइति व्यतिरेकिणमुदाहरंति। नच पक्षातिरिक्ते जलादौ साध्यसाधनयोः साहचर्यमस्ति निश्चियते
वा॰ नचानिश्चितसाध्यकत्वमेव सपक्षत्वमेव सपक्षत्वं। घटादौ साध्यस्येतरभेदस्य प्रत्यक्षत एव निश्चितत्वात्॥
अन्यथा साध्याप्रसिद्धौ तद्घटितव्याप्तिनिरूपणानापत्तेः। नच घटे साध्यनिश्चये तस्य कथं पक्षत्व
मिति वाच्यम्। पृथिवीत्वावच्छेदेन साध्यनिश्चयस्यैव तदवच्छेदेन पक्षताविरोधित्वात्। नचेह
सोस्ति॰ सर्वत्र पृथिव्यां तन्निश्चयाभावात्॰। अत्र व्यतिरेकिसहचाराद्व्याप्तिर्गृह्यत इति प्राञ्चः।
साध्याभावहेत्वभावयोर्व्याप्तिग्रहादनुमितिः। नचान्यव्याप्तिग्रहात्कथमन्यानुमितिरिति प्रसंगा
दिति वाच्यम्। साध्याभावव्यापकाभावप्रतियोगित्वस्य पक्षधर्मतानिश्चयः साध्यानुमापक इत्य
भ्युपगमात्॰। उभयोरन्वयव्यतिरेकि। यथाऽप्रसिद्धानुमानमिति संक्षेपः। एवं हेतावभिहिते त
दाभासान्निरूप्यन्ते॰। तत्र सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पञ्च हेत्वाभासाः। सव्यभि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वारस्त्रिविधः। साधारणोऽसाधारणोऽनुपसंहारी। तत्र साधारणत्वं साध्यवदन्यवृत्तित्वम्। यथा धूमवान्
वह्नेरित्यत्र धूमवदन्यस्मिन्नयःपिण्डे वह्नेः सत्वात्। साध्यासमानाधिकरणासमानाधिकरणत्वं वा।
भवति हि धूमसमानाधिकरणं यद्धूमवदन्यत्वं तत्समानाधिकरणो वह्निः। साध्यव्यापकीभूताभाव
प्रतियोगित्वमसाधारणत्वम्। इदमेव सपक्षव्यावृत्तत्वं गायन्ति। शब्दो नित्यः शब्दत्वादिति शब्द
त्वं नित्यत्वव्यापको यः शब्दत्वाभावस्तत्प्रतियोगि। न चानित्यः शब्दः शब्दत्वादित्यत्राव्याप्तिः तस्य
सद्धेतुत्वात्। एतज्ज्ञानं चानुमितौ साक्षात्प्रतिबंधकं व्यतिरेकिसत्प्रतिपक्षरूपत्वात्। न चैवं स
त्प्रतिपक्षत्वमिति वाच्यम्। हेतुभेदस्यैव तस्यांगीकारात्। कथमस्य व्यतिरेकिसत्प्रतिपक्षतेति चे
दाकलय। शब्दत्वं नान्वयी हेतुः क्वचिदपि नित्ये शब्दत्वस्यादृष्टेः किन्तु व्यतिरेकी। तथा च नित्यत्वा
भावव्यापकीभूताभावप्रतियोगितया यथा साध्यं साधयेत् तथानित्यत्वव्यापकीभूताभावप्रति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मंजरी· योगितयासाध्याभावमपिसाधयेत् । नचद्वयोर्विरुद्धयोरेकत्रनिर्णयः । किंतु परस्पर प्रतिबन्धकत्वाद्द्वयो
१६ रेवानिर्णयइतिध्येयम् । अव्याप्तिसाध्यंहेत्वन्यतरत्वम् । अव्याप्तिसाधकत्वंवाअनुपसंहारित्वम् । यथा
आकाशवान्धूमात्दिक्स्त्वादेः । साध्यासमानाधिकरणत्वंविरुद्धत्वम् । यथागोरश्वत्वादि
त्यादौ ॥ यद्यप्यत्रासाधारणत्वमेवाप्ति साधारणत्वंचतथाप्युपाधिभेदाद्भेदः । पक्षेसाध्याभावप्रति
बन्धकः परामर्शः सत्प्रतिपक्षः । यथाजलंउष्णंस्पर्शवत्वात् । नेदमुष्णंतेजस्त्वादिति । असिद्धि
स्तुव्यभिचाराद्यन्यपरामर्शप्रतिबंधकतावच्छेदकधर्मवत्वम् । साचत्रिविधा ॥ स्वरूपासिद्धि
राश्रयासिद्धिर्व्याप्यत्वासिद्धिश्च॰ पक्षेहेत्वभावः स्वरूपासिद्धिः । यथाघटः पृथिवीपटत्वादि ताम
त्यत्रघटरूपपक्षेहेत्वभावः । पक्षेपक्षतावच्छेदकासिद्धिराश्रयासिद्धिः । गगनकमलंसुरभि १६

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अरविन्दत्वादित्यत्र पक्षेगगनेऽयत्वाभावः।एतदुभयाभिन्नासिद्धिर्व्याप्यत्वासिद्धिः।धूलीपटलेधूमनिश्चयाप्यत्वाः
भावः।साध्याप्रसिद्धिर्हेत्वप्रसिद्धिर्वा।पक्षेसाध्यशून्यत्वंभावः।यथाजलादिपक्षेवह्न्यभावः।नचात्रधूमस्यहेतोः
रसिद्धिर्व्याप्तिसएवदोषोस्मिन्निश्चितवाधेनेतिवाच्यम्।असिद्धिर्हिपरामर्शप्रतिबंधकतयादोषः।तथाचय
त्रभमात्मकःपरामर्शोजातस्तत्रवाधस्यतदनुमितेरनुत्पत्तेर्वाधस्यानुमितिप्रतिबंधकतयादोषत्वात्।आ
द्यकालावछिन्नोघटोरूपवान्पृथिवीत्वादित्यत्रआद्यकालावच्छेदेनघटेरूपाभावरूपवाधस्थलेदो
षान्तराभावाच्च।नहिपृथिवीत्वेरूपाव्याप्तिःपक्षावृत्तितावेतिदिक्॥ननुउपाधिरपिहेत्वाभासान्तरंसं
भवतीतिकथमेतएवेतिचेत्।सव्यभिचारएवान्यतमत्वंहेत्वाभासत्वम्।नचोपाधिस्तदन्यतमइति॥
तस्यनैवंभूतत्वात्।अतएवासिद्धसाधारणामपिनहेत्वाभासान्तरम्।ननुकोयमुपाधिः।तत्राचार्याः॥
साध्यव्यापकत्वेसतिसाधनाव्यापकउपाधिः।तद्व्यापकत्वंच।तत्समानाधिकरणायावन्तोयत्समाना:

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मंजरी
७

धिकरणात्वं। यथा धूमवान् वह्नेरित्यादौ आर्द्रेन्धनं। भवति तत्साध्यव्यापकम्। धूमसमानाधिकरणस्य यावतः
स्तत्समाधिकरत्वात्। भवति च साधनाव्यापकं वह्निमत्ययःपिण्डे तदसत्वात्। संकेतौ तु नैवम्। तत्र हेतोः सा
ध्यव्याप्यत्वात्। साध्यव्याप्यव्यापकस्य साध्याव्यापकत्वात्। अत्र वदन्ति। इदं साधनावच्छिन्नसाध्य
व्यापके अव्याप्तम्। यथा काकः श्यामो मित्रातनयत्वादित्यत्र शाकपाकजत्वमुपाधिः। नहि तत् श्यामत्व
व्यापकं श्यामत्ववति घटे असत्वात्। किन्तु मित्रातनयत्वावच्छिन्नश्यामत्वव्यापकम्। यत्र यत्र मित्रा
तनयत्वावच्छिन्नं श्यामत्वं तत्र तत्र शाकपाकजत्वस्य सत्वात्। अथ साधनावच्छिन्नसाध्यव्यापकत्वे स
ति साधनाव्यापकत्वमुपाधित्वं विवक्षितमिति चेन्न। वायुः प्रत्यक्षः प्रमेयत्वादित्यादौ पक्षधर्मवहिर्द्रव्य
त्वावच्छिन्नसाध्यव्यापकत्वरूपत्वादावुपाधावव्याप्तेः। नहि प्रमेयत्वरूपसाधनावच्छिन्नसाध्यव्या
पकं तत्। आत्मादावसत्वात्। किन्तु वहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वव्यापकम्। यावन्ति तद्वन्ति घ

रामः
७

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यादौरूपसत्वात्। अथपक्षधर्मावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधित्वं विवक्षितमि
तिचेन्न। यथोक्तस्थले शाकपाकजत्वे अव्याप्तेः। नहि तत्पक्षधर्मतावच्छिन्नश्यामत्वव्यापकं। तथा
विधश्यामत्वव्यापकं। तथाविधश्यामत्ववति पक्षेऽसत्वात्। अथ यत्किंचिद्धर्मावच्छिन्नसाध्यव्याप
कं विवक्षितं स च धर्मः क्वचित्साधनं क्वचित्पक्षधर्मश्चेतिचेन्न। पर्वतो वह्निमान्धूमादित्यत्र महा
नसत्वाभावस्याप्युपाधितापत्तेः। भवति हि महानससामान्यरूपयत्किंचिद्धर्मावच्छिन्नवह्निव्यापको
महानसत्वाभावो यावन्नाहृशवह्निमति सत्वात्। न च धूमव्यापको धूमवति महानसेऽसत्वात्
।अत्रोच्यते। स्वानधिकरणसाधनाधिकरणवृत्तिधर्मावच्छिन्नसाध्यव्यापकत्वमुपाधित्वम्। ए
वास्वावच्छिन्नानधिकरणसाधनाधिकरणवृत्तिधर्मावच्छिन्नसाध्यव्यापकतावच्छेदकधर्मवत्वं
तत्। तच्च स्वावच्छिन्नानधिकरणहेतुसमानिष्ठयत्किंचिद्धर्मावच्छिन्नसाध्यसमानाधिकरणयाव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्तोधर्मा यद्धर्मावच्छिन्नसमानाधिकरणास्तद्वत्वम्। भवति हि आर्द्रेधनत्वावच्छिन्नानधिकरणावह्नि
मत्विष्ठद्रव्यत्वावच्छिन्नधूमानधिकरणनिष्ठायावन्तोधर्मा आर्द्रेधनत्वावच्छिन्नसमानाधिकर
णाः। अतस्तद्वदार्द्रेन्धनमुपाधिः। एवं रूपवत्वावच्छिन्नानधिकरणप्रत्यक्षस्पर्शाश्रयत्ववन्निष्ठव
हिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वाधिकरणं यत्तन्निष्ठायावन्तोधर्माः रूपत्वावच्छिन्नसमानाधिकर
णाः। अतो रूपवत्वमुपाधिः॥ एवं शाकपाकजत्वत्वावच्छिन्नानधिकरणमित्रातनयत्ववन्निष्ठ
मित्रातनयत्वावच्छिन्नश्यामत्वाधिकरणं यत्तन्निष्ठयावन्तोधर्माः शाकपाकजत्वत्वावच्छिन्नस॰
मानाधिकरणाः। अतः शाकपाकजत्वमुपाधिः। न चैवं मञ्जेताः संभवति। न हि मानसत्वाभावत्वा
वच्छिन्नानधिकरणं यज्ञत्वाधिकरणं महानसं तन्निष्ठधर्मावच्छिन्नाधिकरणं महानसादितन्नि
ष्ठायावन्तोधर्मा महानसत्वाभावत्वावच्छिन्नसमानाधिकरणाः महानसत्वएवाभावात्। अतएवस

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनु॰ मं॰ ढ्तीपक्षेतरत्वेनोपाधिः। पक्षमात्रवृत्तिर्धर्मेण तत्सामानाधिकरण्याभावादिति संक्षेपः। तच्चानुमानं परार्थं न्या
१९ यपूर्वकं। न्यायश्चात्रकमिकप्रतिज्ञादिपंचकसमुदायः। यथा पर्वतो वह्निमान्धूमात् योयोधूमवान्सो
ऽग्निमान् यथा महानसं वह्निव्याप्यधूमवानयं। तस्माद्वह्निमानिति। तत्रैतन्न्यायघटकपर्वतोवह्नि
मानितिशब्दवृत्त्यवयवविभाजकोपाधिमत्वं प्रतिज्ञात्वम्। एतद्धूमादितिशब्दवृत्तितादृशोपाधिमत्वं हे
तुत्वम्। एतद्योयोधूमवान्सोऽग्निमानितिशब्दवृत्तितादृशोपाधिमत्वं उदाहरणत्वम्। एतद्वह्नि
व्याप्यधूमवानयमितिशब्दवृत्तितादृशोपाधिमत्वमुपनयत्वम्। एतस्माद्वह्निमानितिशब्दवृत्ति
तादृशोपाधिमत्वं निगमनत्वम्। अवयवत्वं च प्रतिज्ञाद्यन्यतमत्वम्। उक्तं च। अवयवाः पंच प्र
तिज्ञादिभेदादिति॥ ॥इति श्रीभट्टाचार्यचूडामणिविरचितायां सिद्धांतमञ्जर्यामनुमानप रामः
रिच्छेदः॥ ॥शुभमस्तु॥ ॥व्योमाब्धिग्रहभूम्येब्दे ऽगांतिथौ धरासूनुवासरे लिखित्वा शुभं॥ १९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न्यायसिद्धान्तमञ्जरी टिका ता ४ प्रकाशिका

४०१६

न्यायसिद्धान्तमञ्जरी

Nyayasi

श्री ५ को सरकार

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नि. मु. १

श्री: ॥ अथ शाब्दो निरूप्यते ॥ ननु शाब्दप्रमितिकरणं शाब्दः । शाब्दत्वं च शब्दात्प्रत्येमीत्यनुभवसिद्धो जातिवि
शेषः । जन्यपदज्ञानजन्यत्वव्यभिचार्यनुभवत्वाव्यापकजातिशून्यत्वे सति पदविषयकत्वाव्यभिचारिजातिशू
न्यधीत्वं वा । प्रत्यक्षानुमितिस्मृतीनां वारणाय सत्यन्तं । न च तादृशीनां प्रत्यक्षत्वादिजातीनां सत्वात् जातिशून्यत्वं
अनुभवत्वाव्यापकजातिशून्यत्वं चासंभवीति अनुभवत्वादीनां तद्व्यापकशाब्दत्वस्य च सत्वात् । जन्यपदज्ञान
जन्यत्वव्यभिचारिजातिशून्यत्वं तथा तादृगनुभवत्वादीनां सत्वात् । पदधीजन्यत्वव्यभिचारिअनुभवत्वाव्यापक
जातिशून्यत्वं चानुमितावपि । अनुमितित्वस्य भगवत्पदधीजन्यत्वाव्यभिचारित्वात् । अतः समुदितमुपात्तं उ
पमितावतिव्याप्तिवारणाय शून्यान्तं जात्यादावतिव्याप्तिवारणाय धीपदं । सोयं शाब्दः सकलजनानुभवसि
द्धो दुरपह्नवः । नञ्ज नकुत्वमपि तथा । आगोपालाङ्गनं नेमात्वपरिगृहीतं चैत्रवाक्यादमुमर्थं प्रत्येमीति प्रतीतेर्जा
गरूकत्वात् । न च शाब्दो न प्रमाणमिति वाच्यम् । एतद्वाक्यस्य शाब्दात्मकत्वेन प्रामाण्ये आगतं शाब्दस्य प्रा

शम: १

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

माणं· अप्रामाण्येच गतं शाब्दस्याप्रामाण्यं· केवलमनुमानविधया ऽन्यथा वेति विप्रतिपद्यन्ते· तत्रानुमानविध
येति वैशेषिकाद्यः· नैयायिकास्तु पृथगेव शब्दो मानं नत्वनुमानविधया शब्दस्यार्थाव्याप्यत्वात्· नहि यत्र
शब्दस्तत्र घटानयनादिरूपोर्थः· शब्दस्याकाशवृत्तित्वात् घटादेश्च तद्वृत्तित्वात्· दृश्यते च व्याप्तिग्रहविधु
+ राणामपि शाब्दान्वयानुभवः· नचायमनुमितिरूपः तस्या व्याप्तिधीजन्यत्वात् प्रतियन्ति च नौ किका अन
नुमितिं असाक्षात्कृतं श्रुतमिदं नैयायिकेभ्य इति· अलं विस्तरेण· ननु यदि स्वातंत्र्येण शब्दो मानं तदा घट
मानयेत्यतः पामराणामप्यर्थप्रत्ययः स्यादितिचेन्न· शक्तिग्रहस्यापि सहकारित्वात्· पामराणां च घटादिश
ब्दे शक्तेरनवग्रहात्· अथ केयं शक्तिः अभिधा नाम पदार्थान्तरं संकेतग्राह्यमिति मीमांसकाः· नैया
यिकास्तु आवश्यकत्वात् संकेत एवाभिधा नतु पदार्थान्तरं मानाभावात्· स च संकेतोऽस्मादयमर्थो बोद्धव्य
इत्याकारिकेच्छा· हैनैवं पामरादिसंकेतिता अपि शब्दाः अभिधायकाः स्युरितिचेन्न· नहि संकेतमात्रमभि

...al Sanskrit University, Balmeeki Campus...

सि.म. धा किन्त्वीश्वरसंकेतः नचापभाषितेसोऽस्ति मानाभावात् कथंतर्हि ततोऽन्वयबोध इति चेत् शक्तिभ्रमादिति गृहाण
२ कथंतर्हि पामरादीनामीश्वरमविदुषां मीमांसकानां चार्थप्रत्ययः शब्दादिति चेत् उच्यते नतावदीश्वरसंकेतत्वे
ननग्रहः कारणं किंतु संकेतत्वेन अस्ति च तेषामपि तत्वेन ज्ञानं आधुनिकसंकेतितानां चैत्रादीनां शब्दानां का गति
रिति चेत् द्वादशेऽहनि पिता नाम कुर्यादिति सामान्यतस्तस्येश्वरसंकेतितत्वादिति गृहाण स्यादेतत् सोऽयं सं
केतः कथं ग्राह्यः उपमानादिति चेत् न तस्य वाक्यार्थज्ञानमूलकत्वात् तस्य च शक्तिग्रहमूलकत्वात् उच्यते
प्रथमतः शक्तिग्रहो व्यवहारात् तथाहि घटमानयेति केनचिद्वृद्धेः कश्चन तदर्थं प्रतीत्य घटमानयति
तच्चोपलभमानो बालस्तया क्रियया तस्य प्रयत्नमनुमिनोति तेन च घटानयनगोचरप्रयत्नेन तस्य
ज्ञानमनुमिनोति स्वप्रयत्ने तेन तथा निश्चयात् ततस्तद्धेत्वाकांक्षायामुपस्थितत्वाच्छब्दमेव कल्प
यति तदनन्तरं घटादिपदानां प्रत्येकमावापोद्वापाभ्यां घटपदं घटधीजनकमिति कल्पयति क्लृप्ते) राम:
२

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मपिशब्दादन्वयाभवः ॥ न चायमनुमितिरूपस्तस्या व्याप्तिधीजन्यत्वात्· प्रतियंति च लौकिकाः ॥ अननुमितमसाक्षात्कृतं श्रु
तमिदन्नैयायिकेभ्य इत्यलं विस्तरेण ॥ ननु यदि स्यात्तन्नो गौ व शब्दो मानं तदा पामराणामप्यर्थप्रत्ययः स्यादिति चेन्न शा
क्तिग्रहस्यापि सहकारिकारणत्वात्· पामराणां घटादिशब्दे शक्तिग्रहाभावात्· अथ केयं शक्तिः ॥ अभिधानामपदार्था
न्तरं संकेतयाख्यमिति वदन्ति मीमांसकाः ॥ नैयायिकास्तु आवश्यकत्वात्संकेत एवाभिधा न तु पदार्थान्तरम्· मानाभावा
त्· स च संकेतो स्मात्पदादयमर्थो बोद्धव्य इत्याकारिकेच्छा· एवं तेषां पामरादिसंकेतिता अपि शब्दा अभिधायकाः स्युरिति
ति॰ चेन्न· नहि संकेतमात्रमभिधा· किन्त्वीश्वरसंकेतः· न चापभाषिते सास्ति मानाभावात्· कथन्तर्हि ततोन्वयबोध इति
चेत्· शक्तिभ्रमादिग्रहणात्· कथं तर्हि पामरादीनामीश्वरमविदुषां मीमांसकानां चार्थप्रत्ययः शब्दादिति चेदुच्यते· न
तावदीश्वरसंकेतत्वेन न ज्ञ हेतुः कारणं किंतु संकेतत्वेन· अस्ति च तेषामपि तत्त्वेन ज्ञानं· आधुनिकसंकेतितानां चैत्रा
दिशब्दानां का गतिरिति चेदेकादशेऽहनि पिता नाम कुर्यादिति सामान्यतस्तस्येश्वरसंकेतितत्वादिति गृहाण· स्यादे
तत्· सोयं संकेतः कथं ग्राह्यः उपमानादिति चेन्न· तस्य वाक्यार्थज्ञानमूलकत्वात्· तस्य शक्तिग्रहमूलकत्वात् ॥ उच्य

गां ३

Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सि·मं·
२

तेप्रथमतःशक्तिग्रहोव्यवहारात्·तथाहिघटमानयेतिकेनचिदुक्तःकश्चनतदर्थंप्रतीत्यघटमानयति·तच्चोपलभमानोबा
लस्तयाक्रिययातस्यप्रयत्नमनुमिनोति·तेनचघटनयनगोचरप्रयत्नेनतस्यज्ञानमनुमिनोति·सचप्रयत्नोननथानि
श्चयात्·ततस्तदिच्छाकांक्षायामुपस्थितत्वात्तदेवकल्पयति·तदनंतरंघटादिपदानांप्रत्येकमावापोद्वापाभ्यांघ
टपदंघटार्थजनकमितिकल्पयति·कॢप्तेतस्मिन्नतिप्रसंगभंगायतज्ज्ञानानुकूलंसंकेतरूपंसंबंधंकल्पयतीतिकि
मनुपपन्नम्·तदनंतरंचक्वचित्व्यवहारात्क्वचिदुपमानात्क्वचिद्वृद्धात्क्वचिद्व्याकरणात्क्वचित्कोशादितिगृह्
णा·स्यादेतत्·वयोर्व्यवहारंपश्यतासंकेतोग्राह्यस्तयोरेवकथंसंकेतग्रहः·अन्ययोर्व्यवहारादितिचेन्न·अनवं
स्थापत्तेरनादित्वादियमिष्टैवेतिचेन्न·सर्गादौतदभावात्·प्रलयेमानाभावात्सर्गादिरेवासिद्धइतिचेत्कार्यं
द्रव्यानधिकरणकार्याधिकरणकालस्याखंडप्रलयतयाप्रसिद्धस्यागमसिद्धत्वात्·उच्यते·सर्गादौभगवानी राम
श्वरस्त्रशरीरद्वयंपरिगृह्यतथाव्यवहरति·ततस्तद्व्यवहारात्पूर्ववत्संकेतंगृह्णातीतिकिमनुपपन्नम्·ईश्वरएवकिं २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नी

मानमिति चेत् स्वर्गादौ व्यवहारानुपपत्तिरेव· ननु पूर्वसर्गसिद्ध सर्वज्ञसत्त्वादय एव व्यवहारहेतवः सन्तु इति चेन्न· प्रतिसर्गं
भूयसां तथा कल्पनायां गौरवात्· अस्त्वेकस्सर्वत्र मूलमिति चेत् स एवास्माकमीश्वर इति दिक्· स्यादेतत्· यदि
शक्तिग्रहः सहकारी तदा घटशब्दात् पटप्रतीतिः किन्न स्यादस्ति च तस्य शक्तिग्रहो घटे· अथ यः शब्दो यत्र गृहीत
शक्तिकस्स तदर्थं प्रत्याययतीति चेत् तर्हि कारणं गौरस्तीति वाक्याद् देशान्तरस्थगोः प्रत्ययो न स्यात्· नहि तस्य काशी
स्थायां गवि शक्तिग्रहोस्ति तस्या एव प्रतेः· अत्र मीमांसकाः गवादिपदानां गोत्वस्यैव शक्तिः कथं तर्हि व्यक्तिलाभ इति
चेदाक्षेपादित्याहुः· ननु कोयमाक्षेपः तस्यार्थापत्तिरेवाक्षेपः· गोत्वं हि स्वाश्रयं विनानुपपन्नम्· तमाक्षिपतीति भ
वः· तन्न· अनुपपत्तिज्ञानमन्तरेणापि गौरस्तीति गोत्वविशिष्टव्यक्तिप्रतीतेः· तस्मात् समानवित्तिवेद्यत्वमाक्षेप
इति गुरवः· यावती हि जातिधीर्व्यक्तिविषयीकरोतीति व्यक्तेर्लाभः· इदमेव कथमिति चेत् जातिभासकसामग्र्या एव
तद्बोधकत्वादिति गृहाण· यद्वा जातिशक्तिरेव व्यक्तिं बोधयति न चान्यशक्त्यान्यबोधनेऽतिप्रसंगः· गोत्वशक्तं पदं गोः

सि.मं. त्वविशिष्टं बोधयतीत्यतिप्रसंगात्· अन्यथानुपपत्या तथैव कल्पनादिति· तदपरे न क्षमन्ते· तथा सति गोत्वमस्तीत्यतोऽपि गोत्व:
३ विशिष्टप्रत्ययापत्तेः तस्माद्गोत्वविशिष्ट एव शक्तिः नचोक्तदोषः गोत्वसामान्यलक्षणया सकलगोरूपस्थितौ सर्वत्रैव
गवि शक्तिग्रहसंभवात्· अननुगतैकत्रैव गवि शक्तिः नचान्यगोबोधापत्तिः अन्यशक्तिग्रहादन्यशक्तिबोधनेतिप्रसं
गइति वाच्यम्· गोत्वविशिष्टशक्तिग्रहो गोत्वविशिष्टप्रत्यायक इत्येव मननात् प्रसंगादिति संप्रदायविदः· गव्येव शक्ति
र्नतु गोत्वेऽपि गौरवात्· न चैवं गोत्वबोधानापत्तिः गोत्वावच्छेदेन शक्तिग्रहस्य गोत्वविशिष्टप्रत्यायकत्वादिति त:
तदागो: त्वं· स्यादेतत्· गोत्वविशिष्टे शक्तिः· अश्वत्वतो गोश्वत्वयोरभेदप्रत्ययो न स्यात्· स्यान्वयरूपस्याशक्यत्वात्· न:
च शब्दादशक्यमपि भासते ऽतिप्रसंगात्· उच्यते· गोशक्तं पदमेव गवान्वयं बोधयति· नचाशक्यबोधने घटमपि बो
धयेदिति वाच्यम्· गोसक्तं हि पदं गवान्वयबोधजनकम्· नतु घटो गवान्वयी येनातिप्रसंगः स्यात्· भट्टास्तु अन्व गम:
यविशिष्टे शक्तिग्रहादन्वयेऽपि शक्तिरित्याहुः तन्न· अन्वयस्यान्यलभ्यत्वात्· अनन्यलभ्यश्च शब्दार्थत्वात्· अ ३

मथालक्षणोच्छेदापत्तेः प्राभाकरास्तु कार्यान्विते पदानां शक्तिः तथाहि प्रयोजकवाक्यश्रवणानन्तरं प्रयोज्यस्य प्रवृ-
त्तिमुपलभमानो बालस्तत्प्रयोजकतया कार्यताविशिष्टज्ञानमनुमिनोति· स्वप्रवृत्तौ तेन कार्यत्वविशिष्टज्ञानस्यैव हे-
तुत्वावधारणात् तेन त्वाकांक्षायामुपस्थितत्वात् कृदमेव तथावधारयति· ततस्तन्निर्वाहिकां शक्तिं कार्यान्विते
शब्दत्वावच्छेदेन कल्पयति· तदनु चावापोद्वापाभ्यां घटे शक्तिं गृह्णानः प्रथमकल्पनानुरोधात्कार्यान्वित
घटादौ शक्तिं कल्पयति· ननु केवलघटादावाव्युत्पत्तिविरोधात्· इत्थं च कार्यतावाचकपदसमभिव्याहा
रो यत्र नास्ति तद्वाक्यमर्थवादरूपं मूकमेव व्यवहारस्तत्र स्वसंसर्गाग्रहात्· ननु सर्वेषां पदानां कार्यान्वितवा
चकत्वात् वाचकपदसमभिव्याहारो नास्तीत्यसंगतम्· असंगतं चार्थवादस्याप्रामाण्यमिति चेत्तत्रोच्य
ते· द्विविधा हि पदशक्तिः आनुभाविकी स्मारिका च· तत्रानुभाविकी कार्यान्विते· स्मारिका च जातौ· तथा
च घटादिपदात्कार्यत्वस्यानुपस्थितौ कथं तदन्वितबोधं जनयेत्· कार्यत्वान्वयबोधे तदुपस्थितेरपि हेतु

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सि.मं. त्वादितिनार्थवादस्य प्रामाण्यमिति चेन्न· आवापोद्वापाभ्यां लाघवाद्घटादिमात्र एव शक्तिग्रहो न तु कार्यत्वान्वये पि·
४ अनन्यलभ्यत्वात्· प्रथममनन्यलभ्यत्वेनालभ्यत्वेनोपस्थितमिति चेत्प्रथमं तर्हि कार्यत्वान्वये शक्तिग्रहो स्तु· यदा चतदुपस्थि
तं तदा घटमात्र एव शक्तिग्रहो स्तु सा बाध्यताम्· गौरवात्· अथैवं चरमप्रवृत्ता घटमात्रशक्तिकल्पना कथं प्रथम
प्रवृत्तां बलवतीं कार्यान्वितशक्तिकल्पनां बाधितुमिष्टे इति चेन्न· प्रथमकल्पनाया बलवत्त्वासिद्धेः· नहि प्रथमं प्र
वृत्तमेव बलवत्· चन्द्रतारकादिस्वल्पतायाः प्रथमं प्रतीतायाः शास्त्राज्जन्यमहत्त्वप्रतीत्या बाधानापत्तेः· चरमकल्प
नाया लाघवतया बलवत्त्वाच्च· किं चैवं काव्यादिष्वपि अनुभवसिद्धो न्वयानुभवो न स्यात्· न वा संसर्गाग्रहमात्रं·
तत्र न तु संसर्गानुभव इति वाच्यम्· घटमानयेत्यत्रापि तदापत्तेः· तथा च गतं शाब्दप्रामाण्यप्रत्याशयापि· किं
चैवमर्थवादरूपाणां श्रुतिस्मृतीतिहासपुराणादीनामप्रामाण्यं स्यात्· तथा चास्तु रूपहसितं मिश्रैः· प्रसिद्ध राम:
एव लोकेस्मिन्नुद्भवः प्रभाकर इति· तस्मादेवं वदन् कश्चित्प्रभाकरो वा गौव्यत्यासमलिपिमाहरणाभ्यां प्रमाः ४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कार इति गृहीतो लोकैरिति युक्तमुत्पश्यामः। ननु यदि शक्तिग्रहः सहकारी तदा गंगापदात्तीरप्रत्ययो न स्यादिति
चेन्न। शक्तिर्हि तत्वेन न प्रत्यायिका किन्तु ज्ञातत्वेन। अस्ति च गंगापदस्यापि तीरे वृत्तिर्लक्षणैव। अथ केयं लक्ष
णा नाम। शक्याच्छक्योपस्थितिर्लक्षणेत्येके तन्न। उपस्थितिहेतुर्हि वृत्तिर्ननु सैव। अस्तु केयं तात्पर्यं लक्षणे
त्यन्ये। तन्न अन्वयेपि तात्पर्यस्य लक्षणात्वापत्तेः। किंच तात्पर्यनिर्वाहिका वृत्तिर्ननु तदात्मिकैव शक्तेरपि तत्त्वा
पत्तेः। उच्यते। स्वशक्यसंबंधो लक्षणा। अस्ति हि गंगापदशक्यः प्रवाहविशेषरूपस्तत्संबन्धस्तीरे। सा च लक्ष
णा द्विविधा गौणी शुद्धा च। तत्र सादृश्यात्मकः शक्यसंबन्धः गौणी। यथा गौर्वाहीक इति। तदन्या शुद्धा। आद्यद्वितमि
ति। ननु यद्येतद्वयी कथन्तर्हि राजपुरुष इत्यादौ षष्ठ्यर्थलाभः। नहि राजपदं संबन्धशक्तं। अथ संबन्धोन्वयविध
या भासते नीलो घट इत्यत्राभेद इवेति चेन्न। राजा पुरुष इत्यत्रापि तदापत्तेः। अथ नामार्थयोरभेदेनैवान्वयो नत्व
न्यथा तथैव व्युत्पत्तेः। राज्ञः पुरुष इत्यत्र न नामार्थयोरन्वयः किन्तु विभक्त्यर्थनामार्थयोरिति चेत्तर्हि राजपुरुष इत्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि.सं. न्नकथन्नयोस्तथान्वयइतिस्वयमेवविभावनीयम्· अथैलक्षणैवेतिचेन्न· तथापिराजसंबधपुरुषइतिवदनन्वयःस्यादितित
५ दोषतादवस्थ्यात्· अथराजपुरुषात्मकसमुदायस्यराजसंबंधिपुरुषेलक्षणेतिचेत्· शक्तिविरहेलक्षणायाअयोगाः
त्कथंसंबन्धेलक्षणेत्युक्तम्· उच्यते· राजपदंराजसंबन्धिलक्षकंतथाचाभेदेनैवपदार्थद्वयान्वयः नचैवंकर्मधारयत्वाः
पत्तिःसमासपूर्वदशायांपदयोस्तुल्यार्थत्वाभावात्· अन्येतुलुप्तषष्ठ्यैवान्वयंबोधयतिषष्ठीलोपमजानतस्तुतत्रान्व
यबोधःशक्तिभ्रमात्· राजपदलक्षणायावेत्याहुः· वैयाकरणास्तु· समासस्थलेसमुदायस्यविशिष्टार्थेशक्तिरेव·नचै
वंराजपदशक्तिमविदुषोपिराजपुरुषपदादन्वयबोधःस्यादितिवाच्यम्· समस्तशक्तिग्रहोघनुशासनात्· नचा
वयवशक्त्यग्रहेनुसासनग्रहःसंभवतीतितच्छक्तिग्रहस्यसमुदायशक्तिग्रहेहेतुत्वादित्याहुस्तन्न· अवयवलः
क्षणायैवोपपत्तौसमुदायसक्तौमानाभावात्· नञर्थंजहत्स्वार्थात्तुतत्रैवकल्प्यंयत्नविरोधिनीति· तस्मादन्यथोप स.म:
पत्तौसमासेशक्तिरयुक्तेतिसंक्षेपः॥ भाष्येतुतत्पुरुषेशक्तिर्बहुव्रीहौतुचित्रगुपदेचित्रगोस्वामिनिशक्तिरावश्यकी॥ ५

नहि तत्र लक्षणया निर्वाहः तथाहि· किं गोपदं गोस्वामिलक्षकं चित्रपदं वा चित्रस्वामिलक्षकम् नाद्यः नहि चित्रस्यात्र गवान्वयः
संभवति· तस्य पदार्थैकदेशत्वात् अतस्तवनान्त्योपि· अथ गोपदं गोस्वामीलक्षकं चित्रपदं तात्पर्यग्राहकमिति चेन्न· चित्रपदं
चित्रगोस्वामिलक्षकं गोपदं तात्पर्यग्राहकमिति विनिगन्तुमशक्यत्वात्· तस्माद्विनिगमकाभावात्समुदायस्यैव शक्तिरि
ति केचित्· अत्रोच्यते विनिगमकाभावादस्तु पदद्वये लक्षणा न तु समुदाये शक्तिरन्यलभ्यत्वात्· मीमांसकास्तु· समुदा
यस्यैव लक्षणा· न च समुदायस्य शक्त्यभावाल्लक्षणानुपपत्तिः स्वबोध्यसंबन्धो हि लक्षणा· अस्ति च वाक्यस्यापि विशि
ष्टबोध्यम्· अन्यथा का गतिर्गभीरायान्नद्यां घोष इत्यादौ· नहि नदीपदं तीरलक्षकं गभीरायामित्यस्यानन्वयापत्तेः नहि ती
रं गभीरम्· नापि गभीरपदं तीरलक्षकम्· नद्यामित्यस्यानन्वयापत्तेः नहि तीरं नदी· तस्मादनन्यगतिकतया वाक्यमेव ग
भीरनदीतीरे लाक्षणिकमित्याहुः तत्रोच्यते· वाक्यं न विशिष्टार्थबोधकम्· तद्बोधकतावच्छेदकशक्तेरभावादतस्त
त्रबोध्यसंबन्धो लक्षणा॰ रिक्तं वचः· किं च ग भीरायान्नद्यामिति विभक्त्यन्तभागस्य नदीतीरे लक्षणा· तदाधारताप्रत्यया

ति

शि·सं·
६

नापत्तेः नापि गभीरायान्नदीति भागस्य· तस्याबोधकत्वात्· बोधकत्वे वा लक्षे विभक्त्यर्थानन्वयापत्तेः प्रत्ययानां प्रकृ-
त्यर्थगतस्वार्थबोधकत्वात्· नहि स भागः प्रकृतिर्येन तदर्थे विभक्त्यर्थान्वयः स्यात्· गभीरायामिति सप्तम्या नापत्ते-
श्च· अर्थविभक्त्यंतस्यैव गभीरनदीतीराधारलक्षकत्वमिति चेन्न· अशक्यत्वात्· तस्मात्पदद्वयेऽपि विनिगमकाभावा-
द्विशिष्टनदीतीरे लक्षणा न चैकपदवैयर्थ्यम्· परस्परतात्पर्यग्राहकत्वादिति संप्रदायः· अन्त्यपदस्यैव लक्षणा
विभक्त्यर्थान्वयानुरोधादिति तु नव्याः· विस्तरस्त्वस्माकं मणिमरीचिनिबन्धतात्पर्यदीपिकयोरनुसंधेयः उपकुंभ-
मर्धपिप्पलीत्यादावपि उत्तरपदलक्षणयैवोपपत्तौ न शक्तिः कल्प्यते· अन्यलभ्यत्वात्· समाहारद्वन्द्वे पाणिपाद-
मित्यादौ पाणिपादं प्राणिणाङ्गी तयोर्णिकं पादसमाहारं लक्षयति· ननु पाणिपादसमाहारे शक्तिः समाहारश्च
तुल्यवदेकक्रियाबोधितत्वरूपं साहित्यम्· सेनावनादिवदपेक्षाबुद्धिविशेषविषयत्वं वा नन्वेवं पाणिपादं वाद- राम·
येत्यत्रानन्वयः समाहारे वादनकर्मत्वाभावादिति चेन्न· परंपरया तत्र कर्मत्वान्वयादित्येके· समाहारोत्तरविभक्त्यः ६

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

थेकर्मत्वादेः समाहृयमानं एवान्वयः पदद्वयमित्रैवैचित्र्यादित्यर्थे· पाणिपादं वादयेत्यत्र पाणिपादमात्रप्रतीतेर्न समा
हारे लक्षणा शक्तिर्वा· न चैवं द्विवचनापत्तिः असाधुत्वात्· समाहारसंज्ञा तु नदीकूलादिवत्पारिभाषिकी वेति तत्त्वम्· इ
तरेतरद्वन्द्वे धवखदिरादाविति स्वरूपद्वयप्रतीतेर्न लक्षणा शक्तिर्वा· मीमांसकास्तु· अत्रापि धवखदिरसाहित्याश्र
ये लक्षणा तत्साहुः साहित्ये द्विवचनबहुवचने द्वन्द्वसमासो वेति· साहित्यं च तुल्यवदेकक्रियान्वयित्वमत एव य
कर्त्रैव तदनया सह इत्यत्र पत्न्या सहभावमात्रम्· न तु साहित्यम्· यागादौ पत्न्या अनुमतिद्वारा अन्वयेन तुल्यव
दनन्वयादित्याहुः· नीलोत्पलमित्यादौ नीलाभेदस्यान्वयविधयैव भानोपपत्तेः कर्मधारये न शक्तिर्न वा लक्षणा
अत एव तत्पुरुषात्कर्मधारयो लघीयान्· तत्राहि पूर्वपदे संबन्धिलक्षणेत्युक्तम्· नञ्तत्पुरुषे अघटः पट इ
त्र घटपदं घटसंबधिपरम्· नञ्पदं चान्योन्याभावे शक्तमेव संसर्गाभाववाचकं नञ्पदं नान्योन्याभाववाचक
मिति चेन्न· लाघवेन विनिगमकाभावे न चाभावमात्र एव तच्छक्यत्वावधारणात्· न तु न घटः पट इति वदभाव घ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि.मं. ८ टयोरन्वयोपपत्तेर्न घटपदेपि लक्षणापत्तेरिति चेन्न। नामार्थयोरभेदातिरिक्तसंबन्धेनान्वयस्याव्युत्पत्तेः कथन्त
र्हि न घटः पटः इत्यत्रान्वय इति चेत्। घटपदस्य घटप्रतियोगिके लक्षणेति गृहाण। प्रथमाया वाप्यस्मिन्नर्थे ल
क्षणा। ननु सुब्विधौ न लक्षणेति चेन्न। तर्हि कथं न स्यात् कर्मधारयतत्पुरुषः कथं चैकस्य दाराः इति ब
हुवचनम्। आनुशासनिकी लक्षणैवेति चेत्तुल्यम्। तदिदमाहुः नियतप्रयोगादिकोचिदव्ययादिति। त
थापि नञर्थपदयोः कथमाश्रयाश्रयिभावेनान्वयः। ननु नञ्लग्नषष्ठीस्मरणादिति चेन्न षष्ठीलोपमज्ञा
नतोपि ततोऽर्थप्रत्ययात्। नञ्पदमभाववत्त्वबोधकमिति चेन्न। घटस्याभावे ऽनन्वयापत्तेः तस्य पदार्थैकदे
शत्वात्। मैवम्। असंबन्धिकस्थले एकदेशेप्यन्वयस्वीकारात्। यथा चैत्रस्य पितेत्यादौ चैत्रस्य जनकत्वे राम: ८
न्वयः। अन्ये तु समुदायशक्त्यैव तत्पदार्थान्वयः। परं परासंबन्धेनेत्याहुः। अन्ये त्वभाववत्त्वबोधकत्वमेव। अन्य।

थ घटः पट इत्यत्र समानविभक्तिकत्वानुपपत्तेः अपरे तु निपातस्थलेऽन्यैवद्भिन्नत्यान्निरिति घटतदभावयोः प्रतियोगप्र
योगिभावेनान्वयोपपत्तौ न घटादिपदे लक्षणा। अत एव चन्द्र इव मुखमित्यादौ चन्द्र इवार्थयोर्भेदेनान्वयः अ
त एव घटो नास्तीत्यत्रापि घटतदभावयोरन्वयो निष्कलङ्क इत्याहुः तन्न। मानाभावात्। चन्द्रवन्मुखमित्यादौ तु
चन्द्रपदं तत्सदृशलक्षकम्। इवपदं च तात्पर्यग्राहकम्। अत एव चन्द्रमिव मुखं पश्यामीत्यत्र द्वितीया अ
न्यथा तदनुपपत्तेः अन्यथा पदस्यार्थ एव विभक्तौ लक्षणानुशासनानुग्रहात्। घटो नास्तीत्यत्रापि तथेत्य
दोषः अन्ये तु घटो नास्तीत्यत्र घटस्याभावोऽस्तीति नार्थः तथा सति भूतले घटो नास्तीत्यस्याप्यापत्तेः अभा
वस्यैकत्वादिति। किन्तु भूतलवृत्त्यभावप्रतियोगी घटोऽस्तीति। ननु। कोऽत्राधिकरणाकाङ्क्षापत्तेः कथं तर्हि
घटो न स्त इत्यादीति चेन्न। भावनान्वय्यभावप्रतियोगि निरूप्यान्वयात्। कथमिति चेत् तथैव प्रतीतेरिति
गृहाण। परे तु इह भूतलावच्छिन्नास्तित्वरूपाख्यातार्थनिषेध एव घ एव घटे प्रतीयते। न पदार्थेत्र

सि·सं·
८

इत्यत्रैव॥ नातो विवचनानुपपत्तिः· नन्वेवं जातौ सत्तानास्तीत्यत्र का गतिः· जातिवृत्तित्वाभावस्य समवायमसत्वात्· जाति
समवेतस्य चाप्रसिद्ध्या निषेद्धुमशक्यत्वादिति चेन्न· या गतिः सत्तान जाति·रिति वाक्यस्य अयोग्यमेवेदं वाक्यम्· वृ
त्तिपदं वा साक्षात्सम्बन्धावच्छिन्नवृत्तिपरमिति तुल्यम्· तथापि नञर्थो निषेधो घटे कथमन्वेतीति चेन्न· नि
पातातिरिक्तनामार्थस्याभिन्नामार्थेनाऽभेदेनान्वयात् नामार्थमात्रमात्रस्येति प्रतियंति· स्यादेतत्· घटो ना
यमित्यादौ भेद एव प्रतीयते· भूतले न घट इत्यत्र त्वत्यन्ताभावस्यैवेत्यत्र किं नियामकम्· अधिकरणवाचक
पदे सप्तमी विभक्तिरत्यन्ताभावबोधे तन्त्रम्· प्रतियोग्यनुयोगिपदयोः समानविभक्तिरन्योन्याभावबोध इति
चेन्न· न पचति चैत्रः चैत्रस्य न धनमित्यत्र सप्तम्यभावात्· अलघु पचतीत्यत्र समानविभक्तेरभावाच्च· अ
त्राहुः· नञ्विनिर्मोके यत्र प्रतियोग्यनुयोगिपदयोरभेदेनान्वयबोधे आकांक्षा तत्रान्योन्याभावबोधकत्वमन्य
त्रात्यन्ताभावबोधकत्वमिति वस्तुस्थितिः· भूतले घटः पट इत्यत्र नञ्समत्वे घटपटयोरभेदान्वयबोधे आकांक्षा· अत·

राम:
८

स्तत्रान्योन्याभावप्रत्ययः भूतले न घटः पट इत्यत्र नान्विति निर्मोकेनाभेदान्वये आकांक्षा इति तत्र संसर्गाभावप्रत्यय इ-
तिसंक्षेपः। व्यञ्जना च न वृत्यन्तरम् लक्षणयैव तदर्थसिद्धेः नन्विदमयुक्तम् तथाहि लक्षणायां मुख्यार्थे इत-
रान्वयानुपपत्तिर्हि बीजम् न च व्यंजनायां सा सर्वत्रास्ति गच्छ गच्छसीत्यादौ तदभावात् अतो वृत्यन्तरमास्थे-
यमिति चेत् किमिदं लक्षणाबीजत्वम् न तावज्ज्ञानकत्वम् गंगातीरयोः संबन्धस्यानुपपत्तिज्ञानाजन्यत्वा-
त् नापि तज्ज्ञापकत्वम् अनुपपत्तिज्ञानमन्तरेणापि गंगातीरयोः संबंधस्य चक्षुरादिना ग्रहात् नापि
तत्तात्पर्यग्राहकत्वम् तात्पर्यव्यापारान्तरतोपि तद्ग्रहात् अथ लक्षणाजन्यशाब्दबोधे सहकारित्वं तदिति चे-
त् यष्टीः प्रवेशयेत्यत्र व्यभिचारात् तात्पर्यविषयानुपपत्तिरत्राप्यस्तीति चेन्नहि तात्पर्यानुपपत्तिरेव स-
र्वत्र लक्षणाबीजमस्तु सा चेहाप्यस्ति स्यादेतत् गंगायां घोष इत्यादौ लक्षणाप्रयोजनं शैत्यपावन-
त्वादिप्रतीतिः न च तत्प्रतीतिर्लक्षणासाध्या प्रयोजनाभावात् लक्षणायाश्च प्रयोजनवत्त्वनियमा-

सि·मं· दिति चेन्न· लक्षप्रतीतेरेव प्रयोजनत्वान्न तथापि प्रयोजनान्तरं तत्र नास्तीति चेन्न तत्किम्· लक्षणायां हि प्रयोजनत्वेन
४ नियमो न तु लक्ष्यप्रतीत्यतिरिक्तप्रयोजनत्वेन· गौरवादप्रयोजकत्वाच्च· स्यादेतत् नानार्थस्थले तावदर्थविशे
षप्रत्यये प्रकरणादि निर्णायकम्· तथा च यत्र प्रकरणादिशून्यार्थान्तरं प्रतीयते तत्र नाभिधामूलं· सहकार्य
भावात्· नापि लक्षणा· अयोगात्· सिद्धं त्वन्तरेणेति चेन्न· प्रकरणादीनामननुगततया सहकारित्वानुप
पत्तेः तात्पर्यग्राहकत्वेनस्यामनुगम इति चेन्नाहि लाघवात्तात्पर्यग्राहकस्यैव सहकार्यस्तु· स चेहाप्यस्ति· स्या
देतत्· लक्षणादिपदवृत्तिः स्यन्तु पदतदेकदेशवाक्यरचनार्थसंगणाद्याकाराश्रितत्वाश्रयभेदाद्भेद इति
चेन्न· असिद्धेः· तदेकदेशादयो ह्यर्थविशेषतात्पर्यग्राहकाः न तु तत्प्रतिपादका इति स्यादेतत् लक्षेतात्प
र्यज्ञानं लक्षणासहकारी न तु स्वरूपार्थे तात्पर्यग्रहो नियतः स्वार्थरहितकाणादौ तात्पर्यविषयस्यापि वं राम:
ग्यस्य चमत्कारकारित्वादिति चेन्न· अंगेन तात्पर्यग्रहस्यानपेक्षायां गंगायां घोष इत्यादौ शैत्यादिकमेः ४

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वप्रतीयेतेनतु केशवालुकादिमत्वमितिनियमोनस्यात्· वासनाविशेषपरिपाकान्नियमइतिचेन्नहिंलक्षणास्थले ।
पिसेतियामकोस्तु· क्लतंतात्पर्यग्रहणेति· वक्तुतात्पर्यजनानायांगच्छगच्छेत्यत्रमाणाइत्यत्रास्यास्तात्पर्यमुन्नीय
तेसंभाव्यतेवानतुमाणाइतिनिर्णीयतइतिक्लप्तंहृत्यन्तरेणेति· स्यादेतत्· यद्येतेएवहृत्तिकथंतर्हि प्रजयती
त्यादौप्रकर्षबोध· नहिप्रादेःप्रकर्षादौशक्तिर्द्योतकत्वात्· नचलक्षणाअसक्तत्वात्· उच्यतेजयतिरत्र
प्रकर्षजयलक्षकः प्रशब्दस्तुतात्पर्यग्राहकः नत्वमेवचद्योतकत्वम्· नचजयएवशक्यः प्रकर्षोलक्ष्यइ
तिवाच्यम्· जयमात्रंहिशक्यंनतुविशिष्टजयःतदक्तं· शक्यादन्येनरूपेणज्ञातेभवतिलक्षणाइतिननुप्रादे
रेवप्रकर्षादौकथंनशक्तिःकल्प्यतइतिचेन्न· अनन्यलभ्यत्वादितिगृहाण· व्यतिषेइत्यत्रतुल्ङोधातुरेवार्थं
प्रत्याययति· धातुलोपमज्ञानतस्तत्रार्थप्रत्ययाभावादितिसंक्षेपः॥ स्यादेतत्· आख्यातस्यतावद्यत्नएव
शक्यःपचतीत्यस्यपाकंकरोतीतिविवरणात्· व्यवहारवद्विवरणादपिचशक्तिनिर्णयात्· तथाचरथोग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि·मं·
१०

कृतीयत्त्वनमुख्यप्रयोगः रथादीनामचेतनतया गमनानुकूलप्रयत्नशून्यत्वात् नापि लक्षणा विभक्तौ लक्षणानंगी
कारात् अन्यथा व्ययानुशासनवैयर्थ्यात् अतः सिद्धं त्वन्तरेणेति चेन्न व्ययानुशासनबलाद्विभक्त्यर्थे व्यखिल
प्यानुशासनिकी लक्षणा न त्वन्यत्रापि इहचनविभक्त्यर्थे लक्षणा किन्तु व्यापारे इत्येतेच विभक्त्यर्थेप्या
नुशासनिकी लक्षणा यथा कृद्योगे षष्ठ्याः कर्मत्वे न च कर्मत्वमपि संबन्धः सचप्रकारस्वेति न लक्ष्यः क राा
र्मत्वत्वप्रकारकबोधस्य तया विनाऽसंभवात् तत्प्रकारकबोधो न भवत्येव किंतु संबन्धत्वप्रकारक इति चेन्न
अनुशासनवैयर्थ्यात् द्वितीयाया असाधुत्वज्ञापकतादिति चेन्न निष्ठादिवर्जनवैफल्यात् न चाद्वितीयाः
याः साधुत्वज्ञापकमनुशासनमिति चेन्न कृत्प्रयोगे विकल्पविधानवैयर्थ्यात् अनिषेधे नैव तृतीयाप
त्तेः पाक्षिकषष्ठ्यर्थतादिति चेत् संबन्धत्वप्रकारकबोधजनिकायाः शेषवचनादेव सिद्धेः निष्ठादियोगे रामः
शेषषष्ठ्यसाधुत्वज्ञापकतादिति चेन्न कृद्योगे ताहृशपावकृदर्शनात् किंचयादि विभक्तौ न लक्षणा क १०

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

थन्तर्हि घटं जानातीति विषयतायां कर्मत्वं शक्ताद्वितीया विषयतैव द्वितीयार्थः क्रियाजन्यफलशालित्वापेक्षया
लघुत्वादिति चेन्न हि ग्रामं गच्छतीत्यत्र कुतः कर्मत्वप्रतीतिर्लक्षणां विनेति विभावनीयमायुष्मता भक्तां
तत्रापि कृत्यन्तरमिति चेन्न कृष्णकृत्यैवोपपत्तेः मीमांसकास्तु अनुकूलव्यापारमात्रमाख्यातार्थः रथो ग
च्छतीत्यादौ सर्वत्र प्रयोगात् इत्याहुस्तन्न यत्नत्वस्य जातित्वेन तत्रैव शक्यतावच्छेदकत्वात् नत्वनुकू
लत्वस्य गुरुत्वात् कथन्तर्हि यानानुकूलता यत्नस्य भासत इति चेन्न संसर्गविधयेत्यवेहि कथन्तर्हि जाना
ति गच्छति यतते करोतीत्यादयः प्रयोगाः नहि ज्ञानाद्यनुकूलो यत्नोऽस्ति प्रतीयते वेति चेत् आश्रयताल
क्षकत्वादाख्यातस्येति गृहाण किन्ता मणिकृतस्तु जानातीत्यादौ धात्वर्थ एव वैचादौ साक्षादन्वेति
आख्यातप्रतिपाद्यश्च कालः संख्या च ननु यत्नोऽपि अयोग्यत्वादित्याहुस्तच्चिन्त्यम् नामार्थधात्वर्थ
योः साक्षाद्भेदान्वयबोधस्याव्युत्पन्नत्वे अन्यथा ओदनपाकयोः कर्मतासंसर्गेणान्वयः स्यात् वस्तुतो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि॰मं॰ जानातीत्यादौ आख्यातार्थानवभासे आख्यातार्थसंख्यान्वयो न स्यात्· तस्या आख्यातार्थविशेष्यगामित्वात्॰
११ विभक्त्यर्थाविशेषणीभूतो नामार्थ आख्यातार्थविशेष्य॰ तेन चैत्र ओदनं पचतीत्यत्र तथाविधश्चैत्र आख्या
तार्थविशेष्य॰ न त्वोदनार्थ॰ द्वितीयार्थविशेषणत्वात्· पच्यत इत्यत्र कर्मणः कर्त्तुस्तृतीयार्थाविरुद्धत्वात्· स्थी
यत इत्यत्र स्थित्यनुकूलाकृतिरित्याख्यातार्थे कस्यापि न विशेष्यत्वमिति संख्यानन्वित एव· अत एवोत्सर्गिक
मेकवचनमेवेत्युक्तं· धात्वर्थविशेष्यकोऽत्रान्वयबोध॰ न चैवं धात्वर्थस्थितित्वादिविवक्षया द्विवचनाद्याप
त्तिः असाधुत्वादित्यपि कश्चित्· स्यादेतत्· आख्यातार्थः काल· अत्रान्वेतीति चेत्· एकपदोपात्तत्वप्रत्या॰
सत्याकृतावित्येवेति· धात्वर्थ इत्यपरे· कथमन्यथा जानातीत्यादौ ज्ञाने वर्त्तमानत्वादि प्रतीयत इति· स्यादे॰
तत्· भविष्यत्तातीतत्वे आख्यातविशेषणे वा तेन· भविष्यत्त्वं च विद्यमानप्रागभावप्रतियोगित्वम्· विद्यमा॰ राम॰
नध्वंसप्रतियोगित्वम् तीतत्वमिति· पचति देवे भाविकृतिप्रागभावमादाय पक्ष्यतीति· आद्यकृतिध्वं॰ ११

६नं२ समादायापाक्षीदिति स्यात्· नस्यात्· आद्यक्लित्तिप्रागभावस्यैव भविष्यत्प्रत्यये चरमक्लित्तिध्वंसस्यैवातीतप्रत्ययेना-
भिधानात्· अथौंपचतीत्यत्रौदननिष्ठविक्लित्तिजनकव्यापारविशेषकर्तृत्वं प्रतीयते तत्र क्लित्तिस्तदनुकूल- वि२
व्यापारश्चकस्यार्थः उच्यते विक्लित्तिः फलम्· ॥ तद्द्वितीयाया अर्थः तदनुकूलविलक्षणव्यापारश्च धात्वर्थः अनु-
कूलता च संसर्गः ननु कर्मत्वं द्वितीयाया वाच्यम्· तच्च क्रियाजन्यफलशालित्वं न तु फलमात्रमिति चेन्न· क्रि-
याया धातुवाच्यत्वात् जन्यत्वाश्रयत्वयोश्च संसर्गमर्यादया लाभात्· फलमात्र एव शक्तेः कल्पनात् अन-
न्यलभ्यो हि शब्दार्थः ननु फलमपि धातुलभ्यमेव फलानुकूलो हि व्यापारो धात्वर्थ इति चेन्न· फलानुकूलत्वोप-
लक्षितो विलक्षणो व्यापारो हि धात्वर्थः न तु फलानुकूलत्वमपि गौरवात्· नन्वेवं त्यजिगम्योः पर्यायता-
स्यात्· तथाहि· संयोगानुकूलकर्म गमेरर्थः विभागानुकूलश्च कर्म त्यजेरर्थः तत्र यदि फलानुकूलत्वमु-
पलक्षणम्· तदा कर्ममात्रं शक्यं तत्र वाच्यम्· तथा च कुतो न पर्यायता· आस्तां पर्यायता को दोष इति चेन्न·

सि·मं· ग्रामंगच्छतीतिवत्क्षेत्रोग्रामंत्यजतीत्यापत्तेः मैवंगच्छतीत्यादिसमभिव्याहृतद्वितीयायाः संयोगरूपफलबोधकत्वव्युत्प
१२ त्तेः त्यजादिसमभिव्याहृतायास्तुविभागबोधकत्वव्युत्पत्तेरेवयथोक्तातिव्याप्तिनिरासात्·न्यायभास्करकृतस्तु·फ
लमवच्छेदकमेव·द्वितीयार्थस्तदाश्रयता·नचैवंभूमौपर्णंपततीत्यत्रभूमिपदाद्द्वितीयापत्तिः समभिव्याहृतधा
त्वर्थावच्छेदकफलाश्रयबोधकव्युत्पत्तेः अतएवधात्वर्थावच्छेदकफलशालित्वंकर्मत्वमितिलक्षणंध्रुवम्·न
हिक्रियाजन्यफलाश्रयत्वंतत्·वृक्षाद्भूमौपततीत्यत्रवृक्षभूम्योः कर्मजन्यविभागसंयोगाश्रयतयाकर्म
त्वापत्तेः·ननुतथाप्यधःसंयोगानुकूलव्यापारस्यपतत्यर्थतयाकर्मत्वंभूमेर्दुस्त्यजमितिचेन्न.पतत्यर्थे
फलस्यावच्छेदकत्वानंगीकारात्·तद्धात्वर्थानधिकरणत्वेसतीतिविशेषणाच्च·नचैतस्यधात्वर्थावच्छेदकः
फलग्रामसंयोगाश्रयत्वेऽपिकर्मत्वमितिस्वीकुर्वन्तीतिसंक्षेपः॥तस्यशब्दस्यनिराकांक्षत्वादन्वयबो रामः
धकत्वादाकांक्षादिकंसहकारि·तच्चयत्पदंयत्पदेनसहयादृशान्वयानुभवजनकंतत्त्वंतस्यतत्पदसमः १२

भिव्याहारस्तादृशान्वयबोधे आकांक्षा· भवति हि नामपदं उत्तरवर्त्ति विभक्तिपदेनैव सहान्वयबोधकमतस्तत्समभि-
व्याहारस्तादृशान्वयबोधे आकांक्षा· अत एव घटः कर्मत्वमित्यतो न घटमितिवदन्वयबोधः आकांक्षाविरहात्
धातुपदं चाख्यातपदेनैव सहान्वयविशेषबोधकम् भवति· तदाख्यातपदसमभिव्याहार एवाकांक्षा· अत
एवानयनं कृतिरित्यादावानयतीतिवन्नान्वयबोधः कृतिवाचकाख्यातसमभिव्याहाराभावेन निराकांक्ष-
त्वात्· ननु नामपदं द्वितीयादिविभक्तिसमभिव्याहृतमेव कर्मत्वादीनामाश्रयाश्रयिभावेनान्वयबोधक-
मित्यत्र किन्नियामकमिति चेन्न· नाम्नः स्वार्थनिष्ठकर्मत्वानुभवजनने तदुपस्थापकविभक्तिसहका-
पु२ रित्वमिति गृहाण· इत्थं च यस्य रूपस्य घटः कर्मत्वमिति वाक्याद्युत्पत्तिरभूत् अतस्ततोन्वयबोध इति
चेन्नस्मिन्नुरूपस्यैवमानं नास्ति का कथा तदन्वयबोधे· तथापि यदि कश्चित्तादृशः स्यात्तस्य किं भविष्यती-
ति चेत्· शाब्दानुभवं वै कार्यमेवान्वयव्यतिरेकसिद्धः कारणाविरहादिति· एतस्याश्चाकांक्षाया ज्ञानं हेतुः

सि·मं·
१३
त्तिभ्रमेणान्वयबोधात्· अपराच प्रकृतान्वयबोधसमानाकारस्वजन्यान्वयबोधविरहः प्रकृतान्वयबोधेस्वरूपः
मतीहेतुराकांक्षा· अतो घटमानयतीतिपदमेकदान्वयबोधेजनितेनान्वयबोधान्तरजनकं स्वजन्यान्वय
बोधवैधुर्यविरहात्· एवंच गामानयेत्यतोन्वयबोधेजातेदण्डेनेत्यन्वयबोधेनिराकांक्षतास्यादत उक्तं प्रकृ
तान्वयबोधसमानाकार इति· नचगामानयेत्यन्वयबोधः प्रकृतोयेनदण्डेनगामानयेत्यन्वयबोधस्तेन
समानाकार इति दिक्· योग्यताचएकपदार्थेऽपरपदार्थस्यप्रकृतसंसर्गवत्वम्· तेनपयसासिंचतीतियो
रा ग्यम्· पयसिसेककरणतासंसर्गस्यसत्वात्· यस्मिंश्चसेककरणतासंसर्गोनास्ति तद्वह्निनायोग्यम्· आ
काशंशब्द इत्यत्रसमवायरूपसंसर्गवत्वमादायाभेदान्वयबोधेपि योग्यतास्यादत आह· प्रकृतेति· अ
स्याज्ञानकरणात्वं तद्भ्रमेणाप्यन्वयबोधात्· ननु संसर्गस्यापूर्वत्वात्कथं प्रथमंज्ञानसंभव इति चेदुच्यते· रामः
योग्यताज्ञानमात्रहेतुः अस्तिचात्रपयःसेककरणतान्वेतिसंशयरूपंज्ञानम्· क्वचिन्निश्चयोपियथाप्र १३

त्पक्षेणाद्दृष्टे घटोऽस्तीति · परे तु · असंसर्गग्रहः प्रतिबंधकस्तदभावो योग्यता सा स्वरूपसती हेतुः नचैवं जल
ह्रदो वह्निमानित्यप्यसंसर्गाग्रहदशायां योग्यं स्यात् इष्टत्वात् नच लाघवात्संसर्गज्ञानकारणत्वमसंसर्गा
ग्रह इति वाच्यम् असंसर्गाग्रहस्यालौकिकसाक्षात्कारातिरिक्तपित्तादिदोषाजन्यविशिष्टज्ञानमात्रे हेतु
त्वावधारणात् कथमन्यथा चन्दनं न सुरभीति निश्चये सुरभिचन्दनमिति ज्ञानं न स्यात्तदभावात् मितावं
पि चक्षुषा घटस्यालौकिकसाक्षात्कारः शंखे पीतभ्रमश्च दृश्यते इत्यजन्यान्तम् नच घटोऽभिधेय इत्य
त्राभिधेयत्वाऽसंसर्गाग्रहसिद्धा तद्ग्रहाप्रसिद्धिः अभिधेयत्वप्रतियोगित्वेन योऽभावस्त्रमस्तु अप्रसिद्धेः यदि दभावस्य ४
च सोऽपि न प्रसिद्धस्तदा स्वरूपतः योग्यता हेतुरेव नचैवं व्यभिचारः स्वाकांक्षादिबोधं प्रतियोग्यतायाः कथं कार
णत्वमिति वाच्यम् नहि बोधकत्वावच्छेदकं योग्यतायाः कारणत्वम् किन्तु तदीयतादृशान्वयबोधे तदीयता
दृशान्वयविरहनिश्चयाभावत्वेन विशिष्यैवेति न व्यभिचार इत्याहुः आसत्तिः पदाव्यवधानम् अतएव

रा२

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सि॰ मं॰ गिरिरग्निमानित्यासत्त्वं। अनासन्नं च गिरिर्भुक्तमग्निमान्देवदत्तेनेति। न चैवं स्थाल्यामोदनं पचतीति स्थाल्यामि-
१४ त्यस्य पाकेन नासन्नतापत्तिः ओदनमित्यनेन व्यवधानादिति वाच्यम्। प्रकृतान्वयबोधाननुकूलपदव्यवधानाभा-
वस्य विवक्षितत्वात्। ओदनपदं च स्थाल्यादिकरणकौदनकर्मकपाककर्तेत्यन्वयबोधानुकूलमेव। स्थाल्यां प-
चतीत्यन्वये त्वनासन्नमेवेति प्राञ्चः। न चैवं श्लोकादेरप्यनन्वयबोधः कथं व्यवहितत्वेन प्रत्यक्षासिद्धेः व्यवहि-
तत्वभ्रमासंभवादिति वाच्यम्। तत्र हि श्लोकपदान्नान्वयबोधः किन्तु योजनावाक्यादित्याहुः। वस्तुतस्तु
आकांक्षादिमत्त्वे सति तात्पर्यज्ञाने व्यवहितेप्यन्वयबोधान्नविलंबेन विलंबाभावाच्च नैतज्ज्ञानं हेतुः किन्त्व-
व्यवहितपदतात्पर्यज्ञानं। तच्चैतत्पदस्मैतत्पदाव्यवहितोत्तरमभिसंदधात्वित्यपि संधायस्थितुरिच्छा। अतए-
व मौनिश्लोकेप्यासत्तिः वक्तुरभावेप्यभिसंधातुः सत्त्वात्। शुकवाक्ये च भगवत्तात्पर्यमादायैव गतिरिति न- राम:
व्याः तदपि न सत्। यथा तात्पर्यज्ञानादौ विनाविलंबेन शाब्दबोधाविलंबात्। तस्मात्कृत्पदजन्यपदार्थोपस्थिति १४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रासत्तिः सा च स्वरूपसती हेतुः नहि पदार्थानुपस्थितावन्वयबोधः न च स्मृतापदजन्येति व्यर्थम् घटपदात्समवाये
नाकाशोपस्थितौ घटोस्तीतिवाक्यादाकाशान्वयबोधापत्तेः ननु घटमानयेत्यत्र घटकर्मत्वानयनकृत्युपस्थि
तीनां न युगपत्संभवः आशुविनाशिनां क्रमिकाणां मेलकाभावादिति चेन्न क्रमिकपदानुभवजन्यानेकसंस्का
रैर्युगपन्नावत्पदस्मरणाद्युगपन्नावत्पदार्थस्मृतावन्वयबोधः संभवतीति संक्षेपः ॥ अतएवाव्यवधानेन पदज
न्यपदार्थोपस्थितिरासत्तिरित्यपास्तम् तृतीयान्तवैयर्थ्यात् व्यवहितोपस्थितावेकस्याउपस्थितेर्विनाशात
तात्पर्यम् चेदम् एतस्मिन्नर्थेऽस्यान्वयं प्रत्याययत्विति प्रयोक्तुरिच्छा प्रयोक्ता चाभिसंधापयितृमात्रं ननु वक्तैव
मौनिश्लोकाद्याप्तेः शुकवाक्ये भगवदिच्छैव गतिः तस्य च निश्चयो हेतुः अस्य संशयव्यतिरेकनिश्चये चान्वयबो
धात् तद्भ्रमे चान्वयबोधाच्चेति संक्षेपः ॥ सोयं शब्दो द्विविधः विधिरर्थवादश्च तत्र विध्यभिधायकः प्रत्ययः
तद्घटितं वाक्यं वा विधिः अभिधेयो विधिश्च कार्यत्वम् तच्च कृतिसाध्यत्वमिति किमत्र मानमिति चेत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि·मं·
१५

विधित्वावच्छेदकं ज्ञानमजनयित्वा प्रवृत्तिजनिकामिच्छामजनयित्वा न प्रवृत्तिजननायालम्· अतो यस्य बुद्धिः प्रवृ
त्तिजननीमिच्छां सूते स विधेः विधेयः प्रवृत्तिजननी च कृतिसाध्यत्वप्रकारिकेच्छा तज्जननी च कृतिसाध्यत्वप्रका
रिका बुद्धिः कृतसाध्यत्वज्ञाने तदनुत्पन्नेः न तु कृतसाध्यत्वप्रकारकज्ञानाभावो गौरवात्· सर्वदा चिकीर्षोत्प
त्त्यापत्तेश्च· सर्वदा तत्सत्वात्· अतः कृतिसाध्यत्वं विध्यर्थ इति· नन्वेवं मंडलीकुर्यादिति वाक्याद् उत्पन्नकृति
साध्यताज्ञानवतो बलवदनिष्टजनकमेव मंडलीकरणमिति जानतो मण्डलीकरणे प्रवृत्तिः स्यात्· अथ ब
लवदनिष्टाननुबन्धि कृतिसाध्यताज्ञानं प्रवर्तकमिति चेत्· इत्थमपि इष्टाजनकत्वेन बलवदनिष्टाननुब
न्धिकृतिसाध्यत्वेन मंडलीं जानतस्तत्र प्रवृत्तिः स्यात्· प्रवृत्तिजनकज्ञानस्य सत्वात्· अत्र प्रभाकरमतानुवर्त्ति
नः नियोगो वादिमत्वघतिसंधानजन्यं कार्यताज्ञानं प्रवृत्तिजनक अन्यत्र चेष्टसाधनताज्ञानजन्यमिष्टसाधनता राम:
ज्ञानकालीनं वा कार्यताज्ञानं प्रवृत्तिहेतुः प्रवृत्तिसामान्ये च कार्यताज्ञानसामान्यमिति न कश्चिद्दोषः· नन्वेवं १५

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लाघवादिष्टसाधनत्वविषयककार्यताज्ञानमेवप्रवृत्तिसामान्येहेतुरितिवाच्यम्· नित्येतदभावात्· साध्यत्व
साधनत्वयोर्विरोधेनैकस्मिन्कृतिसाध्यत्वेष्टसाधनत्वयोर्भानासंभवाच्च· कथमनयोर्विरोधइतिचेदित्थम्
साधनत्वंहिसिद्धधर्मः असिद्धावस्थाकार्याऽनुत्पत्तेः साध्यत्वंचासिद्धधर्मः सिद्धतादशायांतदभावात्· नचै
कदासिद्धासिद्धत्वम्· येनैकदाकृतिसाध्यत्वमिष्टसाधनत्वंचस्यादिति· अत्रजरन्नैयायिकाः इष्टसाधन
ताविषयकंकृतिसाध्यताज्ञानमेवप्रवर्त्तकंलाघवात्· नत्विष्टसाधनताज्ञानजन्यंकार्यताज्ञानादिगौरवा
त्· नचनित्येइष्टसाधनताज्ञानासंभवः फलाभावादितिवाच्यम्· नित्येपिबहुशः फलश्रुतेः यत्रफलश्रुतिर्ना
स्तितत्रापिविश्वजिन्न्यायात्स्वर्गः फलम्· प्रत्यवायपरिहारोवा· नचैवंफलकामनाधीनकर्त्तव्यत्वेनकाम्यत्वं
स्यान्नतुनित्यत्वमितिवाच्यम्· नहिफलकामनानधीनकर्त्तव्यत्वंनित्यतांब्रूमः किन्तुयदकरणेप्रत्यवा
यस्तत्त्वम्· तच्चकामनोपाधिककर्त्तव्यत्वेप्यक्षतमेव· नचैवंफलेयदाकामनानास्तितथासंध्यावंदनादौप्रवृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि·मं· त्रिर्नस्यात्· इष्टत्वात्· नहि प्रयोजनमनुद्दिश्य मन्दोपि प्रवर्त्तते· नन्वेवं कामनाधिकारिविशेषणं स्यान्तथा च फलेय
१६ दा कामना नास्ति तदा प्रकृष्यस्याश्वेरिवानधिकारित्वान्नित्याकरणेपि प्रत्यवायो न स्यादिति चेत्· यदि तत्र प्रत्यवा
यः प्रामाणिकस्तत्यज्यतां तर्हि कामनाधिकारिविशेषणम्· ननु वेदबोधितमिष्टसाधनत्वमपि · प्रामाणिकत्वात्·
४ का कल्प्यतां वा मनेतरयावदधिकारवतामकरणमेव प्रत्यवायहेतुरिति न किंचिदेतत्· न च साध्यत्वसाधनत्वयोः
विरोधः एकस्मिन्पाके ओदनसाधनत्वकृतिसाध्यत्वयोः सत्वात्· कथमन्यथा तवेष्टसाधनताज्ञानकालीनकार्यता
ज्ञानं पाकादौ प्रवर्त्तकमिति· कृतिसाध्यत्वे च बलवदनिष्टाननुबन्धित्वविशेषणं देयम्· नातो मधुविषसंपृक्तान्न
भोजने कृतिसाध्यत्वेन सुखसाधनत्वेन च ज्ञातेपि प्रवृत्तिः बलवदनिष्टाननुबन्धित्वेन ग्रहात्· यदा च बलवदनिष्टा
तै२ ननुबन्धित्वेन न ज्ञायते तदा प्रवर्त्तते· एवं च बलवदनिष्टाननुबन्धीष्टसाधनत्वे सति कृतिसाध्यत्वविषयकं ज्ञानं राम:
प्रवर्त्तकम्· विध्यर्थोपि बलवदनिष्टाननुबन्धीष्टसाधनत्वे सति कृतिसाध्यत्वम्· अत एव कलञ्जभक्षणस्येष्टसाधः १६

नत्वेपि वलवदनिष्टाननुवंधित्वाभावाद्विशिष्टाभावोस्तीति न कलंजं भक्षयेदिति विध्यर्थनिषेध उपपद्यते कथं तर्हि श्येनेनाभिच
रन्यजेतेत्यत्र विधिप्रवृत्तिः श्येनस्य हिंसात्वेन नरकरूपवलवदनिष्टानुवंधित्वादिति चेन्न श्येनो हि वधसाधनं न तु नरकसा
धनं मानाभावात् श्येनाद्धि वधो वधाच्च नरक इति न तत्राभिचारिकाणां प्रवृत्तिः ननु श्येनो मरणानुकूलव्यापारत्वेन हिंसा सा
च नरकजनिकेति चेन्न नहि मरणानुकूलव्यापारमात्रं हिंसा कूपादौ विनष्टे गवि तत्कर्तुर्गोवधकर्तृत्वप्रसंगात् नापि
मरणोद्देशेनानुष्ठीयमानत्वे सतीति विशेषितं तत्त गंगामरणमुद्दिश्य कृतत्रिसंध्यस्तवपाठादेरपि तत्त्वापत्तेः अ
द्वारा दृष्टमरणानुकूलत्वं विवक्षितमिति चेत्तर्हि कथं श्येनस्य हिंसात्वमिति न व्यापारस्तु वलवदनिष्टाननुवंधीष्टसाधनं
त्वे सति कृतिसाध्यताज्ञानत्वेन हेतुत्वम् कृतिसाध्यत्वे सति वलवदनिष्टाननुवंधीष्टसाधनताज्ञानत्वेन कारण
ता वलवदनिष्टाननुवंधिकृतिसाध्यत्वे सतीष्टसाधनताज्ञानत्वेन वेत्यत्र विनिगमनाविरहः अस्तु तेन तेनापि रू
पेण हेतुत्वमिति चेन्न र्हि कार्यताज्ञानत्वादिनैव हेतुता स्फलाघवात् चस्मत्कृतिसाध्यताधीत्वेनैव चिकीर्षां प्रति

सि·मं·श हेतुत्वम् नन्वेवमिष्टाजनकेपि चिकीर्षा स्यादिति चेत्· स्यादेवमुखादौ इष्टाजनकत्वेन ज्ञाते मंडलीकरणादौ चिकीर्षा स्यादि
७ ति चेन्न उपायेच्छासामान्यसामाग्र्यभावात्· केसमुपायेच्छासामग्रीति चेद् दिष्टसाधनताज्ञानं बलवदनिष्टाननुबंधि
त्वज्ञानं च बलवदनिष्टसाधनताज्ञानं वा प्रतिबंधकम्· इष्टसाधनत्वं च विद्यमानेच्छाविषयो यस्तत्साधनत्वम्· इच्छा
विषयत्वं च स्वरूपसद्विशेषणम्· ननु तस्यापि ज्ञानं कारणम्· एवं यदा सुखादाविच्छा पाकादौ च सुखसाधनताधी·
स्तदा पाकादाविच्छेति ध्येयम्· विध्यर्थोपि इष्टसाधनत्वम् कृतिसाध्यत्वं बलवदनिष्टाजनकत्वं च· ननु विशिष्टम्
विशेष्यविशेषणाभावे विनिगमनाविरहात्· न कलंजं भक्षयेदित्यत्र च कृतिसाध्यत्वेष्टसाधनत्वयोर्नन्नर्था
न्वयः तस्य कार्यत्वादिष्टसाधनत्वाच्च किंतु बलवदनिष्टाननुबंधित्वस्य· श्येनेनाभिचरन्यजेतेत्यत्र बलवदनि·
ष्टाननुबंधित्वस्य नान्वयो बाधात्· इष्टसाधनत्वकृतिसाध्यत्वयोस्त्वन्वयः स्यादेव अबाधादिति संक्षेपः· सोयं वि· रामः
धिस्त्रिविधः अपूर्वविधिर्नियमविधिः परिसंख्या चेति· तदुक्तम्· विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति· तत्र· ७

२ इत्थं चात्र काम्यत्वेनोपस्थितः स्वर्ग एव न चे[illegible]काम्यम् साक्षात्साधनत्वस्य आ अविनाशित्वेनासंभवात् । न च परंपरया स्वर्गसाधनत्वं बोध्यम् × २

वान्यत्र च प्राप्तौ परिसंख्येति कीर्त्यत इति उदाहरणानि व्रीहीन्प्रोक्षति व्रीहीनवहन्ति पंच पंचनखा भक्ष्या इति अत्र
एव नेष्टसाधनत्वं विध्यर्थः स्वर्गकामो यजेतेति विधिना तस्य यागे बोधयितुमशक्यत्वात् तथा हि स्वर्गकामस्ये
ष्टसाधनं याग इत्यनेन बोध्यम् परंपराघटकापूर्वानुपस्थितेः नापि कार्यत्वम् स्वर्गकामकार्यत्वस्य यागे बोधयितु
मशक्यत्वात् तथा हि शाब्दे योग्यताज्ञानं हेतुः योग्यता चान्वयप्रयोजकं रूपम् अत एव से कान्वयप्रयोजकत्वं
इव इष्यत्वं जलेऽस्तीति तद्योग्यम् वह्नौ नास्तीति तदयोग्यम् प्रकृते च कामिकार्यत्वान्वये इष्टसाधनत्वमन्वयप्र
योजकम् न च तद्ग्रहीतुं शक्यमित्युक्तम् तस्मात्कार्यमपूर्वमेव [illegible] विध्यर्थः तस्मिन्यागस्य विषयतया
न्वयः नन्वपूर्वस्य पूर्वमनुपस्थितत्वान्न तत्र शक्तिग्रहो नुपपन्नः अथ कार्यत्वेन कार्यसामान्य एव शक्तिग्रहः
योग्यताबलाच्चापूर्वव्यक्तेर्लाभः न हि यागविषयकमन्यत्कार्यं संभवतीति चेन्न [illegible]
[illegible] त्वात् स्वज्ञानादेरपि संभवात् उच्यते कार्यतावत्स्वर्गकामस्यान्वयो नियोज्यनियोजकभावल

सि·सं· क्षणाः तत्रकामीनियोज्यः नियोजकंचकार्यम् अतः कार्यनियोजकत्वमेवस्वर्गकामस्यान्वयः नियोजकत्वंचतत्कामिकार्यतया
१८ प्रतीयमानत्वम्· अत्रचान्वयेप्रयोजकंकाम्यसाधनम्· नहिकामीकाम्यादन्यत्कामसाधनत्वेनाज्ञातंकार्यतयावेत्ति· नच
काम्यासाधनंकाम्यसाधनंसाधनत्वेनज्ञायते· अन्यथाख्यातेरनभ्युपगमात्· नचज्ञानंकाम्यस्यस्वर्गस्यसाधनंसंभव
तीत्यतोयोग्यतावलाद्यागविषयकंकार्यंस्वर्गकामीयम्· स्वर्गकामोयागविषयककार्यवानितिवाक्यभवोभवन्योग्य
तयाऽपूर्वमालंबते· एवंकामेक्रमशक्तिर्लिङ् नित्यनिषिद्धेचापूर्वमाह ॥ लोकेचपचेदित्यादावपूर्वतात्पर्यासंभवा
कार्यत्वलक्षणेत्याहुः अत्रोच्यते· कार्यत्वमेवविधेःशक्तिर्लाघवात्· ननुकार्यत्वविशिष्टे· नचयागेस्वर्गकामकार्य
त्वान्वयासंभवोबाधकाभावात्· नचयोग्यताज्ञानविरहोबाधकः नह्यन्वयप्रयोजकरूपवत्त्वंयोग्यता· सेकानन्व
यितेऽपिसत्वात्· किन्तुप्रकृतसंसर्गवत्त्वम्· तस्यचसंशयसाधारणज्ञानंहेतुः नचयागेस्वर्गकामकार्यत्वसंशयो राम: १८
नसंभवति· येनैवंस्यात्· यच्चोक्तमिष्टसाधनत्वंनविध्यर्थः यागेनास्यलिङ्बोधयितुमशक्यत्वादितितदपि

नबाधकाभावात्· उक्तंबाधकमितिचेन्न· साक्षात्परंपरात्वगुदस्यसाधनतासामान्यस्यलिङ्गबोधनात्· यथारूप
वांश्चैवइत्यत्रनीलत्वादीनुद नस्यरूपसामान्यज्ञानम्· अथैकविशेषबाधेसाद्धसामान्यज्ञानेनतदितरविशेषप्र
कारकतानियतम्· यथाघटेनजलमाहरेदित्यत्रच्छिद्रबाधेच्छिद्रेतरत्वेनघटज्ञानमतोत्रसाक्षात्त्वबाधेपरंप
रात्वप्रकारकंज्ञानंकार्यम्· तच्चनसंभवतिद्वारानुपस्थितेरितिचेन्न· घटेनजलमाहरेदित्यत्रयोग्यतयाव स्थि
स्तुतोयच्छिद्रेतररूपान्वयोनतुतदितरत्वेन· तदुपस्थापकाभावात्· नचलक्षणायातदुपस्थितिर्मानाभावात्· आ
ज्ञांचात्रापिसाक्षादन्यसाधनत्वप्रकारेणैवान्वयः किन्त्वच्छिन्नम्· अथयोग्यताज्ञानविरहोबाधकः· तथाहि· आशुविनाशि
नः कालान्तरभाविफलजनकत्वेफलसमयपर्यन्तस्थायिव्यापारजनकत्वमन्वयप्रयोजकम्· नचेहतथाज्ञानंसं
भवतीतिचेन्न· अन्वयप्रयोजकरूपवत्त्वस्ययोग्यत्वनिरासात्· नन्वेवंकथमपूर्वलाभ इतिचेत्· आशुविनाशिनः
कालान्तरभाविफलजनकत्वस्यतत्कालस्थायिभावव्यापारकत्वव्याप्तेः· तदुक्तमाचार्यैः चिरध्वस्तंफलायालंनकर्मा
लं

सि.सं. १९ तिशयंविनेति· महाफलधर्मिकल्पनातोधर्मकल्पनायालघुत्वात्· यागादिरेवस्थायित्वंयुक्तंनत्वपूर्वम्· नचैवमिदानींयागप्र
१९ त्यक्षापत्तिः आत्मविशेषगुणानांक्षितीयक्षणेयोग्यत्वादित्याहुस्तन्न· इदानींनयजेयमितिप्रत्ययेताविरोधात्· विधिभिन्नो क्ष२
र्थवादः सतुत्रिविधः गुणवादोऽनुवादोभूतार्थवादश्चेति· तदुक्तम्· विधिर्धेगुणवादः स्यादनुवादोवधारिते। भूतार्थवा
दस्तद्धानादर्थवादस्त्रिधामतः सोयंशब्दोऽनित्यः उत्पन्नोगकारोविनष्टोगकार इतिप्रतीतेः अत्रगुरवः नित्यः नित्यः
शब्दोव्योमैकगुणत्वात्तत्परिमाणवत्· नचाप्रयोजनकम्· सोयंगकार इति प्रत्यभिज्ञानस्यान्यथानुपपत्तेः नचायं
भ्रमः बाधकाभावात्· नचोत्पत्त्यादिप्रती तिर्वाधिका· तस्याव्यंजनवायूत्पत्त्यादिविषयत्वादित्याहुस्तन्न· गका
रगतत्वेनोत्पत्त्यादिप्रतीतेः नचासौभ्रान्तिः बाधकाभावात्· प्रत्यभिज्ञानंबाधकमितिचेत्· अनयैववाधितत्वात्किन्नः
स्यात्· नह्यत्रविनिगमकमस्ति· नन्वेवंविनिगमकाभावेविनाशादिप्रत्ययस्यैवकुतोनबाधितत्वमितिचेन्न· उत्पत्ति राम:
विनाशप्रत्यययोर्वाधत्वकल्पनापेक्षयाप्रत्यभिज्ञानमात्रस्यावाधत्वकल्पनायालाघवात्· अन्यत्तुविनिगमकाभावा· १९

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उभयोरेवप्रमात्वम्। कथमिति चेत्। प्रत्यभिज्ञानस्य गत्वावच्छिन्नभेदाभावविषयत्वात्। तथासति गकारोयमिति स्यान्न
तु सोयमिति चेन्न। सोयमित्यस्य तद्भिन्नगत्वावच्छिन्नाभिन्नोयमित्यर्थात्। गकारोयमित्यत्र च गत्वेन तद्भिन्नत्वानव
गाहनात्। तथासति तज्जातीयोयमिति स्यादिति चेन्न। गत्वे जातित्वानवभासनादित्याहुः भट्टास्तु शब्दो नित्यः नि
रवयवद्रव्यत्वात् आत्मवदित्याहुः तन्न उक्तदोषात्। शब्दस्य द्रव्यत्वे मानाभावात्। शब्दो द्रव्यं साक्षात्संबन्धेनेन्द्रियग्रा
ह्यत्वात् घटादिवदिति चेन्न। अप्रयोजकत्वात्। शब्दस्य नीरूपद्रव्यत्वेन बहिरिन्द्रियाग्राह्यत्वापत्तेः। अन्ये तु शब्दो नित्यो
ध्वन्यन्यशब्दत्वात् स्फोटवदित्याहुः तदप्यत एव निरस्तम्। दृष्टान्तासिद्धेश्च। न हि वर्णान्यः स्फोटात्मकः प्रमाणसि
द्धोस्ति नन्वस्ति सः। तथाहि। पदानां वर्णकदम्बरूपाणां आशुतरविनाशितया मेलनासंभवात्। अप्रत्यक्षत्वं ता
वन्निरूढम्। तथा च तदप्रत्यये कुतोर्थप्रत्ययः स्यात्। तस्माद्वर्णाभिव्यंग्यः पदस्फोटः कश्चिदभ्युपेयो यतोर्थ
प्रत्यय इति तदभ्युगमम्। स हि स्फोटस्तावद्वर्णव्यंग्यस्तावतां मध्ये यत्किंचिद्वर्णव्यंग्यो वा तावद्वर्णाभिव्यक्तिव्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि·मं·श· गोवा· नाद्यः आशुविनाशिनां क्रमिकाणां तेषां मिलनासंभवात्· न द्वितीयः घकारमात्रोच्चारणे घटपदस्फोटप्रत्ययेऽर्थप्रत्य
२० यापत्तेर्वर्णान्तरवैफल्यापत्तेर्नान्त्यः तदसंभवात्· अथ पूर्वपूर्ववर्णगोचरसंस्कारसहितचरमवर्णोपलंभस्त
द्व्यंजक इति चेत्तर्हि स एवार्थप्रत्यायकोऽस्तु कृतं स्फोटेन· अथ पदप्रतीतिबलात्तत्सिद्धिरिति चेन्न· तस्याः क्रमविशेष ६४
वत्तावद्वर्णगोचरत्वात्· तावद्वर्णगोचरप्रत्ययस्यैव न संभवति इति चेन्न· तावर्णगोचरसंस्कारात्मसूहालंबन
रूपतावद्वर्णगोचरस्मरणासंभवात् ननु तावद्वर्णमात्रं न पदम्· अर्थाप्रत्यायकत्वात्· अन्यथा नदीदीनयोरवि
शेषापत्तेः किंतु आनुपूर्वीविशेषविशिष्टतावद्वर्णारूपम्· न च तत्प्रत्ययः संभवतीति चेन्न· घोत्तरत्वं टस्यानुपू
र्वीः अस्ति च तस्य प्रत्यक्षत्वम्· घोत्तरं टं शृणोमीति प्रतीतेरिति दिक्· ननु अर्थापत्तिरपि मानान्तरम्· पीनो देवदत्तो
दिवा न भुंक्ते इति प्रत्ययानंतरं दिवसाभोजिनः पीनत्वं रात्रिभोजनमन्तरेणानुपपन्नमिति तत्कल्पयंतीति· न चात्र रामः
प्रत्यक्षादिप्रमाणमस्तीति चेन्न· केवलव्यतिरेकिणैवोपपत्तेः· तथाहि देवदत्तो रात्रौ भुंक्ते दिवाऽभुंजानत्वे सति पीन २०

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वात्· यन्नैवं तन्नैवम्· यथा केवलमभोजीति· अर्थापत्तिपदं च केवलव्यतिरेकिणो नामान्तरमिति संक्षेपः। अविदितकर्तृकः
शब्दविशेष एवैतिह्यनामा सयदिमानं तदा शब्द एव नो चेत्प्रमाणमेव नेत्युभयथापि न मानान्तरमिति सिद्धानि चत्वारि
प्रमाणानि· ननु सर्वमिदं प्रमात्वसिद्धौ स्यात्तदेव तावन्न सिद्धम्· न हि तत्प्रत्यक्षम्· ज्ञानस्यातीन्द्रियत्वात्· अन्यथा ज्ञा
नतज्ज्ञानानां ज्ञानमेव स्यान्न तु विषयान्तरसंचार इति· अत्र गुरवः प्रकाशमेव ज्ञानं घटादिकमिव स्वात्मानं स्वाधि
करणमात्मानं च विषयीकरोति· अत एव सर्वमेव ज्ञानं घटमहं जानामीत्याकारकम्· इत्थं च ज्ञानस्य मितिमातृप्र
मेयविषयत्वात् त्रिपुटीप्रत्यक्षतेति प्रवाद इत्याहुः· तन्न चक्षुर्जन्यघटज्ञानादिना स्वात्मनो विषयीकर्तुमशक्य·
त्वात्· चाक्षुषादिज्ञाने विषयसन्निकर्षयोरपि हेतुत्वात् तेन चोत्पद्यमानं ज्ञानं पूर्वमस्ति तन्निकृष्टं वा कथं
वा चक्षुषा आत्मविषयकं ज्ञानं जायेत· चाक्षुषादिज्ञाने उद्भूतरूपवत एव द्रव्यस्य योग्यत्वात्· अन्यथाका
शस्यापि चक्षुषा ग्रहापत्तेः। भट्टास्तु ज्ञानं तावत्स्वविषये ज्ञातताख्यं फलं जनयतीति निरूढम्· तयैवानुमेयं ज्ञानं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि·ग्रं·त· मित्याहुस्तन्न· ज्ञाततायानिरुक्तत्वात्· ज्ञानरूपस्यसाध्यस्याप्रसिद्धावनुमानासंभवाच्चउच्यतेमननैवज्ञानंगृह्यतेयो
२१ ग्यत्वात्· नचैवंतज्ज्ञानमपीत्यनवस्थेतिवाच्यम्· विषयान्तरसामग्र्याःप्रतिबन्धेनकस्यचिज्ज्ञानस्यमननसाग्रहात्· न
त्प्रतिबंधकत्वेकिंमानमितिचेत्फलानुदयइतिसंक्षेपः·तथापितस्यप्रामाण्यंकेनगृह्यते· नतदनुमानेनग्रहीतुं
शक्यंसाध्याप्रसिद्धेः अन्नभट्टाः ज्ञाततयाज्ञानानुमितिर्जायमानाप्रामाण्यमपिविषयीकरोतीत्याहुः·तन्न· ज्ञा
ततायांहिज्ञानमात्रस्यव्याप्तिर्गृहीताप्रमात्वविशिष्टस्यवा· नाद्यः ततोज्ञानमात्रंसिद्ध्येन्नतुतत्प्रमात्वमपि· सा·
ध्यतावच्छेदकीभूतरूपेणसाध्यव्याप्त्यसिद्धेन्नतुरूपान्तरेणअन्यथावह्निव्याप्योधूमइतिज्ञानाद्धूमत्वेन [illegible]
[illegible]दीपत्वेनवादह्नेरपिसिद्ध्यापत्तेः· नान्त्यःव्यभिचारात्साध्याप्रसिद्धेश्चगुरवस्तु· स्वप्रकाशमहिम्नास्वमिव
स्वप्रामाण्यमपिसिद्ध्यतीत्याहुस्तन्न· स्वप्रकाशतायाअसिद्धेः· किंचएवंज्ञानेप्रामाण्यसंशयोनस्यात्· ज्ञानग्र
हेप्रामाण्यनिश्चयात्· निश्चितेचसंशयायोगात्· अग्रहेस्वप्रकाशत्वहानाद्वाव्याघातात्· धर्मिज्ञानाभावाच्च· रामः
समानधर्मवत्तयाधर्मिज्ञानस्यान्वयव्यतिरेकाभ्यांसंशयहेतुत्वावधारणात्·मुरारिमिश्रास्तुतद्विषयक २१

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वे सति तत्प्रकारकत्वं प्रामाण्यम्· तच्च प्रथमानुव्यवसायेनैव गृह्यते· तथाहि· घटत्ववान्त्वावच्छ्यवसायोपनीतो तस्त्वाद्वि
शेष्यतासंसर्गरूपाज्ञानेमनसा गृह्यते· विशेषणस्य तद्वतः पूर्वमुपस्थितत्वात्· न च मनसो वहिरर्थप्रकाशासा
मर्थ्यम्· उपनयसहकारेण तस्य वहिरर्थप्रकाशकत्वात्· कथमन्यथा कविकाव्यमूलभूतज्ञानम्· कथं वानुव्यव
सायेविषयप्रतिभानम्· घटत्वमपिव्यवसायोपनीतम्· ततस्तत्प्रकारकताविषयेतावत्तुग्रहेति· उभयस्यैकत्रग्र
हे गृहीतं प्रामाण्यमिति· तदपि न· एवं तद्विशेष्यकत्वं तत्प्रकारकत्वं च गृहीतम्· न चैवं तावदेव प्रामाण्यम्· किन्तु
तद्विशेष्यकत्वविशिष्टं तत्प्रकारत्वम्· न च तद्विशेष्यकत्ववैशिष्ट्यमनुव्यवसायोगृहीतुमर्हति· तद्विशेष्य
कत्वस्य पूर्वमनुपस्थितेः संसर्गविधया हि विशेष्यकता प्रकारकता च भासते किंचैतदपि न प्रामाण्यम्· व
ह्निगुंजयोर्गुंजावह्नी इति भ्रमेतिऽव्याप्तेः आसित तत्र वह्निविशेष्यकत्वं वह्नित्वप्रकारकत्वंच· किंतु तद्विशेष्यकत्वा
वच्छेदेन तत्प्रकारकत्वमित्युक्तम्· न चावच्छेद्यावच्छेदकभावः प्रथमं गृहीतुं शक्यः तद्विशेष्यकत्वस्य पूर्वमप्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तीतेः अत्रोच्यते· मास्तां तावत्प्रथमानुव्यवसायेन ग्रहो द्वितीयेन तु स्यात्· न हि द्वितीयव्यवसायस्य पूर्वं प्रथमानुव्यवसायेनोपस्थि
तेः न चैवं प्रामाण्यस्यानुव्यवसायगम्यत्वे प्रामाण्यसंशयो न स्यादिति वाच्यम् अनुव्यवसायेन प्रामाण्येनानुव्यवसा
येन गृहीतं तत्र संशयासंभवात्· अन्यथा पुरुषत्वसंशयो न स्यात् तस्य चक्षुर्वेद्यत्वात्· न चैवं प्रामाण्यस्य स्वतो ग्रा
ह्यत्वमागतम्· असति प्रतिबन्धके यावत्स्वाश्रयानुव्यवसायग्राह्यत्वं हि मिश्रनये स्वतोग्राह्यत्वं तच्च न· प्रथमानु
व्यवसायेनाग्रहात्· एवं च साध्यप्रसिद्धावनुमानमपि तद्ग्राहकम्· तद्यथा· इदं पुरुषज्ञानं प्रमा· करादिमत्तिपु
रुषज्ञानत्वात्· संप्रतिपन्नवत्· यन्नैवं तन्नैवं यथा घट इति व्यतिरेकि· अन्ये तु प्रथममप्रामाण्याभाव
एव प्रामाण्यं व्यतिरेकिणा साध्यम्· न च साध्याप्रसिद्धिः नहि व्यतिरेकिणा साध्यहेतोर्व्याप्तिर्गृह्यते· किंतु साध्या
भावहेत्वभावयोरिति किं न दप्रसिद्ध्या· न च साध्याप्रसिद्धौ तदभावाप्रसिद्धिः प्रतियोगिज्ञानसाध्यत्वादभा·
वज्ञानस्येति वाच्यम् तस्य प्रतियोगिरूपत्वात्· न च प्रतियोगिज्ञानेऽप्यभावज्ञानं कारणम्· एवं च यद्व्यापकतया हेत्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भावो गृहीतस्तेन हेतुनाऽभावः सिद्ध्यतीति: न च साध्याज्ञाने कथं विशिष्टज्ञानानुमितिः अप्रामाण्याभावविशेष्यिकायास्तथानुमि
तेरभ्युपगमादित्याहुः आस्तां तत् तथापि तद्वति तत्प्रकारकत्वग्रहे उक्तैव गतिः किंच कादिमति प्रकारघत्वज्ञानं केन ग्राह्य
म् अनुव्यवसायेनेति चेन्न हि पुरुषत्ववति तत्प्रकारकग्रहः केन वाऽवधार्यताम् यतस्तद्ग्रहमपहायैव कुतस्त्यादरः इति अ
नेनु तत्प्रकारकज्ञानत्वमेव प्रामाण्यम् न च रजतत्वप्रकारकशुक्तिज्ञानमपि प्रमाणं स्यात् तदसिद्धेः नहि यत्र य
न्नास्ति तत्र तत्तत्प्रकारकज्ञाने मानमस्ति कथं तर्हि शुक्ताविदं रजतमिति व्यवहार इति चेन्न व्यवहर्तव्ये रजतत्वा
संसर्गाग्रहात् रजतत्वप्रकारिकाशुक्तौ स्वप्रवृत्तिरपि तदिष्टतावच्छेदकरजतत्वसंसर्गाग्रहात् अथ रजतत्वप्रका
रकप्रवृत्तौ रजतत्वप्रकारकं ज्ञानं प्रमाणसलेकारणं ज्ञमस् तथा च तेन विना कथं शुक्तौ प्रवृत्तिः स्यादिति चेन्न
तत्रापि रजतत्वासंसर्गाग्रहस्यैव हेतुत्वात् अथ संसर्गाग्रहस्याविशेषात् क्वचित्संवादिनी प्रवृत्तिः क्वचिद्विसंवा
दिनीति अतो नियमः इति चेन्न तद्वति तदसंसर्गाग्रहस्य तत्प्रकारकसंवादित्वात् तदभाववति तदसंसर्गाग्रहस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि·मं·ग· तत्प्रकारकाविसंवादिन्यां प्रवृत्तौ हेतुत्वात्· अत्रोच्यते· लाघवाद्रजतत्वसंसर्गाग्रहो रजतत्वप्रकारकप्रवृत्तौ हेतुः न तु र
२३ जतत्वासंसर्गाग्रहो गौरवात्· न च शुक्तौ तदसंभवः विशेषणाविशेष्येन्द्रियसंनिकर्षे सत्ये तयोरसंसर्गाग्रह इत्येवं विशि ज्ञानै२
ष्टज्ञाने हेतुः अस्ति चात्रापि विशेषणस्य रजतत्वज्ञानं विशेष्यीभूतशुक्तीन्द्रियसन्निकर्षः तयोरसंसर्गाग्रहश्च·
अथ रजतत्वसंनिकर्षविरहात्कथं तत्प्रकारकं प्रत्यक्षमिति चेन्न· संनिहितं यत्र रजतं तेन च संयुक्तसमवायसा
न्यत्र ज्ञानस्य संनिकर्षस्य सत्वात्· ज्ञानस्य सन्निकर्षत्वे किं मानमिति चेद्रजतत्वप्रकारकप्रत्यक्षमित्येवेहि
तत्रैव किं मानमिति चेत्तत्प्रकारिका प्रवृत्तिरिति संक्षेपः॥ १ ॥ ॥इति श्रीचूडामणिभट्टाचार्यकृ
तान्यायसिद्धान्तमंजरिसमाप्ता शुभम्॥ ॥ १ ॥ शुमंगलं कुर्वन्तु· ॥ ॥ १ ॥ शुभं॥

रामः
२३

स्यादिति स्युरुषेच्चविभक्त्यर्थान्वयानुपपत्तिरितिवाच्यं · तदतिरिक्तस्थल एव नान्यपदमादित्याहुः ॥ ननु चित्रगु-
रित्यत्र चित्रपदं चित्रगोसंबंधिपरं गोपदं च स्वामिपरं चित्रगोसंबंधिनस्स्वामितादात्म्येन गोपदार्थे स्वामिन्यन्वय इति
सर्वपदानामेवसाधुत्वे किं विनिगमकं परस्परतात्पर्यग्राहकत्वं एवमारूढवानरो वृक्ष इत्यत्र धातोर्वानरारोहणे लक्ष-
णया पद्मकर्मत्वे वानरपदस्याश्रये लक्षणया वानरारोहणकर्मत्वाश्रयपद इति बोधः वैचित्र्ये तत्र धनदृक्षत्र वै
त्रयदृस्य वैचक ते के दायातोऽर्थं न दाने कर्मपर्यसंप्रदानत्वे धनपदस्याश्रये लक्षणया वैचकतृकधनदा-
नसंप्रदानत्वाश्रयपद इति बोधः अथवा वानरपदस्य वानरकर्तृकमर्थः तस्य च धात्वर्थे आरोहणेऽभेदे-
नान्वयः कर्मत्वपः कर्मेपरः एवं धनपदस्य धनकर्मकमर्थः तस्य च चैत्रकर्तृकदानेऽन्वयः कर्मत्वप
स्यसंप्रदानमर्थः एवं गभीरायां नद्यामित्यत्र गभीरपदं गभीरनदीसंबंधिपरं नदीपदं च तीरपरम् इ-
त्यत आह विस्तरस्त्विति चित्रगुपदाच्चित्रगोस्वामिनो वानुभवान्नायं प्रकारः साधुः एवं शोभनवि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्यारी
ब्रु·टी

त्रगुरिति त्रिपदत्वः श्रीहौ चित्रपदस्य चित्रगोसंबंधिपरत्वात्पुंवद्भावे कृते शतपागा । विशोभनात्वपानुपपत्ते
रगत्या चित्रपदस्य शोभन चित्रगोसंबंधिपरत्व पशोभनपदं चेत्तत्र यं ग्राहकमिति निष्ठितो वेनातत्वा पगाने ष्ठ
न्तिं के चिन्तु चित्रपदस्य चित्रस्वामी गो पदस्य गो स्वामी ग्रपं: अन्ने वचनानां संत्रिहिते विशेषणत्वमि
ति न्यायेन च चित्रत्वेन गोत्वेन चै कार्थ्यान्वयः तेषां हद्द्वानरहस्त्रत्रकक्ष समपम कर्त्तेसंबंधो वानरपदस्य
वानरसंबंधी अर्थ: एकदेशोपि हस्तावारोहणस्यान्वयः पत्के सन्ने वेन्याहुः तद्रा पि चित्रगोस्वामी सनुभवापला
पादुपेक्षे अन्ये तु गो पदं गो स्वामिलक्षकं । चि । चित्रस्याभेदेनान्वयः एकदेशो विच्छन्ना तिवै विशेषणान्वयसौ
कारादित्याहुः अपरे तु गोपदेन शक्या गो: लक्षणया च स्वामी बोध्यते पुनः पदार्थैकदेश विरोधस्यानेगो कारानन्वय
कं जपदस्यप्रशत्वा वि शेषे लक्षणा न गोकार रत्नु समुदायेपशक्त्या व्यवहारस्यामा । लोकनादृम्पा नत्राति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

छाग इति शि । निवहं निश्चेतेदं बोध्यं गोपदस्य चित्रगोस्वामिपरत्वाणोसंवंधित्वावछेदकत्वयाग होतचैत्रस्यादि
ना चित्रगोसंवंधि चैत्रत्वेनैव भानं नीरत्ववत्गंगासंवंधिनीरत्ववहा आरूढवानरो वृक्षस्य [illegible] ढः वान
रो पश्चिमिति वाक्ये आरूढः पदं कर्तृधात्वोर्ध्वदेशावछिन्नसंयोगानुकूलक्रियाकर्तृत्वप्राप्यत्वो हितीया
पाञ्च ये यत्वमर्थः इत्थं च [illegible] ध्वदेशावछिन्नसंयोगानुकूलक्रियाश्रयो वानरः इत्यन्वयबोधः समासे
त्वारोहणकर्तृवानरसंबंधी वृक्षः इत्यन्वयधीः संवंधः स्वकर्तृकारोहणकर्मत्वं । एवं वैचहृतधनः इत्यत्र
चे चैत्रहृतधनं यस्मै इति वाक्ये चैत्रकर्तृकहरणसंप्रदानकहरणकर्मधन स्विति अन्वयबोधः समासे तु चैत्रकर्तृ
कहरणकर्मधनसंवंधी इत्यन्वयबोधः संवंधः स्वकर्मकहरणसंप्रदानत्वमित्यन्वयबोधः समासे तु चैत्रक
र्तृकहरणकर्मधनसंवंधी इत्यन्वयबोधः [illegible] संवंधः स्वकर्मकहरणसंप्रदानत्वमिति । अत्र च समाना

२

व्या·टी धिकरणबहुव्रीहिः चक्रपाणिरित्यादौ तु व्यधिकरणबहुव्रीहिः चक्रं पाणौ यस्येति विग्रहवाक्ये पञ्चम्यं धियाग्रिह
वृ·टी ति चक्रमित्यन्वयधीः समासे तु चक्रयुक्तपाणिमान् इति बोधः स च तद्गुणसंविज्ञानबहुव्रीहिः अतद्गुण
णसंविज्ञानबहुव्रीहिस्त्विति द्वेधा भवत्यप्रधानवः चैत्रादीनां यत्र लम्बकर्णमानय इत्यादौ अयं तु चि
त्रगुरित्यादौ न प्राप्नोति भवत्यप्रत्ययः किं यत्र विद्यमानं विद्यते न लम्बकर्णो वर्णविनोदः संबन्धत्व
३ दवच्छिन्नत्वेन चान्वयबोधः लम्बकर्णं पश्य इव लम्बमानावच्छेदकत्वान्नेन दृष्टे लम्बवद्यान विशेषणस्याप्र
भूतत्वे केवलं तद्गुणसंविज्ञानबहुव्रीहिस्थले तु समासस्य गुणानां विशेषणत्वं यत्र गुणो
भूतस्यापि समस्य विशेष्याद्यन्वयिना सह अन्वयः इति चुम्बने शीतिसंप्रदायः अत्राहुः यदि लम्बकर्णमानयेत्या
दावजहत्स्वार्थलक्षणया लम्बकर्णस्यापि विशेष्यतेनैवान्वयेनानुभवबाधः तस्माद्वाच्यजहत्स्वार्थैव

विशेष्यत्वेन विधेयान्वये स्वार्थस्यागात् यत्र विशेषणतया स्वार्थस्य विधेयान्वयः स तद्गुणसंविज्ञानबहुव्रीहिः
यत्र तूपलक्षणतया स्वार्थस्य विधेयान्वयः सोऽतद्गुणसंविज्ञानबहुव्रीहिः विशेष्यान्वयित्वः । त्वेनैवमेवावि
शेषणत्वं यथा पीलंबकर्णो मालोलंबकर्णसंबंधित्वेनोपस्थितिः । चित्रगुरित्यादौ च चित्रगोसंबंधित्वेनउ
पस्थितिस्तुल्यैव तत्र पिलंबकर्णो हि विशेष्यान्वयिनः यथा हि विशेषणतया विधेयान्वयः चित्रगोस्तूपल
क्षणतया तत्त्वात्तत्र शब्दस्य स्वाभाव्यमेव तन्त्रमिति केचित् । चित्रनुंभववान्हिः सप्तम्यादिनोपेयाम्यिति विग्रहवाक्यात्
भृवान्मित्रैः सप्तम्यादिनोपस्थितंबंधीति बोधः समासात्तु भूवामित्त्वयप्त्यादिनसंबंधीति बोधः एवं चैत्र स्वाह्रिः
सप्तान्नोपेयामिति विग्रहवाक्यात् चैत्राभिन्नः प्रथानोपस्तं संबंधीति बोधः समासात्तु चैत्राभिन्नप्रधानसंबं
धीमन्वयबोधः संबंधस्य स्वरूपात् प्रोप्यम्याबाधितत्वे विशेष्यापाक्यावाधितं च त्र त्रम् वाभिन्न सप्तम्य८

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्या. ऐ तत्संबंधित्वचैत्राभिन्नप्रधानसंबंधिनेधित्वादिनादिपदस्य लक्षणालक्ष्यतावच्छेदकस्यापि च वादेर्विशेष्यान्व
वृ. ही यित्वानुत्वादिनान्वयानुपपत्तेर्लक्षणाया अजहत्स्वार्थत्वं चेन्न । अपरेतु लंबकर्णमादौ विशेष्यतयान्व
न्वयाननुभवादस्तु जहत्स्वार्थैव यादृश्यरूपानुगमेप्यस्तिनत्वान्तिमे त्रितयादिनैव बोधः शक्यलक्ष्ययोर्वि
धेयानन्वयानुभवात् काकेभ्यो दधि रक्ष्यतामित्यत्रैव शक्यलक्ष्ययोर्विशेष्यान्वयस्य न प्रमाणादेव चलंबक
र्णभवादिसाधारणोतत्कुणत्वमित्याहुः । अग्रादिशब्देनाप्युपस्थितिनत्वात्रितयादिनालक्षणाभ्युपैत्रादिपदस्या
मर्पयाह कर्मितत्वे भूतवत्वाह्निगचैत्रत्वमैत्रत्वादिना च नानारूपेणैव लक्षणां गृह्णन्ति ह्यविरोधान
नुपगमात् तद्रूपाभेतु पुष्पवंतादिपदे नानारूपेणैकपदार्थे नानारूपेणैकलक्षणायाः शक्ता
न्वैषहोपसंस्कारपरैश्चैत्रत्वेनेत्यर्थे चत्वेनादिपदार्थेन लक्षणायामैत्रत्वादिना बोधः स्त्रीवपुष्पवादि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पदार्थयोर्भेदान्वयबोधस्याभिन्नत्वेनाविषयीकरणात् द्वंद्वेनाभेदान्वयाभावात् द्वंद्वेनापत्तिरितिविवेके वि
हितिहत्वेनपदत्वविते नञ्घ्यावीभावसमासेः विशेष्यभावमुपपादयन्तिदण्डकुंभ मिति दंडकुंभमितिसर्वबोधा
वः पुष्टंविपिप्पलीतिनभुरुहषः ॥ उपगोहे निपातियतेषांनसीपे सत्ताभावान्कुंभस्योपेतेनात्र विग्रहः किं
नुकुंभस्यसमीपेदंडपदकुंभमितिदृष्टान्तेऽनरूपद्तिकुंभशब्दस्यकुंभसंबंधिनिपिप्पलीपदस्यपिप्पली
संबंधिनिलक्षणानस्यबोधायार्थसामीप्यात्कभेदेनान्वयः वस्तुनलक्षणपदार्थःसामीप्यंनतुसमीपः
नवाचोपपदस्याविसमीपार्थेलक्षणोपकदेशेचसामीप्येकुंभादिसंबंधेनतादात्म्येनान्वयइति
पदत्वेलक्षणापेक्षयाकुंभपदस्येवकुंभसमीपपदतादण्डपदेचनामपेक्षाहरूम्मितिकेविनुचेद्द्रव
सुर्वभिस्त्वात्रैहवार्थसाहश्यस्यभेदेनमुक्तेः चपेनाव्ययतिपानातिरेकस्यलक्षणानामार्थ

७

मा॰गो
बुद्धे

योर्भेदेनान्वयबोधानङ्गीकारेन्तउपपदार्थसामीप्ये कुम्भस्यान्वयबोधसंभवात् संबंधश्च कारकानुभवानु
रोधेन परं कुम्भपदस्य कुम्भसंबंधे लक्षणा अनुभवाननुरोधेनु अत्राप्युत्तरपदेन लक्षणेत्याहुः। अन्ये तु
उत्तरपदलक्षणा द्वितालक्ष्यतादिसमर्थः। अनन्यलभ्यस्यैव शब्दार्थत्वादिति भावः। एवं निर्णीतेस्मिन्नव्य
यीभावेप्युत्तरपदे सप्ताहिकाभावे लक्षणा पूर्वपदेनान्यपदार्थग्राहकमिति ध्येयं समाहारद्वंद्वेनेतरेतरद्वंद्वभेदेन द्वंद्वो
द्वैधा तत्र समाहारद्वंद्वे पाणिपादमित्यादौ पाणिपादस्य पाणिपादश्चेतियोगिके समाहारे [illegible]
मत्वं द्वयपतिसमाहारेति पाणिपदस्य पाणिश्चेतियोगिके पादपदस्य च पादश्चेतियोगिके समाहारे पद
द्वय एव लक्षणा पाणिश्चेतियोगिकाभिन्नपादश्चेतियोगिक समाहृतं गाढ्येतस्यान्वयबोधः समाहारे च
विभक्त्यर्थैकत्वान्वयः अत एव समाहारस्यैकत्वादेकवचनमेवोनेडमापद एव पाणिपादश्चेतियोगिक

समाहारेलक्षणाएवंपदं वृत्तानर्थपत्ताहृत्कमित्याहुः ननुसमाहारेषपत्तिरित्यलक्षणत्वादितिसमाहंनयायेगो
तिसमाहारेलक्षणातिसमाहारस्त्वेतिं क्रियाधानुपत्तौ नफलानुकूलस्वजातीयविजातीयव्यापारप्रचयत्व
स्यैकरूपस्तुल्यःसंबंधःसमाहारःयथापाणिपादं वादयेमत्रवादनक्रियायाः तुल्यवदेवपाणिपादयो
रन्वयः एवंयवखदिरौच्छिंधीमत्रछिदानुकूलोयावान्व्यापारःसयवखदिरयोस्तुल्यएवभासतेनत्वेक
क्रियान्वयित्वस्यवादनादिरूपैकक्रियान्वयद्धयत्वानस्यवसंबंधिभेदान्नभेदेनाननुगमइत्यत आह
सेनेतिंयथाहेनात्वंनामतत्तदश्वादितानविषयत्वं एवंतत्तदश्वादिविषयकज्ञानविषयत्वेवतत्वंतथा
पेक्षाबुद्धि विशेषविषयत्वमेवसमाहारः अपेक्षाबुद्धेरव्यासज्यवृत्तेरपिविषयतापाव्यासज्यवृत्तित्वो
पगमान्नाननुगमइति भावः ननुसमाहारस्यसंबंधित्वे नक्रियाजन्यफलशालित्वरूपकर्मत्व

न्या॰ रो॰ स्याक्रियायामसंभवे न कर्मणां णोयादृविसर्जनकर्मविभक्तिः । रेत्यादौ कर्तेन न चैवमिति एवं समाहारे न तुल्यवदेकक्रि
व्रहो यान्वयित्वम् एतेन वस्तुतस्त्वेकविभक्तिकस्य पाणिपादसमाहारे लक्षणत इत्यर्थः । अन्वयः द्वितीयार्थकर्मत्वादेरन्वयः
अन्वयमेवाह समाहारे इति तुल्यवदेक क्रियान्वयित्वमेवेत्यर्थः । वादने इति वादनरूपक्रियाजन्यफल
शालित्वम् एवं वादनकर्मत्वस्य तत्राभावादित्यर्थः । तथा च वादनकर्मत्वं पाणिपादयोरेव न तु समाहार इ
४ कर्मता तिभावः । परंपरयेति स्वाश्रयप्रतियोगिकत्वम् एतत्परंपरयेत्यर्थः । तत्र समाहारे एकदेशमनेन साक्षात्संबंधेन
धेनानुभूयमानकर्मत्वबोधस्य परंपरयोपपादनमेवास्वरसः सूचितः समाहारेति समाहारवाचकपदोत्तर
विभक्त्यर्थः समाह्रियमाणमेव समाहारप्रतियोगिन्येव । एवकारेण न तु समाहारे साक्षात्संबंधाभावा
दिति एवं चास्वरसो द्रष्टव्यः । ननु प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वनियमभंगादसमस्तस्थाह्वयस

णीतिं व्युत्पत्तिराकांक्षात्द्धेविश्रान्त् कार्यकारणभेदेन कार्यकारणभावसम्भिन्नत्वात्सम्बन्धेतस्मिंश्चराव
कार्यकारणभावः कल्प्यते अनुभवानुरोधात् नाहं पाक्युस्यते ष्वात्रसंकोचइति भावः अत्रसमाहिपमाण
यो हिंत्वाहित्वव नापत्तिः प्रसिद्धानामितिं व्युत्पत्तिसंकोचप्रसङ्गस्यनेनाख्यासः सचित्तंः पाणिपादभिन्न
न्नपाणिपादस्य माहारस्यानुभवसिद्धत्वाद्धापाणिपादाविति द्विवचनापत्ति भिपावाक्स्मरेनसमाहारसंज्ञा
नुरोधाद्धापाणिपादसमाहारोलक्षणकल्पनमिति तन्न द्विगानंवयमुद्धारल्लब्धमतमुपपाद्यति पाणिपा
द्वाद्ये स्वेत्रेतिं पाणिपादमात्रे तिमात्रपदात्समाहारव्यवच्छेदः अनुभवसिद्धत्वात्समाहारोऽपीतिकल्प
नं न देवत्र अनुभवंस्यैवाभावादिति भावः वैयाकरणाना वीतनेनैयायिकभेदेन पाणिलक्षणयोरुपादाने

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्या.टी. ननु पाणिपादमित्यत्र समाहारे द्वन्द्वकल्पने पाणिपादयोर्हि त्वात् पाणिपादौ इति द्विवचनापत्तिः समनुसमाहा
व्र.टी. रस्यैकत्वात्तत्र द्विवचनप्रसंभवेननद्रावन्ति शिरसमिश्रेण्यहन्ने चेदमिति एवं पाणिपादयोर्बहुत्वेनानाविवक्षायां
श्रसाधुत्वादिति व्याकरणप्रतिषिद्धत्वादित्यर्थः पाणित्वं यत्स्वेनांगानामेकवद्भावो वक्तव्यस्तेन द्विसूत्रेणात्रै
कवचनमेव भि। द्विसमासाद्यन्यपदार्थाभावे बहुवचनमिति भावः ननु समाहारसंज्ञाऽनुपपत्त्या समा
हारबोधस्यानतोऽनुदये नान्वयप्रसंगात्याक्रमाद्वा न समाहाराणां समाहारोऽनेकस्मै कोऽकरणे एकोऽर्थं मन्द्रतिपा
दनं तद्बोधको द्वन्द्वः समाहारद्वन्द्व इति हि सेनम्यस्याहं इतरेतरेतरेतरसंज्ञासमाहारसंज्ञात्वम्यर्थः क्वि
न्ते यो वा पावकः नदोति नदीसंज्ञाद्वहुसंज्ञायां पाणिमाभिकेोन पासमाहारसंज्ञापोमत्वत्यं संज्ञाऽभावेऽपि
नप्रसिधितिभावः स्वरूपेति धव[illegible]रवादि स्वरूपद्वयधानोत्तिदित्यर्थः नलक्षणोक्तियदापि शक्ते सुत्वेना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्तशात् । किं नेवालक्षणोत्येवलेखनमुचितं तथापि प्राचीननैयायिकमते समाहारद्वंद्वे लक्षणापाः प्रक्रान्तत्वेन
सैवाद्रौ निराकृतेति । अत्रापीति इतरेतरयोगेपीत्यर्थः । अपि ना समाहारद्वंद्वसमुच्चयः समाहारे साहित्येलक्ष
णाः । ननु साहित्यस्य पदार्थैकदेशः धवेति धवपदस्य खदिरपदस्य वा धवखदिरसाहित्ये लक्षणाद्
नरपदं चनार्थग्राहकं मीमांसकमतेनाह्यकाण्ड एव वा लक्षणाया धवखदिरसाहित्यताप्रयोगोच्छिं धीत्वत्वप
बोधः ननु कृतसाहित्यलक्षणायेमन्याह नदाहृ रिति एतत्सूत्राद्यो हि संवेयाकरणा व्याकरणामितिन्याये
नसाहित्येगम्यमानएव हि वचनबहुवचने भवतः द्वंद्वसमासोवाचकारलक्षणाप्येद्वंद्व समासश्च साहित्ये गम्यमानए
व भवतीत्यर्थः धवत्वेनखदिरत्वेन चोपस्थितेसंख्यान्वये धवखदिरपदयोः खदिरादिपदाधीकृपस्याप्त् स्पत्व विनावच्छे
दकमापत्तेसंख्याबोधकत्वाद्विभक्तीनां ग्रन्थपक्षायटपटहेति हि नमात्रायेक । सिन्नाविषयटयत्रा विमस्पष्टसे

Sanskrit University, Balmeeki Campus

व्या॰री
वृ॰टी

गः साहित्येलक्षणाघानुसाहित्ये न नोपस्थितेहिन्नाचयः एवं चार्थे द्वंद्व इति समुच्चयान्वाचयसमाहारे तरेत
रयोगे ति च ना रस्ताप्यः तत्र समुच्चयान्वाचयातिरिक्तचार्थे द्वंद्वसमासः इति तदर्थः समुच्चयान्वाचययोः साहित्या
नवगमात्न्नाद्दिवचनवहुवचनापत्तिर्नवा द्वंद्वसमासः इति द्वंद्वे साहित्यलक्षणां कि ना द्विवचनवहुवचनानुपपत्तिः
द्वंद्वसमासानुपपत्तिश्चेति तत्र लक्षणावश्यकी इति भावः ननु समुच्चयान्वाचययोः कथं न साहित्यबोधस्तत्र।
आह साहित्यं चेति एतेन साहित्यलक्षणस्य पुनर्वचनं न समसंगतमिति शेकां निरस्ता नां समुच्चयादिसाहित्य
वारकत्वे न तत्संगतेः तुल्यवद्धि तस्य व्याख्यासंभाद्दस्तन एवेति तुल्यवद्देकक्रियान्वयित्वस्य साहित्यस्य
न्ना देवे त्यर्थः ननु यजमानस्य वैयत्वा स्याविध्यागादीवत् यान्यासाहित्ये दुर्वारमत आह यागादाविति अ
नुमत इति एवं कुर्विति ना साहाय्येत्यर्थः यथा यजमानस्याविध्यागादौ साहाय्यं कर्तु तेनान्वयो न तथा त्यर्थः। अत्र

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पत्न्याः कर्तृत्वेनसाहित्येनाविवक्षितेव्यापारसंबंधाभावात् यदा चतयोःकर्तृत्वमात्रेतयोः संबंधोविव
क्षितस्तदाभवत्येवसाहित्यं यथा दंपत्योःसाहित्यं त्यागवृद्धेसाहित्येनक्रियान्वयात्पत्न्यान्योन्यसाहि
त्यान्वयपूर्वकइतरेतरनिरपेक्षार्थान्वयस्तत्रसमासः इतरेतरसमाहारयोस्तथान्वयात्समासः साधुःस
मुच्चयेतुअसंबद्धयोरेवएकैकशःक्रियान्वयोननुसाहित्यमप्यपतयाप्यथाधवंछिधि खदिरंचछिंधी
तिसमुच्चयेतुल्यवदसंबद्धयोः क्रियान्वयथाः एकरूपसजातीयविजातीयव्यापारयोगित्वरूपसाहि
त्यंचादौ नोद्योतकतयाप्य प्र्याज मानान्तरेणवाप्यते चादौ नोवाचकत्वेपितुल्यवत्साहित्यमान्वयाभा
वान्नाहि वचनवद्वचनयोरेव साहित्यव्यंजकत्वादिति क्रियाभेदेनचाचयः यथाराधानाहर्तुंव्रजं
व्रजगणककमप्यानयेतिनतुधवंछिंधि खदिरमपिछिंधीत्यत्रान्वाचयेऽप्याद्भिः क्रियाभेदाभावात्

व्या.श्री. किंच घटं पटं चानयेत्यत्र समुच्चयेऽतिव्याप्तिः। उभयत्रैव प्राधान्येन क्रियान्वयेनात्र मर्येणनस्य समुच्चयत्वा
वृ.दी. न्नेवमाहरणनियनस्योः क्रियपोरभेदाद्वेधानाहतुंमिनाघ्यन्वाचयेऽव्याप्तिश्चानिरूपकभेदेन क्रियाभे
दोपपादनेसमुच्चयेऽतिव्याप्तिरिति चेन्नं प्राधान्येनपत्रक्रियान्वयेनात्सर्वेषांसमुच्चयः प्रधानगुणभावे
नयत्र क्रियान्वयेनात्सर्वेषांसोऽन्वाचयः सपुत्रको गच्छतीत्यादौ पुत्रस्यैक क्रियान्वयित्वेऽपि विशेषणत्वे
नैवान्वयान्नातिव्याप्तिरितिंयत्र चपुरगप क्रियान्वयेनात्सर्वेषंनत्रसमासः समुच्चयेच क्रमेण क्रियान्वयोननु
श्रणयन्त्रंक्रियान्वयव्यापारमात्रे ह्रस्ये चतुल्यवद्देकांविधेयान्वयित्वं साहित्यं तेन धवखदिराविति क्रियाऽहि
तेथात् प्रनीतफलानुकूलव्यापारवत्वात्प्रतीतौ कर्पे साहित्यवोधइति भिन्नत्वेनेमेत्रोऽस्य तिरातिमेनोर्
मत्रपश्यासंख्यस्पलेनुभवनरांतोऽक्रे पाथ्याहारादेवद्वंद्वः पद्यपेतावताहिनान्वयार्थमन्वयितावच्छेद

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कनयाश्च हि समानाधिकरण्यातं नञ्च घटे न जलमाहरेत्यत्र च्छिद्रेतरत्वस्यैव योऽयन्नावच्छेदकतत्वेवमानोपप
न्नौ मौ मांसवत्वते साहित्यलक्षणायां न वीजेन्तथापि पदानुपस्थितस्य शाब्दबोधे न भानमिति मतमंगीकृत्ये दे।
श्चाहुरीत्यस्वरसोऽप्यावर्नेतद्वीजेतु प्रत्येकमुपस्थितयोर्थयोर्वाद्वैरथ्योहिं तद्बोधसंभवे साहित्यलक्षणाकल्पन
मनर्थकं स्व च पि नावच्छेदकसमानाधिकरणमेलाबोधकत्वे विभक्तोर्नेननुमाप्यतां तभ्भांवेनानिगोर
वान् घटवान् पपटं चेत्यत्र घटमात्रायघटेन हि नान्वयः पटस्याप्रकृतार्थत्वात्प्रकृत्यर्थमात्रवृत्तिसंख्या
वाचकत्वाद्धि भक्तो नान्या हृश समभृप्यो नरविभक्तेस्तस्यैव प्रकृतित्वेन धवस्य प्रकृत्यर्थत्वात्प्रकृत्येन होषः
किं च धवादिपदात्समाहितत्वे नैव धवादिबोधस्तदा चैत्रमैत्रौ गच्छत इत्यत्रागमनस्याप्यास्यवृत्तितया नान्
न्वयप्रसंगः। एवं च हिंत्वबोधार्थं साहित्येन लक्षणागमनबोधार्थं च चैत्रत्वेन बोध इति युगपद्वृत्तिद्वय

सा·द विरोधः सहितावस्थे गमनकर्तृत्वासंभवमूर्द्धस्पेवद्वंद्वे क्रियान्वयाः सर्वसाहित्यबोधो न भवमेव तत्रेनुभव
प्र·टी· स्येवंयत्र युगपद्रूपस्थितेहृद्ये युगपत्क्रियान्वयबोधे तात्पर्यं तत्र समासः समुच्चये नुक्रमेणोपस्थितेक्र
मेण क्रियान्वयबोधे तात्पर्ये त्र समासः ॥ एवं प्रधानगुणभावविवक्षया विशेषणत्वविशेष्यत्वविवक्ष
या वा न त्र समासाभाव इति दिक् घटाविति सहृपैकशेषः विरूपैकशेषे नुपितरौ विमत्र जनकशरीरे
नेतद्गुणमात्रापित्रोरेवागमः विमत्रस्पन्नौ तत्पुत्त्वेनुपितरौ वाच्चेति योग्यत्वान् शाब्दिकनुलेक्षण
या स्वार्थे निरूढ्यत्वेनैवास्मतेवं ये जनकस्त्रीत्वेनरूपेण मानुबोधकं एकशेषलक्षणयावापितव
मातृत्वाभ्यां बोधकमिति तेनुगत्याः लक्षणाविमत्रपत्नीजनकशरीरत्वेनशाब्दिकरूपेणवाबोधः दंप
तीदम्भनामकरणो ब्राह्मणवानयेत्र तत्पुमान् स्त्रियेति विरूपैकशेषन्वा ब्राह्मणपदे श्वेपुंस्त्रोलेक्षणौव

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

व्लक्षरा।। ३

तस्यात्वविशिष्ट पुंस्त्वस्य

विभक्त्यंशपुंस्त्वस्याविवक्षितत्वयोः यो गणनाहि मन्तिरे व वाणक्ता पुंस्त्वस्य लक्षणया स्त्रीत्वस्य च बोधे

कान्तनु ब्राह्मणत्वेन शक्त्यैव ब्राह्मणीबोधसंभवे ब्राह्मणपदे लक्षणाव्यर्थेति चेन्न जाय वर्णा स्त्री

त्वरूपब्राह्मणीत्वेन बोधार्थं तदावश्यकत्वात् किंच तु विशिष्टमात्रापित्तो निजपुंस्त्वस्य ब्राह्मणत्वव्यंजकत्व

या ब्राह्मण्यां ब्राह्मणत्वाभावेन ब्राह्मणत्वेन शक्त्या न ह्योधाभावाह्म लक्षणैव अत एव ब्राह्मणीवधे प्राय

श्चित्तह्रासहस्त्याद्यः न च पुंस्त्व यहितस्य तद्व्यंजकत्वे गौरवात् अपकृष्टब्राह्मणवधदृष्टव्यापश्चित्तह्रास

स्यान्यथानुपपत्तेरिति शिवो नमस्कुर्यादित्यत्रा शिवपदं शिवदुर्गान्यतरत्वेन बोधकं शक्त्या शिवत्वे

न लक्षणया च शिवाया बोधकमिति तु नव्याः प्राचीनास्तु शिवत्वश्चातत्पुत्रौ स्वसृदुहितृस्यामिति वि

रूपैकशेषत्वात् मातृपदेन मातृस्वसारौ मोहरत्वेन पुत्रपदे न चा पतित्वेन पुत्रदुहितरौ लक्षे

१०

न्या॰रा तन्नेदं हीनमस्मादिति नञर्थैव विभुत्वादिना बोधकं प्रमापदं नेदंपदविरोधानुपपामात्रं एकमेवलक्षणं यावद्विभु
व्र॰टी॰ त्वादिनाबोधकमित्यस्याह उपपदसमासे कुंभकारः इत्यो पायीवहा पायीत्यादौ धात्वर्थनाम्नार्थयो
र्भेदेनान्वयस्यानुमततयालक्षणया कुंभादिपदानि कुंभविषयककृतिमत्कत्वहाद्यधिकरणकादिप्रापिति
कुम्भातिमेकोचेनुपपत्त्या कुंभादि विषयककृत्यादिसंबंधेनान्वयबोधइतिकर्मधारयेनीलोत्पलमित्यादौ नी
लाभिन्नमुत्पलमित्यभेदप्रकारकोबोधोऽनुभवसिद्धः नव्यवैयाकरणमतेकर्मधारयेपणक्रिकल
नान्समासान्ते नैवसाकल्यं तेनानुविशेषणतः कर्मधारयत्वेनेति सर्वत्रसमासे शाब्दिकः अन्यमतेनुनी
लपदस्यैव नीलाभिन्नेलक्षणेतिमतद्वयमपि निराचिको गुणहं नीलोत्पलमित्यादाविति अन्वय
विधयैवेति सक्सगामयोरद्येवेत्यर्थः एवकारेणप्रकारान्तरव्यवच्छेदः येननप्रकारकबोधोपपत्त्य

मभेदेहनिरणिकत्वेनेतिभावः। ननुनीलमुत्पलमित्यत्रसंभवत्पर्थसाधुत्वेशब्दसाधुत्वमन्याय्यमितिन्या
येननाविशेषणविभक्तिः प्रयोगसाधुत्वार्थिका। किंत्वभेदान्वयिकायकेवैतत् नीलमुत्पलमितिशा
ब्दसामग्रीकालेनीलाभेदाभाववदुत्पलमितिमानसप्रत्यक्षादिवारणायतत्रशाब्दसामग्र्याःप्रति प्र क॰ ३
निबंधकतायाभवताव्याख्यानात्। मन्मतेचनीलाभेदप्रकारकज्ञानस्यतत्रयोग्यताज्ञानविधयाप्र
वर्त्तकत्वेनविपरीतज्ञानोत्तरमन्यस्यनिर्णयंप्रतिविशेषदर्शनस्यहेतुतयातदभावादेवमान
सादिवारणात्। विशेषदर्शनस्यत्वेच तदभावव्याप्यवत्तानिर्णयरूपस्यप्रतिबंधकत्वेनशा
ब्दबोधस्येवानुदयात् नताद्दशशाब्दसामग्र्याःप्रतिबंधकतायांमानंचमन्मतेऽपिनीलस्याभे
दसंबंधेनान्वय स्वीकारेताद्दशसामग्रीकाले भेदसंबंधावच्छिन्नप्रतियोगिताकनीलाभा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्वेदमलमितिप्रसक्तादेरनुमादस्यविशेषदर्शनाभावादेवनिर्वाहइतिगाढ्यंतेषाप्यभेदप्रकारकबोधस्यो
कारेऽभेदेनीलस्यनिरूपितत्वसंबंधेनभानतयानीलमुत्पलमितिशाब्दबोधसामग्रीकालेनिरू।पित
त्वसंबंधेननीलाभाववानभेदइत्यादिप्रसक्षेप्रतिबंधकत्वांतरस्याकल्पनादितिविशेषणस्यविभक्ते
रभेदोऽर्थः एवंचनीलोत्पलमित्यत्राप्यभेदलक्षणावयवकीर्त्यासमसमासयोःसमानाकारकज्ञानत्व
नेकत्वनियमात्समानार्थकसमासारंभकवाक्यस्यैवविग्रहत्वात्नचैवंनीलाभेदस्यकल्पमुत्पलेऽ
न्वयोनामार्थयोर्भेदेनान्वयादितिवाच्यंसमासातिरिक्तस्थलएवतन्नियमादित्यतआहस्वतए
वेतियतएवकर्मधारयेनसमासत्वेनशक्तिर्नेगलक्षणाऽतएवेत्यर्थःवलीयानितिकर्मधारये
पादिसमासत्वेनशक्तिस्तुहिंतमुहबेपिशक्तिरेवेतितसुहद्धाहलीपत्तव्याघातःपदेचकर्म

Nepal Sanskrit University, Balmeeki Campus

धारये लक्षणया। न हि तत्पुरुषेपि सेतु मयपथा। पिवलीपत्ने व्याघात इति न कर्मधारये हानिः वस्याञ्च
विशेषणविभक्त्यभेदार्थकत्वमते व्याससमासयोः समानार्थकत्वानुरोधे नाभेदे लक्षणाव एव
कोनुक्तमिति वाच्यं आह रूढ्वा न राजन्यत्र व्यभिचारेण तादृश नियमाभावान् न हि दृष्टमुक्तं अभे
दस्यान्वयविधये वभागोपपत्तेरिति ननु राजपुरुषस्य न पि संबंधलक्षणानुपपत्तिः व्याससमासयोः समानार्थक
त्वनियमानुरोधेनैव तत्कल्पनात् नामार्थयोरिति व्युत्पत्तेश्च समासातिरिक्तस्थलस्यैव अन्यथा संबंधलक्षणयाप्य
निर्वाहादित्यत आह तत्र हीति तत्पुरुषे हीत्यर्थः पूर्वपदे राजपदे तादृशनियमाभावेपि संबंधप्रकारकबोधस्यानुभव
सिद्धत्वात् संबंधे लक्षणा कर्मधारये तु नैवमिति भावः ननु संबंधप्रकारकानुभवस्य दुर्भपत्वापि तुल्यः नास्ति चेद्
भयत्रापि मास्तिन्वनुभवेपि वाद इत्यत आह संबंधेति लक्षणोनुक्तमिति व्युत्पत्तेः संकोचे मानाभावात्समासा

नारी. समासयोः सर्वत्रापि नामार्थयोरभेदेनान्वयाद्राजपदस्य राजसंबंधिनि लक्षणा नीलस्य चाभेदे नैवोत्पले ऽन्वयप
प्रदी. न्नव्युत्पत्तिविरोधः इति कर्मधारये न लक्षणाकल्पनमिति भावः न च तत्पुरुषात्कर्मधारयस्य बलीयस्त्वमेवास्तु
मिति वाच्यं निषादस्थपत्यधिकरणविरोधापत्तेः तथाहि एतयेष्ट्या निषादस्थपतिं याजयेदित्यत्र निषादः स्थपति
र्यस्येति बहुव्रीहिर्लोकाद्युपपदलाक्षणिकत्वापत्तेरेवानन्वयात्मपदलाक्षणिकत्वमतेपि पुरस्कृत्य नैकपद्य पु.शी.हे
मपदलाक्षणिकत्वे तत्पुरुषस्यैव लघुत्वात्तत्र इति निषादानां स्थपतिरिति वा निषादश्चासौ स्थपतिश्चेति वा स
मासः तत्र षष्ठीतत्पुरुषस्वीकारे नामार्थयोरभेदेनान्वयाभावेन निषादपदस्य निषादसंबंधिनि लक्षणाव
श्यकत्वापत्तेरेवं कर्मधारये तु न तथेति तदपेक्षया लघुत्वात्कर्मधारयपर इति सिद्धांतः तस्य च कर्मधारयेपि
लक्षणाकल्पने आयातः ननु निषादस्य संकरजातीयत्वे तत्स्याग्न्युपायोपयुक्तापूर्वविधानपपत्तिः कल्पने गौ

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDP

रवं एवं स्त्रीमृट्ठी नाथी पाता मित्यत्र संकोच कल्पनं चेतिन दुपेदस्य न्पुंसक एव साधुः न चात्र मृट्टपदस्य निषादेन
मृट्टपरत्या संकोचे निषादस्य वेदाध्ययनप्रसंगः अध्ययनपदस्य पाठोपयुक्ते तदध्ययनपरत्वे च मृट्टं
नरस्यापि पाठोपयुक्ताध्ययनप्रसंगात् तिवाच्यं विशेषतः प्राप्तेत्तदध्ययनपरत्वात् अध्ययनपदस्यैतेन नि
षादस्य पाठोपयुक्त वेदे तत्र वेदनिषेधः मृट्टांतरस्य तु पावदृष्टदपोरेवं तस्याविशेषतः शास्त्रभावादिति चेन्नैव
वं लाघवात् कर्मधारये प्रवृत्ते उत्तरमपूर्वविधाप्रयुक्तेः कल्पनस्य फलमुखत्वेन न्याय्यत्वात् ताकिं तर्गौरवस्य चा
प्रतिबंधकत्वात् कर्मधारये पिलक्षणाकल्पने तु तत्पुरुषापेक्षया लघुत्वाभावेनापूर्वविधाप्रयुक्तेः कल्पन
गौरवग्रस्त तेन तत्र कर्मधारयस्यैव कारणेन पर्यक एवस्यादिति। तत्र लक्षणानंगीकारे एव साधुः ननु
लक्षणाया अभावेपि कर्मधारयस्य एवत्वो क्लिपतेन तत्पुरुषस्य त्वेजामाकः शक्तिलक्षणोतानयोः प्राव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्या.री.

व्र.टी.

बोधे हेतुताया विशेषाभावात् न च मुख्यार्थपरत्वे संभवति लक्षणार्थपरता या अन्याय्यत्वादिति न्यायपरवशरणामि
तिवाच्यं असति विशेषतो बाधके कर्मधारयविधयैव बेहनां प्रामाण्येन तत्पुरुषविधेयतायोगित्वमतेविसु
वचनात् तस्मात् कर्मधारये समासत्वेन शक्तेः लक्षणाया वा स्वीकारेपि वलोपस्त्वमुपपादयितुं शक्यः न तु
वेति चेन्न शक्यसंबंधरूपलक्षणाज्ञानस्य विनाशात् ज्ञानमसंभावितया शक्तिज्ञानादेव सिद्धं तद्बीजत्वादि
स्मलंपक्षविवे नाननुतत्पापि वित्रगुधन । तिस्मन्न बहुव्रीहिगर्भतत्पुरुष षष्ठ्यस्थले बहुव्रीहिलक्षणोत्तरं तत्पुरुष
षे लक्षणास्वीकारे लाहितलक्षणास्वीकारापत्तेः बहुव्रीहेरन्यपदार्थसंबंधेत्रिस्त्र नुणास्तनाभावान्वय
परासंबंधेनैकलक्षणायाः निर्वाहात् बहुव्रीहेः णत्वे स्वीकारस्यावश्यकत्वात् समासत्वेन सर्वैश्च बसमासेत
त्कल्पनमिति चेत् । त्रिगुपदस्य बहुव्रीहिलक्षणायाः अन्यपदार्थपरत्वेन तत्संबंधे । निपरंपरासंबंधे न तस

Nepal Sanskrit University, Balmiki Campus

ष्टबलस्मरणाद्योबलस्मरणाद्गुणादेव पुराणपटत्वप्रबोधोपपत्तेः पुराणपट इतिद्वयविरोधस्य च मणिकृन्मतेऽनं
गीकारादित्यत्र घटः पट इति नञ्जनितमुख्यबोधघटाभिन्नः पट इत्यन्वयबोधस्यानुभवविकल्पान्यत्वम् संसर्गा
भावमात्रवाचकत्वेन ततोऽन्योन्याभावप्रकारकबोधस्यासंभवितया घटाभिन्नेसमासप्रसक्तेरिति मतं दू
षयति नञ्जनितमुख्यबोधीतिघटसंबंधिपदमिति घटसंबंधिनिलास्यानकमित्यर्थः संबंधश्चात्र प्रतियो
गित्वं च नञ्पदलभ्यमिस्रेव शब्दार्थत्वान्न तत्र शक्तिरिति भावः कथं तर्ह्यन्योन्याभावप्रकारकबोध इत्यत आ
ह नञ्पदे चेति नञ्संसर्गाभावोऽन्योन्याभावश्चनञर्थ इति संसर्गाभावत्वमन्योन्याभावत्वं च शक्यताव
च्छेदकमिति नञ्पदस्य नानार्थकत्वकल्पनापेक्षयाऽन्योन्याभावे लक्षणैवोचिताः नञ्पदलभ्यमिस्रेव श
ब्दार्थत्वादित्यभिप्रायेणाह संसर्गेति अन्योन्याभावमात्रवाचकत्वे घटस्याप्यभावद्शाब्दबोधे स्यादृशाब्दो

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्या·टी चेत्कपाले घटो नास्तीति बुद्धेरनुदयप्रसंगः ध्वंसप्रागभावप्रतियोगिताभिश्रिताभिः सह अत्यन्ताभावस्य समाचो
व्र·टी मते विरोधादत्यन्ताभावविषयकत्वासम्भवात् अतो ध्वंसादिविषयकत्वमेवोपेयं न च तत्स्वाधारण्या
पसंसर्गाभावेति संसर्गाभावत्वं च संसर्गारोपजन्यप्रतीतिविषयो ऽत्यन्ताभावत्वं ध्वंसप्रागभावदशा
यां कपाले घटो नास्तीति धीर्ध्वंसादिविषयिणी अत्र चोत्तरकालीनत्वविशिष्टसमवायः प्रागभावस्य पूर्व
कालीनत्वविशिष्टसमवायश्च ध्वंसस्य प्रतियोगितावच्छेदकसंबंधः अस्माकं हि प्रतिषिध्यत इत्याया उ
त्पत्तेः पूर्वं उत्तरकालीनत्वविशिष्टसमवायेन कपाले घटस्याभावात्तेन संबंधेन कपाले घटो नास्ती
ति संसर्गारोपानंतरं घटो नास्तीति बुद्धिः एवं ध्वंसदशायां पूर्वकालीनत्वविशिष्टसमवायेन घट
स्याभावात्तेन संबंधेन कपाले घटो नास्तीति संसर्गारोपानंतरं घटो नास्तीति बुद्धिः अत्यन्ताभावे तु सं

योगमात्रेणैव घटवृत्तिपटत्वेताभावधीः नचान्योन्याभावत्वप्रसक्ते तादात्म्यारोपस्य हेतुतया तादात्म्यस्या
पिसंसर्गत्वेनान्योन्याभावेः निष्ठाप्तिरिति वाच्यं संयोगादिसंबंधेएवमारोपयोगात्संयोगादिष्वेवसं
सर्गत्वव्यवहारात्तादात्म्यातिरिक्तत्वेनसंसर्गत्वप्रवेशेगौरवान्नचतथापिनेमकारकाभावप्रसक्तस्ववारणापा
भावत्वेकिंकप्रसक्तेप्रतियोगिज्ञानस्यहेतुतायाआवश्यकत्वेप्रतियोगिसंसर्गारोपहेतुत्वेमानाभाव
इतिवाच्यंएकदानानासंबंधावच्छिन्नाभावप्रसक्तस्ववारणायतत्तत्संबंधावच्छिन्नाभावप्रसक्तेतत्तत्सं
सर्गारोपस्यापिहेतुत्वात् नचध्वंसप्रागभावयोः प्रतियोगितावच्छेदकसंबंधेमानाभावेनकपतनस्य
त्वप्रसक्तेःप्रतियोगिसंसर्गारोपःकारणमितिवाच्यं अनुभवबलेनप्रतिबध्यप्रतिबंधकभावानुरोधे
नवात्यन्ताभावस्यैवतयोरपिप्रतियोगितावच्छेदकसंबंधांगीकारान्नतथाहि अत्यन्ताभावस्यैवध्वंसप्रा

व्याप्ति· टी·

गभावयोरपि तन्नद्रूपेण तत्कालावच्छेदेन प्रतियोगिमत्ताज्ञानानुदयात् समवायेन तद्घटवत्ताज्ञाने प्रति
तद्घटत्वावच्छिन्नप्रतियोगिताकात्यन्ताभावप्रागभावादिमत्ताज्ञानत्वादिना प्रतिबंधकत्वं तत्र यमपे
ह्यसमवायेन तद्घटत्वावच्छिन्नप्रतियोगिताकाभाववत्ताज्ञानत्वेनैव प्रतिबंधकतयाऽत्यन्ताभावस्यैव त
योरपि संबंधावच्छिन्नविशेषधर्मावच्छिन्नप्रतियोगिताकत्वं वा विशिष्टाकारेण तथात्वसंसर्गाभावत्वेन हि २
शक्यतावच्छेदकं न चान्योन्याभावत्वमेव तथा स्यादिति वाच्यं सामान्ये पक्षपाते तदर्शने न्यायेन ध्वंसप्रा
गभावादिसाधारणतत्संसर्गाभावत्वस्यैव तथात्वात् न घटः पट इत्यादौ सामानाधिकरण्यानुरोधेना
न्योन्याभाववृत्तित्वस्य स्वीकारात् अन्योन्याभावे नञः एतन्मात्रयोगाभावाच्च चैत्रो न पचतीत्यत्र चैत्रस्य भूतले
न घट इत्यादौ मन्मते नञो मुख्यार्थतासंभवादित्याशयः लाघवेनात्यन्तसंसर्गाभावत्वे समर्गारोपजन्य

तीति विषयाभावत्वमिति तदपेक्षया तत्र विषयत्वेनाभावत्वस्यैव लघुत्वेनोभयत्रैव शक्तिरिति भावः ननु सं
सर्गाभावत्वत्वसंसर्गारोपजन्यप्रतीति विषयाभावत्वसंसर्गारोपस्य हि अनाहार्यस्य हेतुत्वेऽ नाहार्य
बाधबुद्धेः प्रतिबंधकतयाभावप्रत्यक्षस्यानुपपत्तिः आहार्यस्य च तत्सत्त्वे बाधाभावेनासंभवः बाध
कालीनेच्छाजन्यज्ञानस्यैवाहार्यत्वात् यदि च बाधसामग्रीकालिकस्याप्याहार्यत्वमिष्यतेति मन्यते तथाप्य
भावत्वे लौकिकप्रत्यक्षे एव प्रतियोगिसंसर्गारोपस्य हेतुतयाऽतीन्द्रियाभावेऽव्याप्तिः नच संसर्गावच्छिन्नप्र
तियोगिताकाभावत्वेन तत् संयोगवन्योन्याभावेऽतिव्याप्तेः संयोगेन तादात्म्यस्य संयोगरूपत्वेन तस्यापि
संसर्गावच्छिन्नप्रतियोगिताकत्वात् संसर्गतया तादात्म्यतया चावच्छेदकतावैलक्षण्येऽदुर्वचं एवं ता
दात्म्यावच्छिन्नप्रतियोगिताकाभावत्वेनान्योन्याभावत्वं संयोगसंबंधावच्छिन्नप्रतियोगिताकसंयो

माथे. ण्पत्वेनाभावेः तिथ्यात्रैः सँयोगितादात्म्यसंयोगाद्रूपवत्पानादात्म्यावच्छिन्नप्रतियोगिताकत्वात्तादात्म्य
टी. त्वेनतादात्म्यावच्छिन्नत्वोक्तौ च तादात्म्यत्वस्यातिरिक्तत्वोपगम एव निर्भर इति संसर्गाभावत्वान्योन्याभा
वत्वयोर्द्वयमेवेति किं तद्रूपेणाभावत्वे लाघवं न च सामान्यतादृग्भावत्वं लक्ष्यमिति वाच्यं सामान्यधर्मस्यावच्छे
दकत्वेनस्पष्टशक्तैवाभावबोधोपपत्तौ लक्षणांशे नैवोपपत्तिरिति स्पष्टैव बीजतया संसर्गाभावत्वादीनामप्रवे
ऽत्वेनस्पष्टायत्तसंसर्गाभावत्वप्रकारकबोधस्तत्राभावत्वप्रकारकबोधस्य कल्पत्वात्तत्त्वेनस्फुटतेन तत्संभवादि
त्यतश्चाह वेति गमनेति संसर्गाभावत्वस्यातिरिक्तत्वे ऽभावत्वस्याप्यतिरिक्तत्वेन तद्रूपेणाप्यनवच्छेद
कमित्यर्थः अभावमात्र एवेति संसर्गाभावे ऽन्योन्याभावे चेत्यर्थः तच्छब्दत्वेनेति नञ्शक्यत्वावधारणा
दित्यर्थः इति संप्रदायानुसारिणो व्याख्यातारस्तु न नञभावत्वस्य नञ्शक्यतावच्छेदकत्वे घटो नास्ती

न्यत्र संसर्गाभावत्वप्रकारको बोधः घटो नेत्यादौ त्वन्योन्याभावत्वप्रकारको बोधः कथं स्यात् घटादिच संसर्गा
वच्छिन्नप्रतियोगिताकसंसर्गाभावविषयकशाब्दत्वादेः कार्यतावच्छेदकतया तादृशानुभवोपप
त्तेरिति विभाव्यते तत्राप्यभावइतिप्रतीतेरवश्यक्लृप्तत्वात् नाभावत्वध्वंसत्वादिविषयकत्वेनैवोपप
त्तौ अतिरिक्ताभावत्वे मानाभावइति नाभावत्वे शक्यतावच्छेदक मत आह विनिगमनेति संसर्गा
भावत्वमिवान्योन्याभावत्वमपि शक्यतावच्छेदकं निगमनाविरहादिति भावः भूरिप्रयोगस्य संसर्गाभाव
इवान्योन्याभावेपि सत्त्वात् विपरीतः प्रतीयमानेप्यर्थे शक्त्यस्वीकारे नानार्थोच्छेदापत्तेः चैत्रो न पचतीत्या
दौ वैयाकरणमते कर्तुर्वाच्यत्वात् अस्माकमपि प्रत्याख्याते कर्तरि लक्षणाया तदापत्तेः एवान्योन्याभावस्य नञाप्र
त्यायनसंभवात् जिज्ञासापदादि च घटो नास्तीत्यत्र संसर्गाभावत्वप्रकारक एव बोधः स्यानुभाविकः ध्वं

न्या.ए.
टी.

सप्रागभावयोरत्यन्ताभावाविरोधित्वेमानाभावेनध्वंसप्रागभावकालेघटोनास्तीतिबुद्धेरत्यन्ताभावविषय
कत्वेनैवोपपत्तेरिति ॥ विभाव्यतेत दात्वत्यन्ताभावत्वमन्योन्याभावत्वं चशम्मनावछेदकमितिमे तत्वं प्र
त्रचघटवतिभूतलेप्यस्ति, किंचिद्घटप्रतियोगिकाभावसत्वात्भूतलेघटोनास्तीतिबुद्ध्यापत्तिवारणाय
न्वेमितावछेदकावछिन्नप्रतियोगिताकत्वेऽप्यसतिवललभ्यंतत्रघटत्वावछिन्नप्रतियोगिताका
भावविषयकत्वाद्त्वावछिन्नप्रतियोग्यं, किंचित्पदासमभिव्याहृतघटपदसमभिव्याहृतनञ्पदस्ता
नत्वेनकारणतातेननीलोघटोनास्तीत्यत्रनघटत्वावछिन्नाभावधीः ॥ किंचित्पदे च नीलादिपद
त्वेनादेशिष्योपादेयंतेनभूतलादिपदसमभिव्याहारेपिनदोषः ॥ नव्यतत्वापिनीलेघटोना
स्तीत्यत्रानुपपत्तिः अभेदेननीलादिसाकांक्षत्वेनास्तीतितद्रूपान्तर्केबुद्धौवादिमात्रास्ति

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्यादेतत् संभवति लघौ गुरौ तदभावादिति न्यायेन कंवुग्रीवादिमत्त्वस्य घटत्वापेक्षया गुरुत्वेनानवच्छेद
कतया कंवुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिताकाभावबोधो भ्रमात्मक एव यद्यपि कंवुग्रीवादिमत्त्वा
वच्छिन्नप्रतियोगिताकत्वस्यैव सिद्धान्ते न संबन्धेन कंवुग्रीवादिमतो नाभावोपरि भ्रमः तथापि संसर्गां
क विषयतायामपि प्रकारतात्वविशेष्यतात्वोपगमे न प्रतियोगितायां कंवुग्रीवाद्यवच्छिन्नत्वांशे भ्रम इति
बोध्यं केचित्तु घटो नास्तीत्यादौ प्रतियोगितया घटस्य त्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेन च घटत्व
स्याभावोपरि भानं कंवुग्रीवादिमान्नास्तीत्यत्र तु घटत्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेन कंवुग्रीवादिमत्त्व
स्याभावोपरि भ्रमः त्वावच्छिन्नप्रतियोगिताकत्वस्यैव त्वस्य संबन्धतादित्याहुः अप्रामाण्यमावेद्यत्रांके तेन नु
न घटद्वयमिति अभावघटयोरिति प्रतियोगितया घटस्याभावोपरि बोधो यत्नेऽन्वयः घटपदे योति अपिनान

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मारी॰ न्यदसमुच्चयः। नामार्थयोरिति नीलो घट इत्यत्र नीलघटयोरभेदेनान्वयाभेदेनेति। अभेदातिरिक्तसंबंधेनेत्य
टी॰ र्थः। तथा च नञर्थाभावे प्रतियोगितासंबंधेन घटस्यान्वयो न संभवति लुप्तसुबंतत्वेन नञोऽपि नामत्वादि
ति भावः। कथं तर्हीति। नामार्थयोरिति व्युत्पत्तेः स्वीकारे हीत्यर्थः। न घट इत्यत्र प्रथमायाः शब्दसाधुत्वात्प्र
तियोगितासंबंधेनैव नञर्थान्योन्याभावे घटस्यान्वय इति भावः। अर्थसाधुत्वे संभवति शब्दसाधुत्वस्या
न्याय्यत्वात्प्रथमायामेव लक्षणामाह। प्रथमायां वेति। षष्ठ्यर्थे प्रतियोगित्वे। ननु सुब्विभक्तौ लक्षणा
न संभवति कर्तृकर्मणोः कृतीति व्याकरणानुशासनेनैव षष्ठ्यापत्तेः। कर्तृत्वकर्मत्वरूपकारकबोधस्य षष्ठ्या
त्व इष्टं। विशिष्टे लक्षणायैवोपपादयितुं प्राकमन्ता। इत्यभिप्रायेणाशंकते नन्विति। न हि सुब्विभक्तौ लक्षणा
नेऽगीकारे हि षष्ठीतः। भारतस्य प्रकृतौ व्यासमस्यकृतेरितिकर्तृकर्मषष्ठीयोगाविहि न षष्ठीतः। कर्मणेति।

कर्तृत्वेनस्यपिवोध्यं शेषेषष्ठीत्यनेनसंबंधमात्रशक्तषष्ठीतः संबंधत्वेनबोधसंभवेपिकर्तृत्वत्वेनकर्मत्व
त्वेनबोधोनसंभवतीतित्याबोधोयपत्तपेलक्षणास्वीकारश्यावश्यकः' नचावश्यकत्वस्यशक्तिनि
यामकत्वपाकर्तृकर्मकृद्योगविहितषष्ठीत्वेनकर्तृत्वत्वादिनाशक्तिरेवास्तामितिवाच्यं अनन्यलभ्यस्य
शब्दार्थत्वादितिभावः' असंदिग्धस्थलमुदाहरतिकथंवेतिएकस्यांस्त्रीव्यक्तौदाराइत्यतीतिदाराःइति
वग्रस्यवेतिबहुवचनांतएवदाराशब्दः साधुरितिभावः यद्यपिग्रहस्यमर्थेहजातिसंख्यावाचकत्वेसुपां
तनुतत्वाग्रहजातिसंख्यावाचकत्वमितितद्गतगुणानादायबहुत्वानुपपत्तिःसंभवत्येवतथाप्येकोघटाइत्य
त्रोप्यसाधुत्वस्यानाभावइत्यपोघटगतगुणानादायबहुत्वानुपपत्तिः' नचभवन्मतेपिबहुवचन
लक्षणाएकत्वबोध्यतामितिवाच्यंएकइत्यपदेनैकत्वबोधसंभवेघटाइतिबहुवचनस्यैकत्वेता

न्यासे॰ स्वर्यान्न हेत्वात्लक्षणाभावात्क नबोधकारणतं भवान् प्रकृतेच समभवत्संयथ साधुत्वे शब्द साधुत्वस्यान्याख्यात्वादि
ति शास्त्रानुशासनिकीर्तिः इयं लक्षणोपष्ठ्याः कर्मत्वे बहुत्वं च नास्य चैकत्वे लक्षणोर्थः इष्टैवेति कर्तृकर्म
णोः कृतीति व्याख्यानुशासनक्रियासु द्वितीया नो न लक्षणेन स्यानुशासित विभक्त्यर्थानिति रिक्तेन लक्षणे
नैव तदर्थ इति भारतस्यस्वरणामित्यादौ विभक्तौ लक्षणोपपत्तावपि न घटः पटः इत्यत्र प्रयोग्यायो
क पं लक्षणानपानुशासनाभावादिति भावः तुल्यमिति ग्रहतेपि नत्समप्यव्याल्लृत्त घटपदेशा
प्रयमापामप्यानुशासनिकी लक्षणा संभवतीति तुल्यमित्यर्थः अनुशासनमेवाहं नादृदमाह इति
ति नियतेति नियतः शक्तियो गोवाचकपदेन नियतः प्रयोगो येषां ते के चिद्व्याजलाशे न त्यापा प्रति
यो गोवाचकपदार्थान्वितत्वापपंबोधकाः के चिद्व्यापाप्रतेयावत् नष्टानि नकदापि प्रयोगः

किं तु न घट इत्यादिरूप एवं नञा च तादात्म्यप्रतियोगिवाचकपदार्थान्वितत्वमभेदे न विभक्त्यर्थद्वारा एवा
नञ्च घटपदस्य घटप्रतियोगिके लक्षणायामभेदे नञ्प्रथमायाः प्रतियोगित्वे लक्षणापांनु विभक्त्य
र्थद्वारान्वयः घटपदे लक्षणायां प्रथमायाः शब्दसाधुत्वमात्रकल्पनापेक्षयाप्रथमाया एव प्रतियो
गित्वे लक्षणौचित्येनत्रापि प्रतियोगित्वे लक्षणानुशासनिकीति भावः यद्यपि प्रतियोगित्वरूपा
र्थे प्रथमेति न व्याकरणप्रतिपादितं तथापि तात्पर्यानुशासनं नामार्थे न त्रैवेमत्तु पाणिनित्वमिति
ध्येयं। शंकते नत्वेति नञर्थेति न घटः पट इत्यत्र घटान्योन्याभावस्य पटे कथमन्वयः नामार्थ
योरभेदातिरिक्तसंबंधेनान्वयबोधासंभवादित्यर्थः शंकते नन्विति नञा च न नामार्थयोरन्वयः
किं तु विभक्त्यर्थेन नामार्थयोरिति भावः नत्विति न घटः पट इति वाक्यादित्यर्थः शंकते नन्वस्मदभि

न्या॰ री॰ टी॰

तिन तत्पर्याप्ताभाववत्तः पटे भेदे नैवान्वय इति नैतत्सुन्दरमिति विशेष्य इतिभावः । घटस्येति तन्नोऽभाववत्तिल
क्षणाया घटस्य प्रतियोगितासंबंधेनाभावेऽन्वयो वाच्यः । स च न संभवतीति भावः । नद्वेवह्न नस्येति अभा
वस्येत्यर्थः । पदार्थैकदेशेति नञोऽभाववदर्थकत्वपक्षे अभावस्यैकदेशत्वादित्यर्थः । गोनिःस्य पशुरपशुरित्यादौ
सविशेषणे हि विधिनिषेधौ विशेषणमुपसंक्रामतः सति विशेष्ये बाधे इति न्यायेन ह्यगौरित्यत्र
ति वत्तित्वस्यत्यागोऽन्यः अन्वयप्रयोजकार्थः पदार्थे नान्वेति नञ्नुपदार्थैकदेशेनेति नियमस्यावश्य
कतया नञर्थाभाववदेकदेशेऽभावे घटस्य प्रतियोगितयाऽन्वयासंभव इतिभावः । तथापीति शे
षोपाधिमत्तयैवैतेमेव मिति तिससंबंधेन तिनामार्थयोरिति सुतस्मान्नञोभाववत्तिलक्षणैव अ
भाववत्तत्त्वमेदे नैवपटेऽन्वय इति न नामार्थयोरिति सूत्रमिति विशेषः । पदार्थः पदार्थेनान्वे

ति ननु पदार्थैकदेशेनेति व्युत्पत्तेस्तु संबंधे घटपदार्थातिरिक्तस्य लक्षणयाप्युपस्थापितत्वेन तत्र घटाभाववदे
कदेशाप्यभावे घटस्यान्वयेबाधकाभावइतिभावः ननु व्युत्पत्तिसंकोचे प्रमाणाभावइत्यत आह यत्रेतिज
नकत्वइतिजनकपुंस्त्वेहि पितृत्वं तत्र चैत्रैकदेशजनकत्वे पर्यावसितमिति पितृत्वसंबंधेनान्वयइत्यर्थः तथा
च व्युत्पत्तिसंकोच आवश्यक इति भावः ननु चैत्रस्य पितेत्यादौ जनकपुंस्त्वरूपपितृत्वैकदेशजनकत्वे
चैत्रस्यानन्वयः किंतु तन्निरूपितजनकत्वसंबंधेन पितृपदार्थ एवेति न पदार्थः पदार्थेनान्वयेनेति
व्युत्पत्तिसंकोचः एवं च घटवद्भूतलमित्यादौ घटपदस्य घटत्वप्रतियोगिकत्वलक्षणया घटत्वप्रति
योगिकस्वत्वाभिन्नाभावाश्रयतासंबंधेन प्रथमापाः प्रतियोगित्वे लक्षणयानुघटस्य घटत्वप्रतियो
दित्यर्थः। स्थाणौ पुरुषत्वभ्रमे व्यभिचारवारणाय करादिमद्विशेष्यकत्वे सति पुरुषविशेष्य
कघटत्वप्रकारकज्ञाने व्यभिचारवारणाय पुरुषत्वप्रकारकज्ञानत्वादिति विशिष्टहेतुत्वं घा
वत्त्वं एवं प्रतिपन्नवं द्वितीयानुव्यवसायेनागृहीतप्रामाण्यकपुरुषघटज्ञानवदित्यर्थः। पुरुषत्वज्ञानपि
त्रस्पष्टं ज्ञानत्वे चान्तःस्पष्टं ज्ञानताप्यावाच्यतिरेकी स्यादित्यत आह पुरुषत्ववति पुरुषत्वज्ञाने तत्र
करादिमति पुरुषत्वज्ञानं पक्षत्वाप्यात्तौ पुरुषत्वभ्रमत्वव्यतिरेकीत्यर्थः। प्रथममिति द्विती

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

१०

व्या॰ पानुव्यवसायेन प्रामाण्यग्रहात्पूर्वं तदभाववति तत्प्रकारकत्वरूपमभावरूपाप्रामाण्याभाव एव व्यतिरे
१५७ किणा साध्यत्वस्यार्थः ' तदप्रसिद्ध्या साध्याप्रसिद्ध्या तदभावाप्रसिद्धिः ' साध्याभावाज्ञानेन तस्य साध्याभा
वस्य प्रतियोगिरूपत्वात् अप्रामाण्यरूपत्वात्तेन चेति तेन हीत्यर्थः ' तथा च तदभाववत्त्वेन ज्ञाने प्रतिपा
मिज्ञानं कारणमिति भावः ' नन्वेवं कथमप्रामाण्याभावानुमितिरित्यत आह एवं चेति व्यापकतयापु
स्वभावरूपाप्रामाण्यस्य व्यापकतया हेतुभावो गृह्यते तेन हेतुज्ञानस्याभावः अप्रामाण्यस्याभावः क्षि
ध्यतीति अप्रामाण्याभावज्ञानं विनाप्यप्रामाण्याभावानुमितिरिति भावः नव साध्येति विशिष्टहेतुद्देवि
शेषणाद्वियोहेतुत्वादिति भावः ' अप्रामाण्येति ज्ञाने प्रामाण्याभावत्वाकारिकापाद इत्यर्थः ' साध्यवि त्प्य॰
शेष्यकानुमितौ साध्यप्रसिद्धेरनंगत्वादिति भावः ' आत्मापीति प्रथममप्रामाण्याभावानुमितिरसोत

२४ प्रामाण्यमेव निवेशनीयं । तस्य च प्रथमं साध्याप्रसिद्ध्यादिना दुर्ग्रहत्वात् अनुमानेन प्रथमं प्रवृत्त्युपपत्तेरि ४२

हृत्तीति उक्तेर्व्द्वितीयानुव्यवसायेन प्रामाण्यग्रहानंतरमन्वयिना प्रामाण्यानुमितिरेव गतिरित्यर्थः । अयं भावः स्वि-
ष्कंपप्रवृत्तिं प्रति गृहीतप्रामाण्यकनिष्कम्पत्वेन हेतुत्वे भावरूपप्रामाण्यनिवेशे गौरवात् अभावरूपं तद्वति त-
त्प्रकारकत्वरूपं प्रामाण्यग्रहस्य तन्निरुक्तानं हि विधं तदभाववति तत्प्रकारकं तद्वति तत्प्रकारकं च तत्र तदभा-
ववति तत्प्रकारकत्वाभावरूपप्रामाण्याभावः सिद्ध्यन् तद्वति तत्प्रकारकत्वमादायैव पर्यवस्यति आप-
कतानवच्छेदकरूपेणाभावानामनुपगमेन तत्प्रकारकेतदभाववति तत्प्रकारकत्वाभावस्य तदभाववद्विशे-
ष्यकत्वाभावमात्रपर्यवसायितया तदभाववद्विशेष्यकत्वे सति तत्प्रकारकत्वेन हेतुता तद्वति तत्प्र-
कारकत्वेन तद्वद्विशेष्यकत्वमात्रपर्यवसन्नं सिध्यतीति चेन्न व्याप्तितद्वद्विशेष्यकत्वरूपसाध्याप्रसि-
द्धेः प्रामाण्यवीयसंस्कारादिहेतुविशेषोहेतुघकसहकृतात् तस्य सुपगमेतु समर्थ्य प्रवृत्तिजनकत्वरूपात्व

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ध्या· यिनैवोपपत्तौ किमनयाकुसृष्ट्या पूर्वं चैत्रत्वादिघटितप्रामाण्यग्रहे प्रामाण्यवीयसंस्कारासंभवाच्चेति न किंचि
१५१ देतत् किंचाप्रामाण्याभाववत्त्वमपि प्रामाण्यप्रत्ययं हेत्वसाने दुर्ग्रहमित्याह किंचेति कदाचिदिमाहृशोप्यक
त्वे सति पुरुषत्वप्रकारकज्ञानत्वहेतुः अप्रामाण्याभावग्रहे हेतुः केनचिल्लक्ष्यो किंजन्यज्ञानविषयः अनु
व्यवसायेनेति उक्तन्यायेन द्वितीयानुव्यवसायेनेत्यर्थः तत्प्रकारकत्वग्रहः पुरुषत्वप्रकारकत्वग्रहः य
तः इति कर्पादिपतिपुरुषत्वज्ञानत्वग्राहकेणानुव्यवसायेन पुरुषत्ववति पुरुषत्वप्रकारकत्वग्रहासंभ
वादित्यर्थः तमपहायेहेतुग्राहकेण पुरुषत्ववति पुरुषत्वप्रकारकत्वग्रहे सतिनेन प्रामाण्यानुमानमपि
ति अनुमानकुसृष्ट्यादरत्यर्थः सर्वज्ञानानां यथार्थत्वात् तत्प्रकारकज्ञानत्वमेव प्रामाण्यमिति प्राभाकरम तम·
तं दर्शयति अन्ये त्विति तत्प्रकारकज्ञानत्वमेवेत्येवकारेणातद्वतीत्यस्य व्युदासः नचैवं शुक्ताविदं रजतमिति

ग्रहमपहाय·एव·कुसृष्टीति· अनुव्यवसायेन करादिमाहिरोप्यकत्वेसति पुरुषत्वप्रकारकत्व ×३

Sanskrit University, Balmeeki Campus, Kathmandu

ज्ञानस्यापि रजतत्वप्रकारकत्वेन तदपि रजतत्वांशे प्रमास्यादित्यर्थः । तदसिद्धेरिति रजतत्वप्रकारकशुक्ति
ज्ञानासिद्धेरित्यर्थः । तदसिद्धिमेव विवृणोति नहीति । नहीत्यस्य शुक्तौ रजतत्वं नास्तीति तत्र कथं रजतत्वप्रका
रकं ज्ञानं विषयाभावेन तस्य किं कस्य प्रसक्त्याद्यभावादिति भावः । मानमस्ति प्रमयाप्रमस्ति व्यवहारानुपपत्ति
रेव मानमिति शंकते कथं तर्हीति रजतत्वप्रकारकशुक्तिज्ञानासिद्धावित्यर्थः । व्यवहारः प्राक्प्रयोगं
तव्यवहर्तव्यज्ञानस्य हेतुत्वादिति भावः । तत्रेति व्यवहर्तव्यतावच्छेदकासंसर्गाग्रह एव व्यवहारे कार
णं न तु व्यवहर्तव्यतावच्छेदकप्रकारकं ज्ञानमिति भावः । न तु प्रवृत्तिं प्रति पुरोवर्तिनि इष्टतावच्छेदकप्र
कारकज्ञानस्य हेतुतया शुक्तिगोचररजतत्वज्ञानाभावे कथं तत्र रजतार्थिप्रवृत्तिरित्यत आह रजतत्वे
ति तत्रेष्टत्वेति पुरोवर्तिनीष्टतावच्छेदकासंसर्गाग्रह एव प्रवृत्तिहेतुः न त्विष्टतावच्छेदकप्रकारकज्ञा

न्या·री· नं तद्धेतोरिति व्यापारादिति भावः अप्रवृत्तिभ्रमप्रमासाधारणप्रवृत्तिसामान्ये रजतत्वप्रकारकज्ञानस्य सत्यरज
१५२ तस्थले प्रवृत्तिहेतुत्वेन अवधारणात् किं च तेन विना भ्रान्तप्रवृत्तिरिति भावः तेन विनाप्युक्तो रजतत्वप्रकारक
ज्ञानेन विनाप्युक्तो प्रवृत्तिः रजतार्थिप्रवृत्तिः तत्रापि प्रामाण्यस्थलेपीत्यर्थः रजतत्वेति पुरोवर्तिनीष्ट
तावच्छेदकासंसर्गाग्रहस्यैव हेतुत्वादित्यर्थः नन्विष्टतावच्छेदकप्रकारकज्ञानस्येति भावः अविशेषा
दिति कारणविशेष एव हि कार्यविशेषनियामकस्तथा च तद्विशेषात्कथं प्रवृत्तेः संवादित्वविसंवादि
त्वनिर्वाहः मन्मते च प्रवृत्तिसामान्ये इष्टतावच्छेदकप्रकारकज्ञानत्वेन संवादिप्रवृत्तिं प्रतीष्टतावच्छेदकप्र
कारकप्रमात्वेन विसंवादिप्रवृत्तिं प्रति चेष्टतावच्छेदकप्रकारकभ्रमत्वेन हेतुत्वमिति मम त्वयास्त्यातिसिद्धिरि राम·
ति भावः संवादिनी विषयसंवादिनी अबाधितविषये तिभावः एवं विसंवादिनी बाधितविषयेत्यर्थः तद् १५२

नीतिं समरजतस्थले रजतत्ववति रजतत्वासंसर्गाग्रहस्य विद्यमानत्वात्संवादिप्रवृत्तिः शुक्तिरजतस्थले तु रजत
त्वाभाववति रजतत्वासंसर्गाग्रहस्य विद्यमानत्वाद्विसंवादिनी प्रवृत्तिः अत एव संवादिप्रवृत्तावविद्यमानासंस
र्गाग्रहः विसंवादिप्रवृत्तौ तु विद्यमानासंसर्गाग्रहो हेतुरिति गायंति अविद्यमानयोः संसर्गस्तदग्रहः विद्यमा
नयोः संसर्गस्तदग्रह इति चतद्र्यौवसेयः लाघवादिति इष्टतावच्छेदकासंसर्गाग्रहत्वापेक्षया कारणतावच्छे
दकलाघवादिष्टतावच्छेदकप्रकारकज्ञानमेव रजतत्वप्रकारकप्रवृत्तौ हेतुरित्यर्थः एतेन नन्विष्टतौ रितिव्याप्योपि
पात्तः अवच्छेदकलाघवेन तज्ज्ञानस्याप्रयोजकत्वात् अनुमितौ परामर्शवदिति तदसंभवः रजतत्वसंसर्गाग्र
हासंभवः समाधत्ते विशेष्यतोति अन्यत्रापि भ्रमस्थलेपि तयोः शुक्तिरजतत्वयोः असंसर्गाग्रहस्यैव निमित्तदोषा
धीनइन्द्रियभावः रजतत्वेन्द्रियेन्द्रियोवर्तिनिरजतत्वाभावे न संयुक्तसमवायरूपसंनिकर्षाभावादित्यर्थः क

न्या॰ टी॰ यमिति तत्प्रकारकं रजतत्वप्रकारकं तत्प्रकारकमिति प्रकृतापि प्रायेण संनिकर्षस्य सामान्यतो रजतत्वप्र
१५३ त्यक्षत एव हेतुत्वादिति ध्येयं संनिहितमिति प्रत्यक्षं हि द्विविधं लौकिकमलौकिकं च प्रकृते संयुक्तसमवायरू
पलौकिकसंनिकर्षाभावाल्लौकिकप्रत्यक्षविरहेपि ज्ञानलक्षणारूपालौकिकसन्निकर्षसत्त्वादलौकिक
प्रत्यक्षे बाधकाभावदिति भावः रजतत्वेति शुक्तौ रजतत्वप्रकारकप्रत्यक्षमपीत्यर्थः तत्रैव शुक्तौ रजतत्वप्रका
रकप्रत्यक्षत एव तत्प्रकारिके इति शुक्तौ रजतत्वप्रकारिकाप्रवृत्तिरित्यर्थः प्रवृत्तौ विशिष्टावच्छेदकप्रकारकज्ञा
नत्वेन हेतुतायामव्यवस्थापितत्वादिति भावः इदं रजतत्वेन जानामीत्यनुव्यवसायोपि शुक्तिगोचररजतत्व
प्रकारकप्रत्यक्षसाधकोऽवसेय इति तर्कस्थानेष्वपूर्वरसं स्फुरितं मम सिद्धेश्वरीपदद्वन्द्ववरस्येन न्या॰
ह्रितं यत्तोपोसोकापर्णं समुत्पन्नो विश्वनाथाख्यधीमतः तस्य श्रीकण्ठकृतिनः कृतिरानन्दतां मुदम्॥ १३

ह.नं.
४०७६

सा टी॰ इति श्री विश्वनाथात्मजदीक्षितश्रीकंठशर्मविरचिता तर्कप्रकाशाभिधा सिद्धांतमंजरीदीपिका समाप्ता
१५४

तम॰
१५४

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDF

बध्योः कार्यकारणभाव उपमानेनावधार्यते एवं चेद्दशस्थले उपमितेः शब्दविषयकत्वाभावान्नोप
मितित्वं शब्दविषयकत्वाव्यभिचारिणो जातिस्तथा चासंभव इत्याशीकतेनन्विति उपमिति हि
तिं शक्तिपरिच्छित्तिरेव हि उपमानफलं ज्वरहरणो बध्योः कार्यकारणभावस्तु अनुमानेनेवा
वधार्यते नेति शब्दविषयकत्वव्याप्यत्वमुपमितित्वस्यासत्व मितित्वासंभव इति भावः अतिदे
शवाक्यार्थज्ञानं करणं सादृश्यज्ञानं सहकारि अतिदेशवाक्यार्थस्मृतिर्व्यापारः उपमितिफ
लमिति संप्रदायमतं वस्तुति आवश्यकत्वात्सादृश्यज्ञानं कारणं अतिदेशवाक्यार्थस्मृति
र्व्यापारः उपमितिः फलमिति नवीनमतेनाह सादृश्यदर्शनादिति तथा च सादृश्यज्ञानं करणमि·

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न्या.टी. दि २ तिभावः प्रत्यक्षादावंतर्भावासंभवात्परिशेषेण तस्या अतिरिक्तत्वं व्यवस्थापयितुं प्रणालीमार
भते नैव हेतद्विति प्रत्यक्षमिति यद्यपि प्रत्यक्षसामान्यमध्ये मानसमपि निविष्टमेव तथापि तत्र न तमा
नसमिति पृथगुपन्यासोऽयुक्तः तथापि तत्र व्यापारविरहेपि जायमानत्वादिति हेत्वनुपप
त्त्या पृथक्मानसं निर्दिष्टं गोबलीवर्दन्यायेन वात्र प्रत्यक्षपदं मानसान्यप्रत्यक्षपरमि
ति ध्येयं ततः मानसात् अनुभूयमानत्वं तस्या इत्यर्थः अनुभवानादरे त्वाह अन्यथे
ति अनुभवानादरे इत्यर्थः अनुमिनोमीत्यनुव्यवसायस्य मानसानंतरमुदयेनानुमि
तेरतिरिक्तत्वसिद्धिः अनुभवापलापे तु तस्या अप्यतिरिक्तत्वं विलीयेतेति भावः व्याप्ति राम
२४ ज्ञानात्. उपमित्यनंतरं उपमिनोमीत्यनुव्यवसायोदयात् मानसानंतरं च तादृशप्रतीत्यनुदयात्तु कान४ २

ज्ञानादित्यादिपदात्पक्षधर्मताज्ञानपरिग्रहः पदाभावादिनिंज्ञानाद्बोधसामान्येपदजन्यपदार्थोपस्थि
तेर्हेतुतयातच्छून्यकालेचोपमित्यनुत्पत्त्यानोपमितेस्तद्रूपत्वमितिभावः।ननुगोसदृशोगवयपदवाच्य
इत्याकारकंगोसादृश्याश्रयेगवयपदवाच्यत्वावगाहिज्ञानमुपमानंतेनचगोसादृश्यावच्छिन्नेगव
यपदवाच्यत्वावगाहिनीउपमितिरित्यग्रेतत्रचगवयत्वविशिष्टोपस्थापकपदाभावेपिगोसादृ
श्यविशिष्टोपस्थापकपदसत्त्वात्तादृशशाब्दबोधकाभावइत्यतउपमित्याकारंपरिछिनत्तिउपमिता
वितिअयमितिगवयइत्यर्थः यथाश्रुतेतूपमितेरिदंत्वावच्छेदेनगवयपदवाच्यत्वावगाहि[illegible]
वियत्वावच्छेदेनगवयपदवाच्यत्वावगाहनादित्यतःकिंविरोधात्अत्यर्थाःप्रतीतमूलकव्यवहा

२स्य·गो·रवेण·गवयत्वापेक्षयागो

न्या·रा· णपत्तेरितिदोषानुद्धारश्चेंनत्वितिनतुगोसादृश्यावच्छेदेनगवयपदवाच्यत्वावगाहनमितिविभक्ति
६ विपरिणामेनान्वयः तस्यगोसादृश्यो[redacted] रूपेणातदनवच्छेदकत्वात्गव
३ यपदवाच्यत्वानवच्छेदकत्वात् नतुगवयत्वस्यावच्छेदकत्वंतदवच्छेदेनगवयपदवाच्यत्वस्या
प्रतीत्यातदुपपत्तयेप्रमित्यंतरस्वीकरणीयमितिमहद्गौरवमितितदपेक्षयागोसादृश्य
स्यगवयत्वापेक्षयागुरुत्वेपिअवच्छेदकैत्वकल्पनंन्यायः धर्मिकल्पनातोधर्मकल्प
नायालघीयस्त्वमितिन्यायादित्यतआह अन्यथेतिगोसादृश्यस्यअवच्छेदकत्वंस्वीकृ
त्यप्रमाणान्तरकल्पनेइत्यर्थः व्यवहारः शब्दबोधः शब्दप्रयोगोवानप्रतीतमूलंशाक्तिधेत्य राम
३

स्यर्थः शक्तिज्ञानामूलक एव स्यादिति यावत् अत्र गोसादृश्यावच्छेदेनैव गवयपदवाच्यत्वावगाहनात्
न. अतिदेशवाक्यार्थज्ञानोत्तरोत्पन्नज्ञानात् गवय इति पदाच्छाब्दबोधोऽनुभवसिद्धो विलीयेत तत्प्र
कारकशाब्दबोधे तत्प्रकारकशक्तिग्रहस्यैव हेतुतया गवयत्वप्रकारकशक्तिग्रहाभावात् एवं
व्यवहारं प्रति व्यवहर्तव्यज्ञानस्य हेतुतया तादृशशाब्दबोधाभावानुत्तरं तादृशव्यवहारानुप
पत्तिश्चेति गवयत्वावच्छेदेनैव गवयपदवाच्यत्वावगाहिज्ञानमुपेयं तेनु गवयत्वविशिष्टो
पस्थापकपदाभावान्न शाब्दात्मकमिति एतेन शाब्दत्वनिराकरणप्रस्तावे गवयपदवा
च्यतावच्छेदकत्वं गवयत्वस्य गोसादृश्यस्यैवेति विचारस्य प्रकृतानुपयोगित्वं अन्ये तूप

न्या॰टि॰ मित्याकारप्रदर्शनस्यानौचित्यादित्यपास्तं उक्तमद्युक्तव्याख्ययैव सर्वसामंजस्यादिति ध्येयं नापि
८ स्मृतिरित्याह तदेवेति अननुभवागोचरस्य स्मृत्यगोचरत्वादिति भावः तस्मात्प्रत्यक्षादिषु अंतर्भा
४ वासंभवादतिरिक्तैव अनुमित्यादिभ्यो अतिरिक्ता चेयं अयं गवयपदवाच्य इति प्रतीतिः अ
यं गवयपदवाच्य इति प्रतीतिः प्रत्यक्षादिप्रमितिभ्यो भिद्यते तादृग्धर्मवत्त्वादित्यनुमानं बो
ध्यं संप्रदायमतमाह तस्याः करणमिति सादृश्येति सादृश्यपावि। शिष्टे सादृश्याश्रये गोसदृ
शो गवयपदवाच्य इति वाक्यार्थानुभव इत्यर्थः तस्मादिति तादृशवाक्यार्थस्मृतिः द्वारं व्यापा
रः गवयत्वेति अयं गोसदृश इत्याकारकसादृश्यपिण्डविषयअतिदेशवाक्यार्थानुभवरूपोउ
पमानसहकारीत्यर्थः ननु सादृश्यप्रकारकज्ञानवत् वैधर्म्यप्रकारकज्ञानस्याप्यतिरिक्त एम
४

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वापत्तिरित्यत आह एतेनेति एतेन सादृश्यज्ञानं वैधर्म्यज्ञानजन्योपमितिं प्रत्युत्पादयतीत्यथेति त
च्छद्दार्थेति जलादिविधर्मगुणवती पृथिवीति तद्वाक्यार्थस्मरणादित्यर्थः एवं गंधवतीति
पूर्वं जलादिधर्मगुणत्वेन इदानीं तु गंधवत्वेनेति भेदः इत्युपमारितेइतिगुणेनारितेत्यर्थः नतु
वैधर्म्यज्ञानजन्यज्ञानस्योपमितित्वस्वीकारे सादृश्यवैधर्म्यज्ञानयोः परस्परजन्योपमि
तौ व्यभिचारेण कथं करणत्वसंभव इत्यत आह तस्मादिति· सादृश्यज्ञानजन्योपमिते
रिव वैधर्म्यज्ञानजन्योपमितेरप्यनुभवसिद्धतयाऽपलापानर्हत्वादित्यर्थः यत्किंचि
दिति· सादृश्यवैधर्म्याद्यन्यतरविशिष्टेत्यर्थः विशिष्यविशेषधर्मपुरस्कारेणापरिचि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्या·रि· नेति अनिर्णीतशक्तिकपदवाच्यत्वरूपेत्यर्थः गवयपदवाच्यं किंचिदस्तीति सामान्यतः श
दि· क्तिनिर्णयात् विशिष्य अत एव सामान्यधर्मप्रकारकज्ञानस्यावांतरधर्मप्रका
५ रकजिज्ञासां प्रति हेतुतया विशेषधर्मप्रकारकजिज्ञासाबोधकः कीदृशो गवय इति प्र
श्नोपपद्यते इति बोध्यं करणमिति · उपमिति सामान्येत्यादाद्यपदे धर्म्यावांतरधर्मिता
वच्छेदकविशिष्यानिर्णीतशक्यतावच्छेदकपदवाच्यत्वरूपवाक्यार्थानुभवः करण
मित्यर्थः विसदृशोपमितिप्रसंग इत्यत आह · किंचिद्धर्मविशिष्ट इति गवयत्वादिरू
पधर्मविशिष्ट इत्यर्थः तद्धर्ता धीरिति यद्विशिष्टपदवाच्यत्वानुभवस्तद्धर्ताधीरित्यर्थः एम
५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गं.

गवयत्वादिविशिष्टे सादृश्यधीरिति यावत् ननु एकधर्मविशिष्टे सादृश्यज्ञाने धर्मान्तरावि
शिष्टे पदवाच्यत्वावगाह्युपमित्यनुदयात् यद्धर्मावच्छेदेन सादृश्यज्ञानं तद्धर्मावच्छेदेनैव
पदवाच्यत्वावगाहिनी उपमितिरित्यपेयं एवं च गवयत्वादिरूपलघुधर्मानुपस्थि
तौ यदा गुरुधर्मविशिष्टे एव सादृश्यज्ञानं तदा तदवच्छेदेनैव पदवाच्यत्वावगाहि
न्युपमितिः स्यादित्यत आपत्तिमाह यदा चेति लघुधर्मे गवयत्वादिरूपज्ञाने तदस्फु
रणे गवयत्वास्फुरणे गुरुधर्मेति विलक्षणसंस्थानवत्त्वरूपधर्मविशिष्टे इत्यर्थः सा
दृश्यादिपदात् वैधर्म्यपरिग्रहः तदवच्छेदेनैव विलक्षणसंस्थानवत्त्वरूपगुरुधर्माव

त्वादि

तत्स्वीकारस्याप्यावश्यकतया लघुधर्मे विशिष्ट एव पदवाच्यत्वावगाहि ज्ञानमुत्पद्यते गुरुधर्मे ×२

न्या॰ रि॰ च्छेदेनैव वाच्यताग्रहः गवयपदवाच्यताग्रहस्य गुरुधर्मविशिष्टे पदवाच्यताग्रहः। बाधादिति लघुध
दि र्मोपस्थितौ लघुधर्मे शक्यतावच्छेदके संभवति गुरुधर्मे विशिष्टविषयकज्ञाने त्व प्रामाण्यज्ञानं
६ न तन्नंतरं जायत इति भावः केचित्तु लघुधर्मोपस्थितौ गोसादृश्याद्यवच्छेदेनापि पदवाच्य
त्वावगाहनात् सादृश्यं गोत्वे गौरवेणानवच्छेदकमित्फकमयुक्तमित्यत आह यदा चेति गुरुध
र्मविशिष्टे सादृश्यादिधर्मविशिष्टे तदवच्छेदेनैव सादृश्यावच्छेदेनैवेत्यर्थः इति व्याचक्षते
तदसत् गुरुधर्मविशिष्ट एव सादृश्यज्ञानं जायते इत्यस्यासंगतत्वापत्तेः गोसदृशो गोसदृ
श इति सादृश्यज्ञानस्यासंभवित्वादिति दिक् ननु संभवत्वेवं यद्युपमानस्य प्रामाण्यं अनुमा राम
धीनशक्तिग्रहमूलकत्वाद्वाक्यार्थानुभववदुपमानस्य तदेव तु न प्रमाणाभावात् एवं च नोपमान ६

शब्दयोरपीति निव्याहृतं चत्वारि प्रमाणानीति तथा हि वन्ह्यादिगोचरप्रवृत्तेर्वन्हिव्याप्यवत्तापरा
मर्शरूपविशेषदर्शनमूलकप्रत्यक्षादेवोपपत्तेर्नानुमानस्य प्रमाणत्वं न चान्वयव्याप्तिज्ञा
नकाले साध्यज्ञानस्यावश्यकत्वात् वन्ह्यादिविषयकोपनीतभानोपपत्तावपि इतरभेदज्ञा
नशून्यकालीन इतरव्यापकीभूताभावप्रतियोगिपृथिवीत्ववत्त्वादिव्यतिरेकव्याप्ति
ज्ञानकाले इतरभेदज्ञानाभावान्नानुपनीतभानासंभवेन तत्र प्रमित्यंतरस्वीकार आवश्य
क इति वाच्यं अभावत्वादिसामान्यलक्षणासंनिकर्षबलादेवेतरभेदगोचरप्रत्यक्षो
पपत्तेः एवं घटमानयेति वाक्यश्रवणानंतरं घटकर्मत्वानयनकृत्यादीनां परस्परसंसर्ग

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्या॰टि॰ विषयकविलक्षणप्रमितिरसिद्धा शाब्दबोधपूर्वंपदार्थोपस्थितेः संवश्यकतयानादृशोपनीत
दि मानेनैव निर्वाहात् न च संसर्गोपस्थितेरनैयत्यात् कथं संसर्गबोध इति वाच्यं बाधाभावादिव
७ लात् तस्यापि संसर्गतया भाने बाधकाभावात् न च तदुपनीतभानं प्रति तदुपनायकज्ञान
त्वेन कार्यकारणभावे व्यभिचार इति वाच्यं सांसर्गिकविषयताभिन्नालौकिकविषयताया
स्तज्जन्यतावच्छेदकत्वेन व्यभिचाराभावात् प्रमितत्वं न स्वीकारे तन्नियामकं बहुतरकार्य
कारणभावकल्पनापेक्षया सांसर्गिकविषयताभेदनिवेशे लाघवस्यातिस्फुटत्वात् यो
ग्यताज्ञानस्य ^ सत्वात् सांसर्गिकाविषयताभेदानिवेशेपि तत्पभावात् एवं गवयत्ववि एम
२ शाब्दसामान्यहेतुतया संसर्गविषयकयोग्यताज्ञानस्य ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शिष्टेसादृश्यज्ञानसहकृतगोसदृशोगवयपदवाच्यइतिज्ञानोत्तरोत्पन्नमयंगवयपदवाच्य
ग: इतिज्ञानमप्युपनीतभानमेवेतिकथमेतादितिचेत्‌ अत्राह लिंगपरामर्शोत्तरोत्पन्नप्रमितिकृत
रनुमिनोमीत्यनुव्यवसायस्तावदनुभवसिद्धः तद्विषयीभूतानुमितित्वाख्यजातिविशे
षावच्छिन्नकरणतयानुमानस्यप्रमाणांतरत्वं अयं वह्निमान्पर्वतोघटवान्‌ इत्यनुमि
त्यनंतरं पर्वतेवह्निमनुमिनोमीत्यनुव्यवसायापत्त्या वह्निनिष्ठविधेयताख्यविलक्षण
विषयताविशेषस्योपगंतव्यः पदभावादनंतरं न तादृशानुव्यवसायः एवं चानुमिनोमी
त्यनुव्यवसायस्य तादृशविषयताविशेषविषयकत्वेनोपपन्नेरतमनुमितित्वजाति

[illegible] Sanskrit University, Balmeeki Campus, [illegible]

व्या॰ स्वीकारेणेति कनस्तदवच्छिन्नकरणतया प्रमाणान्तरत्वमिति चेन्न लिंगपरामर्शविरहे तादृश
दी॰ विषयताकज्ञानानुत्पत्तेस्तदवच्छिन्नकरणतयैव तस्य प्रमाणान्तरत्वमिति वक्तव्ये अनु
८ मितो मीत्यनुव्यवसायस्य तादृशविषयताभावविषयकत्वे आपत्तिः शाब्दबोधेन मेति
तादृशानुव्यवसायापत्तेः अनुमित्यापत्तिशाब्दबोधादिषु तादृशविषयताया ऐक्यात् अनु
मितित्वजात्यंगीकारे तु आपत्त्यादिषु तादृशजात्यसत्त्वान्न तादृशानुव्यवसायापत्ति
रिति तदवच्छिन्नकरणतयानुमानस्य प्रमाणान्तरत्वमावश्यकमेव एवं शाब्दश्रव
णानन्तरं जायमानज्ञानानन्तरं शाब्दयामीत्यनुव्यवसायोत्पत्त्या तद्विषयतया सिद्ध राम
८

२× मितित्वाद्यात्वनुमितित्वादि तथापि तत्प्रत्यक्षत्वव्याप्यमेवास्तां तदवच्छिन्नकरणस्य च तत्प्रमाणान्तरत्वे ×२

शाब्दत्वाख्यजातिविशेषावच्छिन्नकरणतया शाब्दप्रमाणसिद्धिः एवमुपमितिनोमीत्यनुव्यवसायबला
नं: दुपमानस्यापि प्रमाणान्तरत्वं अथानुमित्यादेर्मानसत्वेन इत्थं साक्षात्कारोमीत्यनुव्यवसायापत्तिः अ
नुमित्यादेस्साक्षात्कारत्वादिति चेन्न लौकिकविषयताशालिसाक्षात्कारस्यैव तादृशप्रतीतिविषय
त्वात् अत एव सुरभिचंदनमित्याद्युपनीतभानानंतरं चंदनं पश्यामि न सौरभमिति सार्वजनीनः प्र
त्ययः संगच्छते तथा च लौकिकविषयतायाः साक्षात्कारत्वव्यंजकतया नानुमित्याद्यन्तरं सा
क्षात्करोमीति प्रत्ययः अथैवं तत्र प्रत्यक्षसत्वे प्रमाणाभावः साक्षात्करोमीति प्रत्ययाभावेन प्रत्य
क्षस्याप्रयोजकत्वाच्च अनुमानस्यापि मानत्वेन वक्तुमशक्यत्वात् अत्र कश्चित् अनुमितित्वादेः

प्रत्यक्षसामग्रीकाले

न्या·दी· प्रत्यक्षत्वव्याप्यत्वे लाघवमेव तथाहि अनुमितिसामग्रीकाले प्रत्यक्षवारणायानुमितिसामग्र्याः प्रत्यक्षं प्रति प्रति
दि बंधकत्वं कल्पनीयं प्रत्यक्षत्वाव्याप्यत्वे त्वनुमित्यात्मकप्रत्यक्षस्यैवोत्पत्तावत्तदकल्पनप्रयुक्तं लाघवमक्ष
९ समेवेति तदसत् अनुमितित्वस्य चाक्षुषत्वव्याप्यत्वे त्वाचपरामर्शजन्यज्ञानेऽनुमितित्वानाप
त्तेः चाक्षुषत्वस्य तद्व्याप्यत्वमतं चासंभवि परस्परव्यभिचारिणोस्तयोरेकत्रसमावेशे सांकर्या
पत्तेरिति चाक्षुषत्वादिविरुद्धं तदुपगंतव्यं एवं चानुमितिसामग्रीकाले चाक्षुषादिवारणाय चाक्षु
षादिकं प्रति अनुमितिसामग्र्याः प्रतिबंधकत्वं कल्पनीयं एवं च सामान्यतः प्रत्यक्षं प्रत्यनुमि
तिसामग्र्याः प्रतिबंधकत्वं मयापि न कल्प्यते इति कुलाघवं नत्र अनुमितित्वादेर्मानसत्वव्याप्य राम
९

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ग: त्वमेवास्तां अनुमितिसामग्रीकाले मानसवारणाय मानसं प्रत्यनुमितिसामग्र्याः प्रतिबंधकत्वक
ल्पने गौरवं मन्मते तु अनुमित्यात्मकमानसस्यैवोत्पादेन तन्मतेष्टापत्तेः तच्च वन्ह्यनुमितिसामग्री-
काले घटादिमानसवारणाय घटादिमानसे प्रतिबंधकत्वस्यावश्यकतया घटादिकमनिवे
श्यमानसत्वमेव न प्रतिबध्यतावच्छेदकमिति वाच्यं घटादिमानसं जायतामितीच्छा नाम तिङ
कत्वानुरोधेन विषयं निवेश्यैव प्रतिबंधकत्वकल्पनस्यावश्यकत्वात् एवं शाब्दादिस्थलेऽपी
तिमेवं घटादिचाक्षुषसामग्रीकाले वन्हिमानसानुदयेन चाक्षुषसामग्र्याः मानसं प्रति प्रति
बंधकतायां घटादिचाक्षुषसामग्रीकाले वन्ह्यनुमित्युत्पत्तेरनुमित्यन्यमानसत्वमेव चाक्षुष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सामग्रीप्रतिबध्यतावच्छेदकं भवतावाच्यमित्यनुमित्यन्यत्वनिवेशो गौरवात् एवमनुमितिसामग्रिकाले अनुमित्यभिन्नमानसत्वावरोधाय अनुमित्यन्यमानसत्वमनुमितिसामग्रीप्रतिबध्यतावच्छेदकमुपेयमित्यनुमितिसामग्र्याः प्रतिबन्धकत्वकल्पनमावश्यकमित्यन्यत्वानिवेशो गौरवं पुनरधिकं एवं शाब्दोपमितिस्थलेशाब्दान्यत्वोपमित्यन्यत्वनिवेशो गौरवमिति निबंधानमानसान्तर्भाव इति सुष्ठूक्तं चत्वारि प्रमाणानीति दिक्॥ ॥ ॥ इति श्रीदीक्षितश्रीकण्ठशर्मविरचितायां न्यायसिद्धान्तमञ्जरीदीपिकायामुपमानपरिच्छेदस्समाप्तः॥ ३ ॥ श्रीकाशी॰॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दितिविभाव्यते तथापि शुक्लादिपदानां गुणमात्रवाचकत्वेन शुक्लायां नद्यां घोष इत्यादौ साक्षात्संबन्धासंभ
वात् विशेष्यवाचकपद एव लक्षणा यःस्फुटत्वात् सर्वज्ञोत्तरपद एव लक्षणा. एवं चित्रगुरित्यत्रापि
गोपद एव सा. तथा च सर्वज्ञोत्तरपद एव बहुव्रीहौ लक्षणेति. केचित्तु गम्भीरपदे लक्षणायां नदीपदो
त्तरसप्तम्या अन्वयो न स्यात्. विशेषणविभक्तेः प्रयोगसाधुत्वादिति विशेष्यवाचकपद एव ल
क्षणा. न च विशेष्यवाचकपदोत्तरविभक्तेरेव शब्दसाधुत्वमास्तामिति वाच्यं. विशेषणवि
भक्तित्वेन सामान्यतः प्रयोगसाधुत्वकल्पनादित्याहुः. तदसत् लाक्षणिकार्थानुभवविकग
भीरपदस्य विशेषणपरत्वाभावेन गम्भीरपदोत्तरसप्तम्या एवान्वयसम्भवादिति. अपरे तु प्रत्यया
नां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेरुत्तरपद एव लक्षणा. अव्यवहितपूर्ववर्त्तिन एव
प्रकृतित्वात्. अन्यथा राजपुरुषमानयेत्यत्र राजानमानयेत्यपि बोधापत्तेः. न चैवं सर्वप्र
धाने द्वन्द्वे पूर्वप्रधानेऽव्ययीभावेऽघटमृतल [illegible] मित्यत्र बहुव्रीहौ नञ्समासेऽद्विपिप्पली

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्यसंबन्धो लक्षणा सा च पद एव न वाक्ये ऽशक्यत्वात् वाक्ये लक्षणावादिमतेपि प्रत्येकं पदद्वये विनिग
मकाभावात् लक्षणाया दुर्वारत्वाच्च न चैवं नीलं हरिकमानयेत्यत्र विशिष्टसम्बन्धिनि लक्षणानुप
पत्तिः पदद्वयस्यापि लाक्षणिकतया ऽननुभावकत्वेन स्वज्ञाप्याप्रसिद्धेरिति वाक्ये लक्षणावादि
ना सहगुरुत्वमिति वाच्यं लाक्षणिकस्याप्यनुभावकत्वौ गीकारात् वस्तुतस्तु शक्यसंबन्ध
एव लक्षणा नदीपदस्य तथात्वगभीरतया अपि शक्यत्वाद्गभीरपदस्य तात्पर्यग्राहकतया
च गभीराभिन्ना नदीत्यवान्तरवाक्यार्थबोधं विनापि गभीरनदीतीरे आभसंभव इति दिक् सं
प्रदायस्त्वनेनास्वरसः सूचितः सच गभीरपदस्य गभीरत्वशक्ततया तस्य स्वाश्रयाभिन्ननदी
संबन्ध एव तीरे वाच्य इति परंपरासंबंधे गौरवात् साक्षात्संबन्धसंभवान्नदीपद एव लक्षणायु
क्ता यदि च धीरोदात्तपदवद्गम्भीरपदमपि न्नाक्षिनीरनादिपदवत्केवलं गुणमात्रे गभीरपदाप्रयोगा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त॰ त॰प्र॰ल॰ धकत्वसंभवे परपदवैयर्थ्यमित्याह नचेति· एकपदवैयर्थ्यं नचेत्यन्वयः· परस्परेति· नदीपदे नु गभी
रनदीतीरबोधजननीये गभीरपदसमभिव्याहारो नियामकः गभीरपदे न वा तादृशबोधजननी
ये नदीपदसमभिव्याहारेण नियामक इत्यर्थः· लक्ष्यार्थबोधे तात्पर्यज्ञानस्य हेतुतया नदीपदे
गभीरनदीतीरप्रतीतिर्भवत्वितीति तात्पर्यज्ञानं गभीरपदसमभिव्याहारादेव भवति· अन्यथा
केवलं नद्यामित्युक्तो गभीरनदीतीरबोधापत्तेरिति भावः· एकत्रैव पदे यदा लक्षणाप्रतिसंधा
नं तदा तत्पद एव लक्षणा· यदा तूभयपदे लक्षणाप्रतिसंधानं तदोभयपदलक्षणैव शाब्दबो
धप्रयोजिका संभेदेनान्यतरवैयर्थ्यमिति न्यायेन चैकमेव विशिष्टतीरं उपस्थितमिति द्रष्ट
व्यं· अत्रेदं बोध्यं· गभीरनद्योरन्वयबोधोत्तरं गभीरनदीसम्बन्धग्रहान्नदीपदेन विशिष्ट
तीरं लक्ष्यते· अन्यथा नदीसंबन्धग्रहाद्विशिष्टनदीतीरबोधानापत्तेः· इत्थं चस्व शक्तिज्ञा

ख्योर्हतिमत्वे २

६

पद्भिसाद्धि लक्षणयोधकत्वं तत्त्वेन

नापभ्रंशस्यप्रमाधीनबोध्याभावान्नानुपपत्तिरित्यस्वरसात्तत्त्वेनबोधकत्वावच्छेदकत्वमभिप्रेत्य
दोषमाह· किंचेति· अशक्तत्वादिति· स्वबोध्यत्वं हि नस्वजन्यबोधविषयत्वं सम्भवाभावेनयत्पप
दस्मारितगगनादेः संबन्धग्रहादुपस्थितस्य शाब्दबोधापत्तेः· नचस्वजन्यशाब्दबोधवि
षयत्वंतदितिवाच्यम् गंगायांघोषइत्यादौगंगापदेलक्षणानापत्तेः· तेनगंगापदेनप्र
त्याहशाब्दबोधाजननात्· तस्मात्स्वजन्यबोधविषयत्वमेवतत्त्वंवाच्यंतच्छक्यसंब
न्धस्यलक्षणात्वापेक्षयागुरुतरंवाक्येशक्त्यभावात्· प्रकृतेचासंभवीतिभावः· उपसं
हरति· तस्मादिति· वाक्येलक्षणाया असंभवादित्यर्थः· पदद्वयस्यैवगभीरपदेनदीपदे
च· विनिगमकेति· एकतरपक्षपातिनीयुक्तिर्विनिगमनातस्या अभावादित्यर्थः॥ विशि
ष्टेति· विशिष्टागभीरयानद्यातस्यास्तीरइत्यर्थः· नन्वेकस्यैवलक्षणयाविशिष्टार्थबो

त.प्र.श.

एवं. तस्यार्थे आधारत्वान्वयसंभवे च गंभीरायामित्यत्र विभक्त्यर्थान्वयासम्भवादिति भावः इत्यपि कश्चित्
तन्न. वक्ष्यमाणस्वमतेपि तद्धेत्वर्थसत्वात्. अथेति गंभीरायां नद्यामिति विभक्त्यनभागस्यैवेत्यर्थः. वि
भक्त्यन्तस्य नामत्वाभावेन नामार्थयोरिति व्युत्पत्तेरनवकाशाद् इदं नैव योगे तदर्थान्वय इति भावः. अशक्त
त्वादिति. गंगायामिति समुदायस्यापि लाक्षणिकत्वापत्या नत्वेन बोधकत्वं वाच्यं. एवमपभ्रंशावारण
यशक्येत्यावश्यकं इत्थं च शक्यतावच्छेदकतया तत्त्वावच्छिन्नबोधकतानस्याः एवं निवेशाद्वाक्यत्वेन बोध
कतायां च शक्तेरनवच्छेदकत्वान्न वाक्ये लक्षणासंभवः. वस्तुतस्त्वपभ्रंशवारणाय शक्यास्वबोध्ये
त्यस्यावश्यकतया वाक्ये न शक्तिरित्याह. वाक्यमित्यादि. नन्वपभ्रंशस्यापि लक्षकत्वे इष्टापत्
तिः इष्टिमत्त्वमेव पदसाधुत्वमित्यत्र च शक्यसंबन्धरूपलक्षणाया एव इष्टिमत्त्वघटकतया
तत्र इष्टिमत्त्वरूपसाधुत्वाभावात्. प्रमाधीनस्वबोध्यस्य संबन्धो लक्षणेत्यस्य वा तत्र लक्षणात्वे

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

घनाक्योन्नरं चैकापि विभक्तेरदृष्टत्वेन न वाक्यस्य प्रकृतित्वमिति भावः ॥ ननु डित्थडवित्थसमु
दायवद्गम्भीरायां नद्यां निवाक्योन्नरमेव विभक्तिरिति तस्यापि प्रकृतित्वमास्तामित्यत आह ॥ ग
म्भीरायामिति ॥ गम्भीरायां नद्यां निवाक्योन्नरं यदि विभक्तिस्तदा सुपो धातुप्रातिपदिकयोरेतयो
रवयवस्य सुपो लुक्स्यादित्यनेन गम्भीरायामिति सप्तम्या लुक्स्यादिति गम्भीरायां नद्या
मिति न स्यात् ॥ किं तु गम्भीरनद्यामिति स्यादित्यर्थः ॥ वस्तु तस्तु ननु नीलं घटमानयेत्य
गविशिष्टे कर्मत्वान्वयो न स्यान्नीलस्याप्रकृत्यर्थत्वादित्यत आह ॥ गम्भीरायामितीति ॥ वि
शेषणवाचकपदस्य विशेष्यवाचकपदसमानवचनत्वानुरोधेन गम्भीरायामिति सप्त
मी ॥ भवन्मते च नदीपदस्य विशेष्यवाचकपदत्वाभावाद्गम्भीरायामित्यस्य विशेषण
वाचकपदत्वाभावाच्च गम्भीरायामिति सप्तमी न स्यात् इति सारं ॥ नदीपदोन्नरं सप्तमीत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ग.५

गभीरपदसमभिव्याहृतनदीपदज्ञानत्वेनानुपूर्वीज्ञानस्यकारणत्वादितिपूर्वत्रनायंदोषः
इतिध्येयम्॥ नचभेदान्वयेनसमानविभक्तिकत्वंतंत्रंस्तोकंपचतीत्यत्रव्यभिचारात्किंतुविरु
द्धविभक्तिराहित्यमेवतच्चविभक्तिशून्यभागेप्यस्तीत्यतआह॥ बोधकत्वेवेति॥ तद्व्येतीस्वपुल
स्यार्थे॥ विभक्त्यर्थेति॥ आधारत्वानन्वयापत्तेरित्यर्थः॥ अनन्वयमेवाह॥ प्रत्ययानामिति॥ य
थाघटमित्यत्रयथायाकर्मतेतिघटरूपप्रकृत्यर्थान्वितकर्मत्वरूपस्वार्थप्रतिपादकत्वम
मविभक्तेः॥ नचधवखदिरौछिन्धीत्याहौद्वितीयार्थकर्मत्वस्याप्रकृत्यर्थधवान्वितत्वात्कथमे
तदितिवाच्यम्॥ याहृशसमुदायोत्तरंविभक्तिस्तस्यैवप्रकृतित्वेनधवस्यापिप्रकृत्यर्थत्वात्त
स्माद्भागः॥ गभीरायांनदीतिविशिष्टवाक्यात्मकभागः॥ प्रकृतिरिति॥ नदीपदोत्तरस्यैववि
भक्तेःश्रूयमाणतयानदीपदमेवप्रकृतिस्तदर्थश्चनभवन्मतेविशिष्टनदीतीरावच्छि

५

Central Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पत्तिरतत्त्वेन बोधकत्वं विवक्षणीयं तथा सत्याह· गभीरायामिति· तीरे· गभीरनदीतीरे· तदाधा
रतेति· तीराधारतेत्यर्थः· विभक्तेः प्रत्यायिकाया अभावेनाधारत्वबोधाभावादिति भावः· विभ
क्तिशून्यभागस्यापि न लक्षणेत्याह· नापीति· सप्तमीशून्यभागस्येत्यर्थः· इहतुसप्तम्या ए
व बोधकत्वान्नाधारताप्रत्ययानुपपत्तिरितिभावः· तस्य· गभीरायां नदीति भागस्य अबो
धकत्वादिति · समानविभक्तिकपदस्यैवाभेदान्वयबोधकतया विभक्तिशून्यभागस्याभेदा
न्वयबोधकत्वाभावादित्यर्थः· तथाच· स्वबोध्यसंबन्धरूपा लक्षणापि नात्र संभवतीति रि
यं· यद्यपि पदानां स्वस्वान्वयबोधकत्वं न समूहत्वेन नवेतरपदावछिन्नेतरपदत्वेन स्व
रूपयोग्यतेति विभक्त्यन्तभागस्य लक्षकत्वेप्येष दोषः· तथापीतरपदावछिन्नेतरपदे
कत्वोपधानरूपं बोधकत्वं संभवत्येव· गभीराभिन्नानदीतित्वाद्बोधे समानविभक्तिक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शास्त्वमुपगम्येत्याशेति :॰ वाक्यमिति॰ चित्रगुरित्यादिवाक्यमित्यर्थः॰ नविशिष्टार्थेति॰ चित्राभि
त॰प्र॰श॰ न्नगोरित्यादि विशिष्टार्थबोधकं नेत्यर्थः॰ तद्बोधकनेति॰ विशिष्टार्थबोधकतावच्छेदकेत्यर्थः॰
तत्सत्वे वा किं लक्षणयेति भावः॰ अतइति॰ शक्तेरभावात्॰ रिक्तं अर्थशून्यं वचरत्यर्थः अपभ्रं
शेपि शक्तिभ्रमेण स्वबोध्यसत्वान्नगापि लक्षणापत्तिः॰ तथाच वृत्तिमत्वस्यैव पदसाधुत्वरूप
त्वेनापभ्रंशानां यज्ञेपि प्रयोगापत्तिः॰ साधुनैव प्रयुञ्जीतेत्यनेन विरोधाभावादतः शक्त्या स्व
बोध्यसंबन्धो लक्षणेत्येव वाच्यं॰ नचैतद्वैक्ये संभवतीति भावः॰ ननु वाक्ये समुदायत्वेन शक्त्या
भावेपि प्रत्येकपदशक्त्या स्वबोध्यत्वमस्त्येव गभीरपदसमभिव्याहृतनदीशब्दत्वमेव
विशिष्टबोधकतावच्छेदकं अपभ्रंशेनुमेयमित्यस्वरसादाह॰ किंचेति॰ स्वबोध्येत्यत्र बोध
कत्वमात्रविवक्षणे गंगायां घोष इत्यत्र गंगायामिति समुदायस्यापि लाक्षणिकत्वाप

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णाविशेष्यवाचकपदयोः समानविभक्तिकत्वस्थलेऽभेदान्वयस्यैव व्युत्पन्नतयाभेदेनान्वयासं
भवाद्भेदेनैवान्वयो वाच्यः स च न संभवति बाधादिति भावः. नयामित्यस्येति. गंभीरपदस्यग
भीरसंबन्धितीरत्वेन तीरत्वेन वा लक्षणायांन्वयाः पदार्थैकदेशतयाऽन्वयासंभवात्तीरस्य च
समानविभक्तिकस्थले भेदेनान्वयस्याव्युत्पन्नतयाऽभेदेनान्वयो वाच्यः स तु न संभवति बा
धादिति भावः. अनन्वयमेवाह. नहि तीरं नदीति. उपसंहरति. तस्मादिति. अनन्येति.
शक्त्या लक्षणया वा विशिष्टार्थबोधस्यानुपपत्त्या वाक्यमेव. गंभीरायां नयामिति वा
क्यमेव. लक्षकमिति. पंकजपदेऽनायत्त्या वाक्ये शक्तिस्वीकारे प्यन्यलभ्यत्वादत्र ल
क्षणैव. एकत्र वावपे शक्तिकल्पनादन्यत्रापि तत्कल्पने च गंगापदस्य प्रवाहे शक्तेः
क्लृप्तत्वेन तीरेपि शक्तिकल्पनापत्त्या लक्षणोच्छेदापत्तेरतः स्वबोध्यसंबन्धस्य लक्ष्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

× वाक्यस्यापि · विशिष्टबोध्यमिति · एकदेशान्वयेन तदन्यपदार्थप्रतीतिस्यायेनाचित्रगुरित्यत्र चित्रागोरिति ५४

न·पु त·प्र·रा वाक्यस्य · शक्त्याभावादिति · वाक्यस्य कुत्रचिदर्थे शक्त्यभावाच्छक्यसंबन्धरूपलक्षणा दुर्वचेत्य
र्थः · स्वबोध्यस्येति · गंगापदबोध्यस्य संबन्धस्तीरेऽस्तीति तत्र तत्सत्त्वमुपपन्नं · परं तु शक्य
त्वेन न तत्प्रवेशः किंतु बोध्यत्वेनेति भेदः · अत्र चित्रगुरित्यत्र बहुव्रीहावित्यर्थः · वाक्यस्या
पि · चित्रगुरिति वाक्यसत्त्वात्तस्य च बोध्यं चित्रा गौस्तत्संबन्धश्चित्रगोस्वामिन्यस्तीति भा
वः · शक्यसंबन्धस्य लक्षणात्वे दूषणं दर्शयन् स्वबोध्यसंबन्धस्यैव लक्षणात्वमुपपादय
ति · अन्यथेति · वाक्ये लक्षणानङ्गीकार इत्यर्थः · का गतिः · कथमन्वयबोधः · तदेवोपपाद
यति · नहीति · गभीरायामिति · नदीपदस्य नदीतीरलक्षकत्वे गभीरायामित्यस्य तीरेऽन्वयो
वाच्यः स च न संभवतीत्यर्थः · अनन्वयमेवाह · न हि तीरमिति · नदीपदस्य नदीतीरत्वेन ती
रत्वेन वा लक्षणायां गभीरपदार्थस्य पदार्थैकदेशतयान्यामन्वयासंभवात्तीरे च विरोध

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णविशेष्यवाचकपदयोः समानविभक्तिकत्वस्थले ऽभेदान्वयस्यैव व्युत्पन्नतया भेदेनान्वयासं
भवाद् भेदेनैवान्वयो वाच्यः स च न संभवति वाधादिति भावः. नद्यामित्यस्येति. गभीरपदस्य ग
भीरसंबन्धितीरत्वेन तीरत्वेन वा लक्षणायां नद्याः पदार्थैकदेशतया ऽन्वयासंभवात्तीरे च
समानविभक्तिकस्थले भेदेनान्वयस्याव्युत्पन्नतया ऽभेदेनान्वयो वाच्यः स तु न संभवति वा
धादिति भावः. अनन्वयमेवाह. नहि तीरं नदीति. उपसंहरति. तस्मादिति. अनन्वयेति.
शक्त्या लक्षणया वा विशिष्टार्थबोधस्यानुपपत्त्या वाक्यमेव. गभीरायां नद्यामिति वा
क्यमेव. लक्षकमिति. पंकजपदे ऽनायत्या वाक्ये शक्तिस्वीकारे ऽप्यन्यलभ्यत्वादत्र ल
क्षणैव. एकत्र वाक्ये शक्तिकल्पनादन्यत्रापि तत्कल्पने च गंगापदस्य प्रवाहशक्तेः
क्लृप्तत्वेन तीरेपि शक्तिकल्पनापत्त्या लक्षणोच्छेदापत्तेरतः स्वबोध्यसंबन्धस्य लक्ष-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

× वाक्यस्यापि · विशिष्टं बोध्यमिति · एकदेशान्वितमनन्यबद्धवतीतिन्यायेनान्वितार्थस्य चित्रगोरिति ५-४

त·प्र·श क्यस्य · शक्याभावादिति · वाक्यस्य कुत्रचिदर्थेऽन्वयभावाद्वाक्यसंबन्धरूपलक्षणा दुर्वचेत्य
र्थः · स्वबोध्यस्येति · गंगापदबोध्यस्य संबन्धस्तीरे तीरेऽस्तीति तत्र तत्सत्वमुपपन्नं · परं तु शक्य
त्वेन न तत्र वेशः किंतु बोध्यत्वेनेति भेदः · अत्रैव चित्रगुरित्यत्र बहुव्रीहाविवत्यर्थः · वाक्यस्या
पि · चित्रगुरिति वाक्यसत्वात् तस्य च बोध्यं चित्रा गौस्तत्संबन्धश्चित्रगोस्वामिन्यस्तीति भा
वः · वाक्यसंबन्धस्य लक्षणात्वे दूषणं दर्शयन् स्वबोध्यसंबन्धस्यैव लक्षणात्वमुपपादय
ति · अन्यथेति · वाक्ये लक्षणानङ्गीकारे इत्यर्थः · का गतिः · कथमन्वयबोधः · तदेवोपपाद
यति · नहीति · गम्भीरायामिति · नदीपदस्य नदीतीरलक्षकत्वे गम्भीरायामित्यस्य तीरेऽन्वयो
वाच्यः स च न संभवतीत्यर्थः · अनन्वयमेवाह · नहि तीरमिति · नदीपदस्य नदीतीरत्वेन ती
रत्वेन वा लक्षणायां गम्भीरपदार्थस्य पदार्थैकदेशान्वयासंभवात्तीरे च विरोध

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चित्रत्वस्येत्यर्थः चित्रपदस्योभयत्रप्रयोगात् तस्य चित्रत्वस्य पदार्थैकदेशत्वात् चित्रपदार्थैकदेश
त्वात् एकविशेषणतयोपस्थितस्यान्यत्राविशेषणत्वेनान्वयेनिराकांक्षत्वादिति भावस्त्वाहुस्त
न्न एवमपिचित्रस्य गव्यन्वये बाधकानुक्तेः अतएवेति चित्रस्य गवान्वयासंभवादेवेत्यर्थः गा
वानन्वयेति चित्रपदस्य चित्रस्वाम्यर्थकत्वेपदार्थैकदेशतया चित्रेन गोरन्वयः नापिचित्रस्वा
मिनिनामार्थयोरभेदेनैवव्युत्पत्तेरिति भावः पदद्वयेति चित्रपदेगोपदे चेत्यर्थः ननूभयत्रल
क्षणायां गौरवात्तदपेक्षया समुदायशक्तिरेवास्त्वित्यत आह नन्विति अनन्यलभ्यस्यैव
शब्दार्थत्वेनोभयत्रलक्षणायां गौरवस्याप्रामाणिकत्वादिति भावः पदद्वयेलक्षणाकल्पनेऽ
न्यतरपदवैयर्थ्याद्वाक्यएवलक्षणावादिमीमांसकमतमाह मीमांसकास्त्विति समु
दायएव चित्रगुरित्यादिवाक्यएव लक्षणा चित्रगोस्वामिनिलक्षणा समुदायस्य वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

या·निर्वाहः·विशिष्टार्थबोधः·अनिर्वाहमेवोपपादयति .तथाहीति ·नहीति .गोपदस्य गोस्वामित्वलक्षकत्वे
चित्रपदार्थस्य गवि अन्वयो वाच्यः·स च न संभवति·पदार्थैकदेशत्वादिति भावः·चित्रस्य·चित्रपदार्थ
स्य चित्रत्वविशिष्टस्य·गवान्वयः·गव्यन्वयः·गवेति तृतीयान्तं वा·गवा सहेत्यर्थः·संभवतीति·चित्र
पदार्थस्य चित्रस्याभेदेनान्वयो गवि न संभवतीत्यर्थः·तस्य·गोः·न च तच्छब्दस्याव्यवहितपूर्वोपस्थि
तमुख्यविशेष्य परामर्शकतया गवान्वयोपसर्जनतया कथं तच्छब्देन गोः परामर्श इति वाच्यं·तच्छ
ब्दस्याव्यवहितपूर्वोपस्थितमात्रपरामर्शकतया तात्पर्यवशादन्वयोपसर्जनस्यापि गोर्बोधने बा
धकाभावात्·गवेति तृतीयान्तत्वे शोभास्पर्शित्वपदार्थैकदेशत्वात्·गोस्वामित्वपदार्थैकदेश
त्वात्·गौर्नित्येत्यत्र गोत्वे नित्यत्वान्वयवारणाय पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेने
ति व्युत्पत्त्यङ्गीकारस्यावश्यकत्वादिति भावः·केचित्तु·चित्रस्य चित्रविशेषणतयोपस्थितस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पुरुषः इत्यत्र तु राजसंबन्धिपुरुषे एकाभिन्नपुरुषस्यावयवार्थस्य विरोधादवयवशक्त्या तद्बोधाभावेन युगपद्वृत्ति
द्वयविरोधाभावाद् ध्वजस्तरो वस्त्वार्थस्यावयवार्थस्य त्यागाज्जहत्स्वार्थत्वोक्तिरिति सारं स्वोक्ते समासेऽवयव
लाक्षणिकत्वे उपष्टम्भकमाह · तदुक्तमिति · यत्रेति · यत्रानुभूयमानसमुदायार्थोऽवयवार्थविरुद्धस्तत्र
पदे जहत्स्वार्थालक्षणेति समुदायार्थस्त्वपि कश्चित् · एतन्मतेन जहत्स्वार्थैवेत्यन्वयं विनागतिरिति
ध्येयं · उपसंहरति · तस्मादिति · अन्यथेति · अवयवलक्षणोपपत्तावित्यर्थः · अनन्यलभ्यस्यैव शब्दा
र्थत्वादन्यथा गंगापदस्यापि तीरे शक्त्यापत्त्या लक्षणोच्छेदापत्तेरिति भावः · ननु चित्रगुरित्यादौ चि
त्रगोस्वामीसम्बन्धोऽनुभवसिद्धस्तस्य चावयवशक्त्या लक्षणया चोपपत्त्यभावाद् बहुव्रीहौ शक्तिराव
श्यकीति कथं न समासे शक्तिरित्याशंकते · स्यादेतदिति · बहुव्रीहौ तु · चित्रगुरित्यादिबहुव्रीहौ तु · नन्व
त्राप्यवयवलक्षणयैवोपपत्तौ न शक्तिः कल्पनीयेत्यत आह · नहीति · लक्षणाया · अवयवलक्षण

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त.प्र.२१

रूपकी. तस्माद्युगपद्वृत्तिद्वयविरोधेन शक्यालक्षणयाश्च बोधानुपपत्तेः. पंकजपदे समुदायशक्तिरेव
रूपकी समासेऽपि नैवमिति. अथवा पंकजमित्यत्रापि लक्षणायैवोपपत्तेः समुदायशक्तिर्न स्यादत आ
ह. तदुक्तमिति. पद्मत्वरूढिः समुदायशक्तिर्योगविरोधिनी योगोऽवयवशक्तिस्तद्विरोधिनी तत्रैकज
हत्स्वार्थालक्षणा. यथा मंडपं भोजयेत्यत्र हि मण्डपपदस्य गृहविशेषे रूढिर्योगविरोधिनी रूढ्यर्थ
गृहे मंडपानकर्तृत्वासंभवात्. यथा च रूढेर्योगापहारितेति प्रवादादवयवशक्त्या मंडपानकर्तृ
बोधासंभवान्मण्डपपदस्य मण्डपानकर्तरि लक्षणा. इत्थं च रूढ्यर्थगृहसंबन्धिना वक्रेद
कतया गृहीतचैत्रत्वादिनान्वयबोधोऽनन्तुमंडपानकर्तृत्वेन. पंकजमित्यादौ तु रूढ्यर्थस्यु
पंकजनिकर्तृत्वयोगार्थस्याविरोधादवयवशक्त्यैव बोधः. पद्मत्वविशिष्टस्य च लक्ष
णया बोधोपगमे युगपद्वृत्तिद्वयविरोधात्पंकजपदे समुदायशक्तिरेव रूपकी. एज

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्यविधेयकस्वरूपशक्यसंबंधस्य बाहुल्ये लक्षणाबोधेन शाब्दान्वयवार्थबोधाभावात्। न चात्र वि
वेचकत्वेन लक्षणायामजहत्स्वार्थत्वमिति वाच्यं। यत्र स्वार्थस्य विशेष्यतया क्रियान्वये प्रवे
शः साजहत्स्वार्था। यथा छत्रिणो यांतीत्यादौ। एवं च षष्ठीः प्रवेशाये त्यत्रापि जहत्स्वार्थैव।
प्रकृते च राजपुरुषपद्यतिसमुदायस्य राजसंबंधिपुरुषबोधे रूढिः प्रसिद्धिः। राजाभिन्नपुरुषस्य
योगार्थस्य विरोधिनीति तत्र जहत्स्वार्थालक्षणा। स्वार्थस्य राज्ञो विशेष्यतया क्रियान्वयप्र
वेशाभावात्। पंकजमित्यादौ तु पद्मस्य रूढ्यर्थस्य पंकजनिकर्तृत्व योगार्थस्याविरोधाद
न्वयवशात्तेन पंकजनिकर्तृबोधः। पद्मत्वविशिष्टबोधार्थं च पंकजपदस्य पद्मत्वविशिष्टे
लक्षणाकल्पने तु शक्त्या पंकजनिकर्तृयोगार्थस्य लक्षणया च पद्मत्वविशिष्टस्य बोधो
वाच्यस्तस्य च योगपद्यं नित्यविरोधेनासंभवात् पंकजपदस्य पद्मत्वविशिष्टे रूढिरेव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ग०प्र०टी० स्वरूपायोग्यात्तत्रैवजहत्स्वार्थानत्वन्यत्र॰ अन्यत्रत्वजहत्स्वार्थायथा गंगायां घोषइत्यत्रतीराधिकरण
कोघोषइत्येवान्वयबोधउपेयस्तत्र चप्रवाहस्यतादृशबोधविषयत्वाभावेन तादृशबोधेस्वरूपायोग्य
त्वमस्त्येवगंगापदस्येतिगंगापदे जहत्स्वार्थालक्षणा॰ मंचाः क्रोशन्तीत्यत्रतुमंचपदस्यमंचस्थपुरु
षेलक्षणायां मंचरूपस्वार्थस्यापि तादृशबोधविषयत्वादजहत्स्वार्थैवलक्षणा॰ एवंचनकेवलंजह
त्स्वार्थैवलक्षणा॰ येनराजपदस्यराजसंबन्धिनि लक्षणाकल्पनं नस्यात्॰ किंत्वजहत्स्वार्थापी
तिसात्राङ्गीकार्येतिभावः॰ वस्तुतस्तु॰ नचैवंपंकजमित्यादावपिसमुदायेशक्तिर्नस्यादवयव
लक्षणयैवपद्मत्वविशिष्टबोधोपपत्तेरित्यत आह॰ तदुक्तमिति॰ यत्ररूढिः प्रसिद्धिर्योग
विरोधिनीतत्रैवजहत्स्वार्थलक्षणा यथाकर्मणिकुशलइत्यादौदक्षेरूढिः प्रसिद्धिः कुशा
ल्लातीतिकुशादानकर्तृयोगार्थस्यविरोधिनीदक्षेकुशादानकर्तृत्वस्यबाधादितिकुशपद
ले

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नहीत्यर्थः · अवयवशक्त्यग्रहे राजपदादिशक्त्यग्रहे · अनुशासनग्रहः · अनुशासनजन्यविशिष्टार्थे शक्तिग्रहः
तच्छक्तिग्रहस्य · अवयवशक्तिग्रहस्य · समुदायग्रहे · समुदायशक्तिग्रहे हेतुत्वादिति · व्यवहारादिना नावश्य
क्तिग्रहः · किंतु व्याकरणादितः · व्याकरणे नहि प्रत्येकशक्तः राजपदादिसमुदायो विशिष्टार्थे शक्त इति बो
धनीयं तन्नु प्रत्येकशक्त्यग्रहे न संभवतीति तज्जन्यसमस्तशक्तिग्रहेऽवयवशक्तिग्रहस्य हेतुत्वात् राज
पदादिशक्तिग्रहाभावे समुदायशक्तिग्रहस्याप्यभावान्न ततोऽन्वयबोध इति भावः · अवयवेति · राज
पदस्य राजसंबन्धिनि लक्षणयैवेत्यर्थः · समुदायशक्तौ · समासवाक्ये विशिष्टार्थशक्तौ · माना
भावादिति · अनन्यलभ्यो हि शब्दार्थ इति न्यायादिति भावः · ननु गंगायां घोष इत्येवाजहत्स्वा
र्थैवात्र लक्षणोपेया सा तु न संभवति राजपदस्य राजसंबन्धिनि लक्षणायां स्वार्थपरित्यागा
भावादित्यत आह · तदुक्तमिति · पत्रस्थितिः शक्तिविरोधिनी स्वार्थविषयकविशिष्टार्थबोध

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वभ्रमदशायां दधिकर्मकः पश्यति दधिकर्मकेण पश्यतीत्यत्रैवान्वयाबोधेन कर्मत्वार्थकविभक्तिं वि
ना निराकांक्षत्वेन तदनुसंधानस्यावश्यकत्वात्. समासस्थलेत्वन्यथैव व्युत्पत्तिः अत एवाग्नि
नौदनं पचतेत्यत्रतान्येव पदानि समर्थानि न तु तदर्थकाणि आग्निकरणकौदनकर्मकपाकक
तिरिष्टसाधनमिति तु वाक्यं न पदमित्युक्तमिति. समासस्येति. घटमानयेति शब्दसमुदाय
वारणाय समासस्येति. राजपुरुष इत्यादिसमासवाक्यस्येत्यर्थः. विशिष्टार्थे. राजसम्बन्धिपुरुषरू
पे विशिष्टेर्थे. शक्तिरेवेति. तथा च समासे शक्त्यैव विशिष्टार्थबोधोपपत्तेर्नातिरिक्तशक्तिक॰
ल्पनमिति भावः. एवं समासे शक्तिस्वीकारे. राजपदेति. राजपुरुष इत्यत्र राजपदं राज्ञि श
क्तमिति शक्तिज्ञानस्य काले पि राजपुरुषपदे राजसंबन्धिपुरुषे शक्तमिति शक्तिज्ञान॰
सम्भवेन तादृशबोधापत्तेरित्यर्थः. समस्तेति. समासस्थो विशिष्टार्थे शक्तियह इत्यर्थः. न चेति.

Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रूढविभक्तिराहित्यमित्यर्थत्वावश्यकतया भवन्मतेप्यगतेश्चस्त्रीचक्रुरित्यस्य स्वरसोद्भावनीतद्दीजंतुक
चित्समासपूर्वविग्रहश्रवणस्य समासार्थकथनपरतया विग्रहश्रवणस्य सर्वत्रानावश्यकतया
लुप्तषष्ठीस्मरणकल्पने गौरवात् कश्चित्तु राजसंबन्धिनिस्वारसिकलक्षणाग्रहस्थलानुरोधेन
राजसंबन्धिप्रकारकबोधे तादृशसमभिव्याहारज्ञानस्य कारणत्वकल्पनाया आवश्यकतया
तत्रानिरूढलक्षणाया एव न्याय्यत्वात् न च संबन्धिनि तात्पर्यस्यानादित्वकल्पनमेव निरू
ढलक्षणाकल्पने गुरु अनादितात्पर्यविषयीभूतार्थनिष्ठलक्षणाया एव निरूढलक्षणा
त्वादिति वाच्यं नियमतो लुप्तषष्ठीस्मरणकल्पनापेक्षया तात्पर्यानादित्वकल्पनाया एव
युक्तत्वात् न चैवं दधिपदप्रतीत्यादावपि दधिपदस्य दधिकर्मके लक्षणापत्त्या तत्रापि लु-
प्तविभक्त्यनुसंधानं विनापि बोधापत्तिरिति वाच्यं। अत्र दधिपदस्य द्वितीयेतरविभक्त्यन्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त·प्र·रा· मात्राद्बोधस्वीकारेतत्रदोषादीनामननुगतानांनियामकत्वकल्पनेनियमतस्तन्मूलनाद्यादोषक
ल्पनेचगौरवमतआह·राजपदेति·पूर्वकल्पेतुराजपदस्यराजसम्बन्धिनिनिरूढलक्षणाएतन्मते
तुषष्ठीलोपस्मरणासम्भवस्थलेराजपदेस्वारसिकीलक्षणाइदमेवलाघवमितिभावः·न
चनऊढस्यराजमातंगाइत्यादावेतन्मतेलुप्तषष्ठीस्मरणस्यावश्यकत्वात्समानविभक्तिकत्वेनाभे
देनान्वयबोधापत्तिरितिवाच्यम्·नहिसमानविभक्तिकत्वाभावनिबन्धनमभेदेनान्वयाननु
भावकत्वं·किंतुसमासाघटकपदसापेक्षतयातद्भावेनसविशेषणानांवृत्तिर्नवृत्तस्यचविशे
षणयोगोनेतिनियमात्·नचैवंशरैःशातितपत्रश्चैत्रस्यदासभार्येत्यादौशरकरणकत्वचै
त्रनिरूपितत्वयोःसमासविशेषणीभूतशातनदासत्वयोःकथमन्वयइतिवाच्यम्·अभेदेना
न्वयेतथानियमात्·स्तोकंपचतीत्यादावभेदान्वयानुरोधेनसमानविभक्तिकत्वमित्यस्यवि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धानं· अतएवच्चा विग्रहेऽस्वपदविग्रहो वा नित्यसमास इति तद्दक्षणं· अथ समस्यमानपदैरेवार्थकथनरूपविग्रह-
स्य साधुविग्रहस्य वाक्यासमासयोः समानार्थकत्वनियमे प्रवेशान्नोक्तस्थले व्यभिचार इति चेन्न· अप्रयोजकत्वा
त्· वस्तुतस्तु नामार्थयोरभेदेनैवेति व्युत्पत्तेः· संकोचे मानाभावात्तत्संबन्धिनि लक्षणया आधाररूपकत्वे समानविषय
कबोधजनकत्वमित्येवकल्पनान्नतु समानप्रकारकबोधजनकत्वं समानार्थकत्वमित्यादिक· षष्ठ्यैवेति· एतन्ता
सतीति शेषः· एवं च षष्ठ्या एव संबन्धोऽर्थः· आश्रयाश्रयिभावेन पुरुषे भासते नामार्थयोरवच्छाभेदाऽतिरि
क्तसंबंधेनान्वयबोधनिषेधादिति भावः· ननु यस्य न षष्ठी लोपज्ञानं तस्य तु प्रथम षष्ठी स्मरणसंभवेना
न्वयबोधानुपपत्तिरित्यत आह· षष्ठीलोपमिति अज्ञानतस्तु· अननुभवनस्तु· शक्तिभ्रमात्· राजपुरुष
इति समुदायस्य राजसंबन्धिनि पुरुषे शक्तिभ्रमात् ननु राजपदस्य शक्तिभ्रमादित्यर्थः· तथासति रा
जपदलक्षणया वेति राजपदस्य लक्षणयैव सहान्वयकथनात्तपपत्तेरिति ध्येयम्· नन्वेवं तच्च शक्तिभ्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त॰प्र॰टी॰ कृत्वाद्युक्तमेवं। समानविषयकबोधजनकत्वमित्येव हि समानार्थकत्वं न तु समानप्रकारक-
बोधजनकत्वं ननु आरूढवानरो वृक्षः इत्यत्र आरूढो वानरो यमिति विग्रहात्कर्मकारोहण-
कर्त्ता वानर इति बोधेन समासाच्च वानरकर्तृकारोहणकर्म वृक्ष इति बोधेनाभिन्नप्रकारकबो-
धस्यैवोदयेन व्यभिचारात्। एवं प्राप्तोदको ग्राम इत्यादावपि तत्र प्राप्तमुदकं यमिति विग्रहात्
यत्कर्मकप्राप्तिकर्तृ उदकमिति समासाच्च उदककर्तृकप्राप्तिकर्मभूतो ग्राम इत्यन्वयबोधात्। अ-
थ बहुव्रीहेरविग्रहतया नास्य विग्रहवाक्यत्वं चित्रगुरित्यत्र चित्रा गावो यस्येति समासार्थकथ-
नं न तु विग्रहः। समस्यमानपदैरेवार्थकथनस्य विग्रहत्वादिति चेन्न। नहि तत्र विग्रह एव नास्ती-
ति समासारम्भकवाक्यस्यैव विग्रहत्वात्। किंतु बहुव्रीहौ तस्यासाधुत्वं समस्यमानपदैरेव विग्र-
हस्य साधुत्वात्। अत एव बहुव्रीहौ विग्रहस्यासाधुत्वज्ञापनाय तत्र नित्यसमासाभि-

५८

Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्थकत्वभंगापत्तेः समानार्थकसमासारंभकवाक्यस्यैव विग्रहत्वादिति राजसंबन्धी
पुरुष इत्येव विग्रहवाक्यं वाच्यमिति कर्मधारयत्वापत्तेस्तत्पुरुषोच्छेदः नच राजन्याऽभेदप्र
तियोग्युपस्थापने कर्मधारय इति वाच्यम् नीलोत्पलमित्यादौ नीलपदस्य नीलाविशि
ष्टे शक्तिविरहेण कर्मधारयत्वाभावापत्तेः तस्माद्राजपदस्य राजसंबन्धिलक्षणा
स्वीकर्तुमुचिता नच राजसम्बन्धः पुरुष इति वदन्वयापत्तिरुक्तैव नामार्थयोरिति वा
च्यम् घटो नेत्यादौ नामार्थयोरप्यन्वयस्य दृष्टत्वात् निपातातिरिक्तस्थल एव तादृशा
नियमाभ्युपगमे च समासातिरिक्त एव मयापि तादृशनियमाभ्युपगमात् नचैवं राजसं
बन्धे लक्षणा वैयर्थ्यमिति वाच्यं व्यस्तसमासयोः समानप्रकारकबोधजनकत्वात्समस
मानार्थकत्वरक्षणायैव संबन्धे लक्षणाया उपगमात् सम्बन्धप्रकारकबोधस्यानुभवसि

स्थल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्वयः राजसंबन्धिपुरुषयोरन्वयबोधः नामार्थयोरभेदातिरिक्तसंबन्धेनान्वयो न स्वीक्रिय
तेन त्वभेदेनापि तत्स्वीकार इति भावः नचैवमिति षष्ठीतत्पुरुषेपि विशेषणविशेष्यवाचक
पदार्थयोरभेदान्वयस्वीकार इत्यर्थः अभेदे कर्मधारयस्य इत्यनेनाभेदबोधस्थले कर्मधारयवि
धानादिति भावः समाधत्ते समासेति लक्षणादि वाक्यार्थानुपपत्त्या क्रियते समासपूर्वे तु
न राजपदादौ लक्षणानुपपत्तेरभावात् तथा च समासपूर्वविशेषणविशेष्यवाचकपदयोः
समानार्थकयोर्यत्राभेदेनान्वयबोधकत्वं तत्रैव कर्मधारय इति भावः पदयोः राजपद
पुरुषपदयोः तुल्येति एकविशेष्यकबोधजनकत्वाभावादित्यर्थः पदे तुल्याधिकर
णे विज्ञेयः कर्मधारय इत्यनुशासनादिति भावः नचु राज्ञः पुरुष इत्यत्र सम्बन्धप्रकार
कबोधो राजपुरुष इत्यत्र सम्बन्धिप्रकारक इति विग्रहवाक्यसमासवाक्ययोः समाना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पत्तिरूपदोषतादवस्थ्यादित्यर्थः॥ ननु राजपदस्य राजसंबंधलक्षकत्वासंभवेपि राजपुरुष इति वा
क्यमेव राजसंबंधिपुरुषलक्षकमस्त्वित्याशंकते॥ अथेति॥ समुदाय एव॥ राजपुरुष इति वाक्य
एव॥ शक्तिविरहे॥ वाक्ये कुत्रापि शक्तिविरहे॥ लक्षणाया॥ वाक्ये लक्षणाया अयोगादित्यर्थः॥
ननु गंगापदस्य तीरे शक्त्यभावे यथा तीरे लक्षणा तथा वाक्ये कुत्रचिदप्यर्थे शक्त्यभावेपि लक्ष
स्या णादृत आह॥ शक्येति॥ तथा च लक्षणायाः शक्तिघटितत्वात्तदभावे नुपपत्तिः॥ तीरे गंगापदश
क्त्यभावेपि गंगापदशक्यसंबन्धसत्वान्न च लक्षणोपपत्तिः॥ अत्र तु वाक्ये कुत्राप्यर्थे शक्तेर
सत्वात् लक्षणानुपपन्नेति भावः॥ संबन्धीति॥ राजसम्बन्धि लक्षकत्वमित्यर्थः॥ क्वचिन्नैव
पाठः॥ ननु नामार्थयोरन्वयबोधो न स्वीक्रियते इति कथं पुरुषपदार्थे तदन्वय इत्यत आह॥ त
थाचेति॥ राजपदस्य राजसंबन्धिलक्षकत्वे चेत्यर्थः॥ अभेदेनैवेति॥ अभेदसंबन्धेनैवेत्यर्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

साक्षादन्वयबोधो नस्वीक्रियत इति नियमात् विभक्त्यर्थमद्वारीकृत्याभेदातिरिक्तसंबन्धेनान्व
यइति यावत् प्रकृते च सम्बन्धस्य विभक्त्यर्थत्वात् तद्द्वारान्वयबोधोपगमे पि क्षतिविरहादितिध्येयम् त
होति· तादृशनियममभ्युपेत्य राजा पुरुष इत्यत्र तथान्वयवारणो हीत्यर्थः· तयोः राजपुरुषयोः
तथान्वयः· अभेदातिरिक्तसंबन्धेनान्वयः· विभावयेति· तादृशनियमानभ्युपगमे राजा पुरु
ष इत्यत्रैव तथान्वयबोधापत्तिः· अभ्युपगमे त्वत्रापि न तथा स्यादित्यर्थः· ननु राजपदस्य राज
सम्बन्धिलक्षणो वास्तां राजा पुरुष इत्यत्र त्वभेदे एवतान्वये राजन्संबन्धिलक्षणोत्याशंकते· अथे
ति· तथापीति· राजपदस्य राजसम्बन्धिलक्षकत्वेपीत्यर्थः· इतिवदिति· इतिवाक्यवदित्यर्थः· ना
मार्थयोरभेदातिरिक्तसम्बन्धेनान्वयस्याव्युत्पन्नतया राजपदार्थस्य राजसंबन्धस्याश्रयाश्र
यिभावेन संबन्धेन पुरुषेन्वयासंभव इतिभावः· तद्दोषेति· राजसंबन्धी पुरुष इत्यन्वयात् प

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्यत आह। तथैवेति· अन्यथा घटः कर्मत्वमानयनं कृतिरित्यगाप्याधेयतासम्बन्धेन घटीयाकर्मते
त्यन्वयबोधापत्तेरितिभावः· ननु राज्ञः पुरुष इत्यत्र राजपुरुषयोरभेदातिरिक्तसम्बन्धेनैवान्व
यबोधोदयात्तादृशनियम इत्यत आह एतेनेति· नामार्थयोरेव न तथान्वयः· राज्ञः पुरुष इ
त्यत्र तु षष्ठ्यर्थस्य नामार्थत्वाभावेनाभेदातिरिक्ते नापि संबन्धेनान्वयो नानुपपन्न इत्यर्थः·
विभक्त्यर्थेति· षष्ठ्यर्थसंबन्धनामार्थयोरित्यर्थः· षष्ठ्यास्तु नामत्वं व्यापत्तिमिहनामेष्टमित्यभि
युक्तोक्तिविरुद्धत्वादितिभावः· ननु राज्ञः पुरुष इत्यत्र सेव्यसेवकभावलक्षणसंबन्धप्रका
रकइव सेव्यसेवकभावलक्षणसम्बन्धेन राजप्रकारकपुरुषविशेष्यकोप्यन्वयबोधो भव
ति यथा घटमानयेत्यत्र कर्मतासम्बन्धेनानयनोपरि घटोप्यन्वेतीति सिद्धान्तात्· तथा चैतन्
नियमभंग इति चेन्न· तस्यैकदेशिमतत्वात्· मन्मते तु नामार्थयोरभेदातिरिक्तसंबन्धेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

था च॰ यथा नीलघटयोरभेदः संसर्गमर्यादया भासते तथा यक्षीतत्पुरुषेऽपि सेव्यसेवकभावलक्ष
त॰प्र॰त्रा॰ णः संबन्धः संबन्धविधयैव भासत इति भावः॰ तद्दापत्तेरिति॰ वाक्यार्थसंबन्धभानापत्तेरित्यर्थः
राजपुरुष इत्यत्रेवात्रापि संसर्गस्य संबन्धविधया भानापत्त्या राजसम्बन्धी पुरुष इत्यन्वय
बोधापत्तेरिति भावः॰ ननु घटः कर्मत्वमानयनं कृतिरित्यत्र घटमानयेत्यत्रेवाधेयता सं
बन्धेन कर्मत्वे घटान्वयबोधापत्त्या घटकर्मकानयनानुकूलकृतिमानित्यन्वयबोधाप
त्तेर्नामार्थयोरभेदातिरिक्तसंबन्धेनान्वयबोधो नस्वीक्रियत इति व्युत्पत्तेरवश्यम्पेया॰
एवं च राजपुरुष इत्यत्र कथमभेदातिरिक्तसम्बन्धेनान्वयबोधमापादयतीत्याशंकते॰
अथेति॰ अभेदेनैव सेवकारेण भेदातिरिक्तसंबन्धव्यवच्छेदः एवकारार्थस्य स्वय
ति॰ न त्वन्यथेति॰ न त्वन्यथा न तु भेदातिरिक्तसंबन्धेनेत्यर्थः॰ नन्वेवं नियमे मानाभाव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वन्धो भासते· संबन्धग्रहे च याहृशं यस्य भानं तथैव तस्य स्मरणं· तथा च लक्ष्यतावच्छेदकेऽपि परंप
रासम्बन्धात्मिका लक्षणैवेति प्राहुः· राजपुरुष इत्यादौ शक्त्या लक्षणया वा राजसंबन्धिपु
रुषबोधानुपपत्तेरतिरिक्ता वृत्तिरवश्यमभ्युपेया· तथा च कथं शक्तिलक्षणे एव वृत्ती इत्युच्य
त इत्यभिप्रायवानाशंकते· नन्विति· एते एव· शक्तिलक्षणे एव· एवकारेण वृत्त्यन्तरव्य
वच्छेदः· षष्ठ्यर्थेति· तत्र षष्ठ्याऽनुपस्थितेन राजपदादेश्च संबन्धेऽशक्त्या तदसंभवात्कथं सम्बन्धबो
धः इत्यर्थः· तदेवाह· नहीति· ननु प्रकारतया विशेष्यतया वा बोधे वृत्तेरपेक्षा न तु संसर्गमर्या
दया भाने· तथा च घटमानयेत्यादौ घटकर्मतयोराधेयतारूपसंसर्गवद्राजपुरुष इत्यत्रा
पि स्वस्वामिभावरूपसंबन्धभाने वृत्तिं विनैव स्यादित्याशंकते· अथेति· नीलपदेति· नीलप
दस्य निरूढलक्षणया नीलादिविशिष्टमर्थः· तस्य चाभेदसंसर्गेण घटेऽन्वय इत्यर्थः· त

त.प्र.२७ णा विधेयार्थेन लक्षणा विधेयताशालिशाब्दबोधत्वे शक्तिज्ञानकार्यतावच्छेदके लक्षणायाश्शा
ब्दबोधत्वेन विधेयताशालीति न व्यभिचार इति विधेयतया लक्ष्यार्थबोधो नास्तीति प्रवादबीजंला
क्षणिकं पदं नानुभावकमिति प्रवादस्योद्देश्यविधेयभावेनान्वयो नास्तीत्यर्थः ॰ एवं विशि
ष्टवाचकपदानां विशेष्यमात्रपरत्वेन लक्षणा एकया वृत्त्या येन रूपेण ज्ञाते भवति लक्षणा इ
ति न्यायात् लक्ष्यतावच्छेदके न लक्षणेति प्रवादा अनुसन्धेयाः ॰ केचित्तु लक्ष्यतावच्छेदके
लक्षणाया अकल्पने गौरवेऽपि शक्तिविलोपप्रसङ्गः ॰ इत्युपस्थाप्यस्यैव शाब्दबोधविषय
त्वाश्रितत्वे शक्तिकल्पने लक्ष्यतावच्छेदकेऽपि तथा ॰ अथ तीरत्वेनोपस्थितिं विना तीरत्वं गंगा
याइति संबन्धग्रहाभावात्तत्र न लक्षणेति चेन्न ॰ घटो नेत्यादौ यथा प्रतियोगितावच्छेदक
त्वसंसर्गमर्यादया भासते तथा गंगायां तीरमित्यत्र तीरत्वेऽपि सामीप्यावच्छेदकत्वसं

न३

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यानामिति व्युत्पत्तिभंगप्रसङ्गात् . न चैवं निरर्थके जवगजदश माहेत्यादौ स्वशक्याभावात् लक्षणानुपप
त्तिरिति वाच्यम् . प्रत्येकवर्णोभ्यं द्वयोः नरश्च समाना क्रियापदार्थान्वया समुदायस्योच्चारणसंभ
वेन तत्र तदनन्वयात् . तेषां च तत्तत्र ... न तत्रैव लक्षणोपगमादिति गणेशोक्तादयः . प्रसिद्ध
शाल्लिंगात्तु तद्धतीति कोशस्यो भयत्र शक्तिबोधकत्वेपि नीलादिपदानां धर्मे शक्तिः धर्मि
णि च लक्षणा . मत्सरस्यादेः मात्सर्ये धर्मे धर्मिणि चशक्तिरिति संप्रदायः . नीलादिपदवन्मा
त्सर्ये शक्तिः धर्मिणि लक्षणा . न च मत्सरशब्दस्य धर्मे धर्मिणि च तुल्यवत्प्रयोगादुभयत्र शक्ति
रिति वाच्यम् . नीलादिपदस्यापि गुणिनि प्रयोगप्राचुर्यात् धर्मिणि लक्षणायैवोपपत्तेः
न तत्र शक्तिरिति नु मत्सरशब्देपि तुल्यमिति मत्सरशब्देपि धर्मे शक्तिः धर्मिणि लक्षणोत्य
न्ये . अत्र सुविभक्तो न लक्षणा सर्वनाम्नि न लक्षणा वादिवाक्ये यन्न लक्षणाविधौ न लक्ष

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्.प्र.टी वशाक्यलक्ष्यसाधारण्यमप्युपपादयत इत्याहुः। अपरे तु पङ्कजादावेकैकसार्थवृत्तिलक्षणाप्रत्ययश्रुतात्पर्यग्रा
हकः। अथवा संबन्धिसामान्यसंसर्गमनुप्रत्यये एकसार्थसम्बन्धित्वेन लक्षणाच्छत्रपदं तात्पर्यग्राहकमित्या
८२ हुः। अत्र च लक्षणासंबंधस्य लक्ष्यतावच्छेदकत्वं यथा दध्युपधानकत्वैकसार्थवाहित्वादेरिति बोध्यम्। ए
वं पदानां स्वपरत्वे लक्षणैव न शक्तिः अन्यलभ्यत्वात्। केचित्तु पदानामौत्सर्गिकमर्थपरत्वं तेन तद
भावे स्वपरत्वं तथा च प्रत्यक्षेण पदजन्योपस्थितिसत्त्वाच्छाब्दे तद्भानमित्याहुः। तन्न। प्रत्ययानां
प्रकृत्यर्थान्वितस्वार्थबोधकत्वनियमेन तत्र विभक्त्यर्थान्वयानुपपत्तेः इति स्वीकारस्याव
श्यकत्वात्। अत एव पदस्य स्वबोधकत्वं वृत्तिं विनैव स्वभावात्। अन्ये तु स्वबोधनेऽतिप्र
सङ्गात् वृत्तिः कल्प्या स्वस्य स्वबोधकत्वेन नैवं इत्यादिपदस्य स्वार्थान्वयानुपपत्तेः सहकारि
त्वाच्च न सर्वत्र स्वबोधप्रसङ्गः। एवं स्वबोधिते स्वस्मिन् विभक्त्यर्थान्वयोपपत्तिपराः। अत्र प्रत्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रे घोषइत्येव वोधात् · यदि च गंगासम्बन्धितीरत्वेन वोधस्तदा त्वजहत्स्वार्थैव · अन्या च · काकेभ्यो दधिरक्ष्य-
मंचस्य तां · छत्रिणो यान्तीत्यादौ दध्युपघातकत्वेन काककुक्कुरादीनामेकसार्थवाहित्वेन छत्रितरणां वोधात् · एवं
मंचाः क्रोशन्ति यष्टीः प्रवेशयेत्यादौ मंचपदस्य पुरुषे · यष्टिपदस्य यष्टिधरे लक्षणा ऽजहत्स्वार्थैव स्वा
र्थपरित्यागेन परार्थलक्षणा जहत्स्वार्था · स्वार्थापरित्यागेन परार्थलक्षणा ऽजहत्स्वार्थेति तल्लक्षणात् ·
ननु छत्रिणो यान्तीत्यादौ छत्रिशब्दस्य वाक्यत्वान्न लक्षणा नापि छत्रपदे छत्रपदार्थपरित्यागेनाजह
त्स्वार्थत्वायोगात् · किंचात्र लक्ष्यतावच्छेदकं नैकसार्थगन्तृत्वं यान्तीत्यस्यानन्वयापत्तेः · गन्तृत्वेनोप
स्थितस्य गमनाकांक्षाविरहादिति अत्राहुः · छत्रपद एव सार्थे लक्षणा मतुबर्थश्च संबन्धस्तथा ५
चैकसार्थवन्तो यान्तीति वाक्यार्थवोधः · छत्रिवाक्यलक्षणाभिप्रायेण चाजहत्स्वार्थतोक्तिः · अ
र्थपदस्य प्रतिपाद्यपरत्वाभिप्रायेण वा · केचित्तु · एकसार्थवत्त्वेन छत्रस्यान्वयान्न तथात्वं · अतए

त·प्र·रा

वद्घ्नितया भ्रमरस्य द्विरेफपदार्थत्वादिति · न च शक्याद् अन्येन रूपेण ज्ञाते भवति लक्षणेति भ्रमरपदशक्य
तावच्छेदकभ्रमरत्वस्य कथं लक्ष्यतावच्छेदकत्वं शक्येनैव तद्बोधसंभवादिति वाच्यं · शक्येन रूपेण
लक्षणानङ्गीकारे च शक्येनैव तद्बोधसंभवे लक्षणाकल्पनम् अफलमित्यस्यैव वीजतया प्रकृते च शक्या
भ्रमरत्वविशिष्टस्य बोधस्वीकारे भ्रमरस्य द्विरेफपदार्थत्वाभावेन विभक्त्यर्थान्वयानुपपत्त्या शक्य
स्यापि लक्षणयैव भानम् उपेयते एतन्मते लक्षितस्य पदस्य लक्षणा लक्षितलक्षणा सा च द्विरेफपद
स्य घ्नितिरिति · नन्न · शक्यसंबन्धो हि लक्षणा न तु शक्यस्य साक्षात्संबन्धो गौरवात् · एवं च परंपरा सं
बन्धेन लक्षणैव लक्षितलक्षणा, स्वलक्ष्य भ्रमपदघटितपरंपरासंबन्धेन भ्रमररूपार्थोपस्था
पकत्वसंभवाद् द्विरेफपदलक्षणयैवोपपत्तेर्नातिरिक्तघ्नितिकल्पनमिति दिक् · सा च लक्षणा
क्वचिज्जहत्स्वार्था क्वचिद् अजहत्स्वार्था च · आद्या · गंगायां घोष इत्यादौ स्वार्थस्य प्रवाहस्य त्यागात्
स्वलक्ष्यपदघटितलक्षणा सेति तु यावत् · तथा च परंपरासंबन्धेन लक्षणा या एव तथात्वेन द्विरेफपदस्य

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वरूपयोगार्थस्यायोग्यतया नान्वयबोधो न तु रूढ्यर्थस्मृतिस्तत्र प्रतिबन्धिकायोग्यतारूपतत्प्रकारेणावि
५ रहेणैतद्बोधोपपत्तेः । यत्र तु रूढ्यर्थस्यायोग्यता तत्र योग्यतया योगे न यौगिकार्थबोधो भवत्येव रूढेर्योगा
पहारप्रवादस्तु योग्यत्वात् रूढ्यर्थस्यान्वयबोधो न तु यौगिकार्थस्यायोग्यत्वादित्येतत्परो न तु योग्यतादि
मतोपि यौगिकार्थस्य नान्वयबोध इत्येतत्परः । यत्र च रूढ्यर्थगृहसंबन्धि चैत्रत्वादिना तात्पर्यप्रमाणा
न्तरादवधार्यते तत्र रूढिपूर्विका लक्षणा न तु सर्वत्रेत्यवधेयम् । लक्षितलक्षणापि दृष्टान्तरमिति
प्राञ्चः । द्विरेफपदेन द्वौ रेफौ यत्रेति व्युत्पत्त्या भ्रमरपदं लक्ष्यते भ्रमरपदेन च स्ववाच्यसंबन्धी भ्र
मररूपोर्थो लक्ष्यत इति द्विरेफपदस्य भ्रमरे लक्षितलक्षणा । न च द्विरेफपदलक्ष्यभ्रमरपदशक्त्यै
व निर्वाहे लक्षितलक्षणापीति वाच्यं । प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वनियमेन भ्रमरस्या
द्विरेफपदार्थत्वाभावे न तत्र विभक्त्यर्थान्वयापत्तेः । मन्मते च लक्षितलक्षणायां द्विरेफपदस्यै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पपदादपियोगार्थस्यैवप्रथमंस्मृतिसंभवेननलक्षणेतिवाच्यं॰ अत्रप्रकरणादेरभावात्रूढ्यर्थस्यैवप्रथ
मंस्मृतिरितिरूढिपूर्विकालक्षणा॰ यत्रचयोगार्थप्रकरणाद्यवतारस्तत्रयोगार्थस्यैवबलवत्वान्न
लक्षणा॰ यद्यपिपदृशानमेवोद्बोधकंनप्रकरणादिकंतथाप्येकतरप्रकरणमपरस्मृतौप्रतिब
न्धकंमवसेयमितिवदन्ति॰ तत्ररूढ्यर्थान्वयबोधोवानस्मृतिर्वायौगिकार्थान्वयबोधेप्रतिब
न्धिका॰ नताबदाद्यः॰ रूढ्यर्थस्यप्रथममुपस्थितत्वेपितस्यायोग्यतयायौगिकार्थान्वयबोधेबा
धकाभावात्॰ नद्वितीयः॰ प्रकरणादिनायत्रयौगिकार्थान्वयबोधस्तत्ररूढ्यर्थस्मृतेरभावात्त
स्याःप्रतिबन्धकत्वोपपत्तावपितस्यायौगिकार्थस्मृतौतदन्वयबोधेवाप्रतिबन्धकत्वेमानाभा
वात्॰ साक्षादविरोधिनोज्ञानजनकज्ञानविघटकत्वेनैवप्रतिबन्धकत्वात्॰ अनुमितौतुसिद्धे
रणत्याफलबलेनतथात्वकल्पनात्॰ तस्माद्यत्रमंडपपदस्यगृहपरत्वंतत्रमंडपानकर्तृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मौत्सर्गिकं· यत्र तु यौगिकार्थस्य प्रकरणवशात्प्रथममुपस्थितिस्तत्र रूढेर्योगस्य बलीयान्· यथाग्निर्व
सुभिः सोमो रुद्रैरिन्द्रो मरुद्भिर्वरुण आदित्यैर्बृहस्पतिर्विश्वेदेवैरित्यत्र प्रकरणवशाद्विश्वेदेवपदेन वसुरु
द्रमरुदादित्यरूपसर्वदेवानामेव योगेन स्मृतिर्न तु रूढ्या पुरूरवोमाद्रवःप्रभृतिगणानामुपस्थितिः
एवं न प्रेप्सया सिद्धया नयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमित्यत्र वाजमन्नममिक्षारूपं ये
षामस्ति ते वाजिन इति योगाद्वाजिनेऽपि विश्वेदेवदेवताकत्वस्य प्रकरणेनोपस्थितत्वान्न तु वाजिपदेन
रूढ्याश्वानामुपस्थितिरिति नामिक्षाधिकरणसिद्धान्तविरोधः· न च रूढेर्योगाद्बलीयस्त्वेन रू
द्वि ढ्यर्थधीरेव स्यादिति वाच्यं· रूढ्यर्थयोगार्थयोरुपस्थितावनुपस्थितौ वा रूढेर्बलीयस्त्वं प्रकृते तु
प्रकरणवशेन योगार्थस्यैव स्मरणान्न तु रूढ्यर्थस्य प्रकरणेनोद्बुद्धसंस्कारस्यैव शाब्दबोधे
ध इति शाब्देन प्रकरणसंवलनेन योगार्थस्मृतिरेव जन्यते न तु रूढ्यर्थस्मृतिरिति· न चैवं मण्ड

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ग्यत्तया रूढ्यर्थस्यान्वयबोधाभावेपि योगिकार्थबोधे बाधकाभावात्· अथ मण्डपपदस्य सत्त्व
न.प्र.श. पि योगे प्रयोगप्राचुर्याभावाद् अश्वकर्णादेः कुण्ठनं कल्प्यते· अन्यथाऽनेकार्थाक्षादिपदादिवन्मण्ड
पानकर्तृरूपस्य योगेपि कदाचित्स्यादिति चेन्न· तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजि
नमित्यत्र वाजमन्नमामिक्षारूपं येषामिति योगाद् वाजिपदेन विश्वेदेवा उच्यन्ते ननु रूढ्याऽश्वा
श्वा इति सिद्धान्तस्तव न स्यात्· न स्यात् विश्वेदेवेषु वाजिपदप्रयोगप्राचुर्यमस्ति· मण्डपानकर्तृ
रि कदाचिदपि मण्डपपदस्य योगेन प्रयोगो नास्तीति तु तवैवाभिमान इति· मैवं· मण्डपप
दाद् घटादिवद् गृहविशेषस्मृतिस्तदेव मण्डपपदार्थोपस्थितिस्तदुत्तरमपि वृत्त्यर्थस्य तदनन्तरं प्र
त्ययार्थस्य ततो मण्डपानकर्तृत्वेन ज्ञानस्येति योगिकार्थस्य विलम्बात्· तदेवं रूढयोगि
कयोर्लाघवं शीघ्रविनिगमितधीकृतमेव· तथा च रूढ्यर्थस्य शीघ्रमुपस्थितत्वाद् बलवत्त्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

क्ति: न च रूढेर्योगापहारित्वेनेति प्रवादादवयवशक्त्या मण्डपानकर्तृबोधासंभवेन मण्डपपद-
स्य मण्डपानकर्तरि लक्षणा । इत्थं च रूढ्यर्थग्रहसम्बन्धितावच्छेदकतया गृहीतचैत्रत्वेन कर्तृबोधे न
तु मण्डपानकर्तृत्वेनेति पंकजमित्यादेनुपपन्नस्य रूढ्यर्थस्य पंकजनिकर्तृश्च योगार्थस्याविरोधाद
वयवशक्त्यैव पंकजनिकर्तृबोधः । ननु शक्यार्थपरत्वे संभवति लक्षणाकल्पनमन्याय्यं । न च
रूढेर्योगापहारित्वान्तथेति वाच्यम् । कोयमपहारः न तावद्यौगिकार्थास्मृतिः रूढ्यर्थ इव यौगि
केपि स्मारकसंबन्धस्य शक्तेस्तुल्यत्वात् । न च योगार्थस्य प्रथममस्मृतिः स इति वाच्यं । म
ण्डपसमुदायेन यदा स्वार्थस्मरणं तदावयवार्थस्मरणे बाधकाभावात् । लक्षणापक्षे
पि रूढ्यर्थेन यदा स्वसंबन्धिस्मरणं तदावयवार्थस्मरणासंभवेन यौगिकार्थान्वयबो
धे संभवाच्च । न च स्मृतस्याप्यवयवार्थस्यान्वयबोधे बहिर्भूतत्वमेव स इति वाच्यं । अयो

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कारतानिरूपितार्थनिष्ठविशेष्यताकज्ञानत्वेन शाब्दबुद्धिं प्रतिकारणत्वं शक्तिसंबन्धेन शाब्दसंबन्धे
नवा पदप्रकारकज्ञाने शक्तेः संसर्गत्वाच्छक्तित्वनिष्ठावच्छेदकतायां पर्याप्तिः परं नानिवेश्यते तेन शाब्द
सम्बन्धेन पदप्रकारकज्ञानस्यापि संग्रहः परंतु पदप्रकारतानिरूपिता शक्तिनिष्ठा सांसर्गिकवि
षयतानार्थविशेष्यतानिरूपिता तेन शक्तिसम्बन्धेन पदाभावप्रकारकबाधबुद्धिप्रतिबध्यत्वं न
लक्षणाज्ञानस्येति बोध्यं· शाब्दसंबन्धस्याविनाभावरतिप्राञ्चः· नच मञ्चाः क्रोशन्तीत्यत्राभावात्·
तत्रापि तत्तत्समयमादायाविनाभावोपपादनेपि किमनेन शाब्दसंबन्धमात्रस्यैव लक्षणात्वौचित्
त्यात्· विनाभूतबोधस्य तात्पर्यज्ञानाभावेनैव वारणीयः· अनेकाविनाभूतसत्त्वेपि एकतरस्माने
तात्पर्यज्ञानबलादेवेति भवतोपि वाच्यत्वात्· मराडपभोजयेत्यादौ रूढिपूर्विका लक्षणेति मीमां
सकाः· मंडपपदस्य गृहविशेषे रूढिर्मंडपानकर्तरि च योगः रूढिः समुदायशक्तिर्योगोऽवयवशा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सम्बन्धस्य लक्ष्यलक्ष्यतावच्छेदकोभयसाधारणस्यैकस्याभावाननुपपत्तेरिति । तन्न । भवन्मतेपि यत्र
लक्ष्यतावच्छेदकलक्ष्योभयसाधारणः शक्यसंबन्धस्तत्रागतेः । तत्र लक्ष्यमात्रवृत्तिनानियामकसंबं
धेन तस्य लक्षणात्वोपगमे ममापि लक्ष्यमात्रवृत्तिविषयतासंबन्धेन तथोपस्थितेर्लक्षणात्वोप
गमात् इति । एतेन लक्ष्यतावच्छेदके लक्षणानास्तीत्यस्य लक्ष्यतावच्छेदकग्रहे शक्यसंबन्धरूपल
क्षणाग्रहेणापेक्षित इत्यर्थः । यत्रोभयसाधारणः शक्यसंबन्धस्तत्र लक्ष्यवृत्तित्वेनैव तत्संबंध
ग्रहापेक्षा न तु लक्ष्यतावच्छेदकवृत्तित्वेनापि शक्यतावच्छेदकविशिष्टे शक्तिग्रहाल्लक्ष्यतावच्छेद
केपि विशेषणविधया शक्तिज्ञानमपेक्षितमिति परास्तं । लक्ष्यमात्रवृत्तिविषयतासंबन्धेनोप
स्थितेर्विशिष्टबोधप्रयोजकत्वस्य ममापि सुवचत्वादिति । इदं चात्र बोध्यं । शक्तिलक्षणाज्ञान
योरेकैकएवकार्यकारणभावः । तथाहि शक्तित्वावच्छिन्नसांसर्गिकविषयतानिरूपितपदनिष्ठप्र

त·प्र·श· ल्कप्रकृतशक्यसंबंधरूपवृत्तेः स्मारकत्वेन कल्प्यते नतु शक्तिः तां विनाप्युपपत्तेः तथाचान्वयप्रतियोग्युपस्थाप
कत्वादथाक्षणिकस्याप्यनुभावकत्वापत्तिरवशिष्यते सापिपदानांस्वशक्यानुभवंप्रत्येवकारणत्वाव
धारणात् इतरपदार्थेनसह स्वशक्यानुभावकत्वेन क्लृप्ताद्घोषपदादेवतीरानुभवसंभवाल्लाक्षणिक
पदस्यनानुभावकत्वमितिवारणीयेति वस्तुतस्तूद्देश्यविधेयभावेनलाक्षणिकेनानुभावकमित्येव
तदर्थः उद्देश्यविधेयभावेनान्वयबोधेशक्तिमत्त्वस्यैवप्रयोजकत्वात् अतएवलक्ष्यार्थस्यविधेय
तयाऽभानाद्द्व्यर्थस्य तु विधेयतयैवभानान्नाविधौ परः शब्दार्थ इति संगच्छते किंच तंतुसंयोगस्य
पटसंयोगहेतुत्वतात्पर्यके तंतुः पटंकरोतीति सर्वलाक्षणिकस्थलेऽन्वयानुभवापत्त्यापत्तेर्लाक्ष
णिकपदमप्यनुभावकमितिनाद्यःप्रवादोऽकिंचित्करः यत्तुशक्याच्छक्योपस्थितिर्लक्षणेति
मते लक्ष्यतावच्छेदके लक्षणा नास्तीति प्रवादव्याघातः शक्यसंबन्धस्य लक्षणात्वमतेतुशक्य

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दनिरूपितशक्तिज्ञानत्वेन हेतुत्वं ताद्दशलक्षणाजन्यशाब्दबोधंप्रति ताद्दशस्वरूपसत्पदार्थोपस्थितित्वे
नैव हेतुत्वं न तु ज्ञरूपेण हेतुहेतुमद्भावः शक्यसंबन्धस्य लक्षणात्वे तु तीरोपस्थितेर्गंगापदजन्यत्वा
दन्वयप्रतीतौ स्वोपस्थापकतयानुभावकत्वसंभवत्येवेति ताद्दशप्रवादविरोधः अथ मन्मते गंगाप
दात्स्वशक्यसंबन्धिनप्रथममेव तीरोपस्थितिस्त्वन्मते तु पुनः शक्यस्मरणाज्जतस्मृतौ गौरवमिति चेन्न
पदस्य स्वशक्यसंबन्धेनाऽशक्येव तीरे ऽन्वयप्रतियोगिस्मारकत्वस्याक्लृप्तत्वेन तत्कल्पने गौरवात् स्मृ
ते न प्रवाहेण स्वसंबंधितीरस्मृतेरेवौचित्यादिति चेन्मैवं गंगापदात्तीरानुपस्थितौ प्रत्ययानां प्रकृत्य
र्थान्वितस्वार्थबोधकत्वव्युत्पत्तिभंगापत्तेः प्रकृत्यर्थोपस्थाप्येपि विभक्त्यर्थान्वये ऽतिप्रसंगादन
नुभवाच्च प्रकृतितात्पर्यविषयेण स्वार्थान्वयबोधकत्वेपि तथा धूमोस्तीति वाक्यतात्पर्यविषयेण
वह्निना धूमपदोत्तरविभक्त्यर्थान्वयापत्तेः तस्माद्गंगापदस्यापि तीरस्मारकत्वमवश्यमुपेयं एवं च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

याल्लक्षणायामेव तदन्तर्भावादित्याशयः॰ एवं सिंहो माणवक इत्यत्रापि गौण्या लक्षणया सिं-
ल॰प्र॰टी॰ हसदृशोपस्थितौ सिंहसदृशाभिन्नो माणवक इत्यन्वयबोधोऽवसेयः॰ एवं उक्तां लक्षयति तद
न्वेति॰ तदन्यासादृश्यान्यशाक्यसंबन्धरूपेत्यर्थः उक्तामुदाहरति॰ यथा आयुरिति॰ आयुः पद
स्यायुर्जनके लक्षणा तत्रायुःपदशाक्यसंबन्धो जनकत्वरूपो ग्राह्यः॰ तथा चायुर्जनकाभिन्नं घृत-
मित्यन्वयबोधः॰ ननु शाक्याद्यशाक्योपस्थितिर्लक्षणेति प्राचीनमते लाक्षणिकं पदं नानुभाव-
कमिति प्रवादः संगच्छते स्वजन्योपस्थितिसंबन्धेन पदस्यानुभावकतया गंगापदजन्यतीरोप-
स्थितेरभावात् गंगापदस्य तीराननुभावकत्वात्॰ किंतु घोषपदस्यैव तच्छाब्दं प्रति तदन्वयप्रतियो-
ग्युपस्थापकपदत्वेन कारणत्वात्॰ न च तच्छाब्दं प्रति धृत्यानत्यपदजन्यपदार्थोपस्थितेर्हेतुत्वा-
त्कथमेतदिति वाच्यम्॰ तदर्थवाचकतत्पदनिरूपितशक्तिज्ञानजन्यतच्छाब्दबोधं प्रति तत्प

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ष्यापत्तिरेव तथापि वक्तृसामान्यतात्पर्यात्मकत्वापत्तिरिति बोध्यं. स्वशक्येति. स्वेन लाक्षणिकं प
दं तस्य यच्छक्यं तत्संबन्धो लक्षणेत्यर्थः. इदमेवोपपादयति. अभिहितेति. गंगायां घोष इत्या
दौ स्वं गंगापदं तच्छक्यः प्रवाहस्तत्संबन्धः संयोगादिरूपस्तीरेऽस्तीति गंगापदस्य तीरे लक्ष
णेत्यर्थः. गौणपादत्पन्नत्ववादिमतव्यवच्छेदाय लक्षणायामेव तदन्तर्भावं दर्शयितुं ल
क्षणां विभजते. सा चेति. शक्यसम्बन्धरूपा लक्षणा चेत्यर्थः. तत्र गौणीं लक्षयति. सादृश्ये
ति. तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वं सादृश्यं तदात्मकः शक्यसम्बन्धो गौणीत्यर्थः. गौ
णीमुदाहरति. यथेति. वाहीको वाहीकदेशोद्भवः गौर्वलीवर्द इत्यर्थः. अत्र वाहीके गवाभेद
स्य बाधाद्गोपदेन गोसदृशो लक्ष्यते. गोसादृश्यं च गोगतजाड्यमांद्यादिकमेव. तथा च. जडो मं
दश्च वाहीक इति शाब्दबोधः. एवं च लक्षणायैवोपपन्नो गौणपारव्या[redacted]तिरिक्ता वृत्तिर्नोपे

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त·प्र·श· स्वशाब्दबोधानुकूलत्वेन तत्र तच्छाब्दबोधोपयोगिलक्षणायाङ्गीरत्वादिति ध्येयं· नन्वेवं शक्ये
पदार्थे तात्पर्ये लक्षणा· पदार्थत्वं च पदजन्यप्रतीतिविषयत्वं· विषयता च प्रकारताविशेष्य
तान्यतररूपा· इत्थं च संसर्गस्य पदार्थत्वाभावादेव न दोष इत्यत आह· किंचेति· तात्पर्येति· इष्ट
स्यापदार्थोपस्थितौ सत्यां शाब्दबोधे जाते तत्प्रतीतीच्छयोच्चारितत्वरूपतात्पर्यनिर्वाहो भ
वतीति तात्पर्यातिरिक्ता वृत्तिरवश्यमुपेया· नहि स्वयमेव स्वनिर्वाहकमिति भावः· ननु इष्टजः
शाब्दबोधनिर्वाहकत्वमेवोपेयते न तु तात्पर्यनिर्वाहकत्वमत आह· शक्तेरपीति· तथात्वापत्तेः·
तात्पर्यात्मकत्वापत्तेरित्यर्थः· तथा सति शक्तिलक्षणयोरभेदापत्तिः· यदि च तात्पर्याद्धि
ष्टेत्सारितिप्रवाहस्तत्र च पंचम्यर्थान्वयानुपपत्त्या तन्निर्वाहकतया शक्तेरतिरिक्ता तदा
लक्षणायामपि तुल्यमिति भावः· अन्वयधीप्रयोजकेच्छारूपशक्ते तात्पर्यात्मकत्वे इ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रीत्या · स च सम्बन्धो यद्यपि रेव न तु तस्या उपस्थिति रूपत्वमित्यर्थः · सैवेति · उपस्थितिरेवेत्यर्थः ·
अशक्ये इति · गंगायां घोष इत्यत्र गंगा पदाशक्ये तीरे · तात्पर्यं गंगा पदज्ञान्यं गंगापदात्
तीरबोधो जायतामितीच्छा विषयत्वं यत्तीरे तदेव लक्षणेत्यर्थः · शक्यतात्पर्यस्य लक्षणात्वं वारण
याशक्य इति · अन्वये इति · घटमानयेत्यादौ घटकर्मत्वयोराधाराधेयत्वरूपसंसर्गे तात्पर्य
सत्वात्तत्तात्पर्यस्य लक्षणात्वं स्यादित्यर्थः · न चेष्टापत्तिः · अन्वये न शक्तिर्नवा लक्षणेति
सिद्धान्तव्याघातात् · न च शक्यसंबन्धस्य लक्षणात्वस्वीकारेप्ययं दोष इति वाच्यं · अन्वये श
क्यसंबन्धस्य सत्वेपि तस्य तच्छाब्दबोधानुपयोगितया तच्छाब्दबोधानुकूललक्षणाया
स्तत्राभावात् · अन्यथा गंगापदस्य मुख्यपरत्वेपि शक्यसम्बन्धस्य तीरे सत्वात् छत्राक्षणिक
त्वापत्तिरिति लक्षणाया स्तत्र मूकत्वमेवोपेयमिति · तात्पर्यस्य लक्षणात्वे चान्वये तात्पर्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त·प्र·रा· त्वकल्पने गोरवादिच्छाया: संवन्धत्वग्राहकस्य भूरिप्रयोगस्याभावाच्च न[redacted]गंगापदतीरयो: संवन्ध
त्वं किंतु प्रवाहसामीप्यस्यैवेति तीरे शक्तिरस्त्वेवेति · किंच · पिधेहीत्यत्र द्वारे प्रस्थापकपदानाम
नन्ततयाविशिष्यानुपस्थितेर्यथेतरपदस्मेवानुभावकं नत्वध्याहृतं पदं तथा घोषपदादेवतीरान्वयवोधो
पपत्तेर्न गंगापदं तीरानुभावकमिति · तथाच गंगापदात्तीरवोधो जायतामित्याकारकत्वमप्यसि
द्धमेवेतिदिक् · लक्षणां निरूपयितुं पृच्छति · अथ केयमिति · शक्यात् गंगापदशक्यात्प्रवाहात् अ
शक्यस्य · गंगापदाशक्यस्य तीरस्योपस्थितिर्लक्षणेत्यर्थ: · गंगापदेन शक्त्या प्रवाहोपस्थितौ त
पदा २ त्रचान्वयानुपपत्तिप्रतिसंधानानन्तरं गंगा पुन: स्मृतेन प्रवाहेणैकसम्वन्धिज्ञानस्याप
रसंवन्धिस्मारकतया स्वसंवन्धितीरमुपस्थाप्यते · तथाच सैवोपस्थितिर्लक्षणेति भाव: उ
पस्थितीति · पदज्ञानस्य पदार्थस्मारकता एकसम्वन्धिज्ञानमपरसम्वन्धिस्मारकमिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त् · नचलाक्षणिकं पदं नानुभावकमिति गंगापदात्तीरबोधानुदयात् ताद्दशाकारत्वमस्त्वप्रमेयमेवेति वाच्यं · तथा
सति गंगापदस्याननुभावकत्वेन ताद्दशाकारकशक्त्यभावः · शक्त्यभावे चाननुभावकत्वमित्यन्योन्याश्रया
दिति · अथ ताद्दशो कृपेश्वरोच्चरितत्वं शक्तिः साच न तीर इति तत्र लक्षणैव · अतएवापभ्रंशेपि शक्तिभ्रम
इति चेन्न · ईश्वरोच्चरितत्वं न तज्जन्यत्वं अपभ्रंशादिसाधारणापात् · न तत्कंठताल्वाद्युच्चरितत्वं · आधुनिक
चैत्रादिपदेऽभावात् · षष्ठेऽहनि पिता नाम कुर्यादित्यादिना मान्यतो नामत्वेन तदुच्चारणोपपादनेना
पभ्रंशितत्वेत्यादिनाऽपभ्रंशत्वेन तदुच्चारणस्यापभ्रंशेपि सत्वात् · वैदिकपदस्यापि लाक्षणिक
तया ताद्दशेच्छयेश्वरोच्चरितत्वस्य त्वाद्दत्रस्येपि शक्त्यापत्तेश्चेति चेत् · अत्राहुः · अपभ्रंशादपि शाब्द
बोधोदयेनास्मात्कृब्दादयमर्थो बोद्धव्य इत्याकारकेश्वरेच्छायास्तत्रापि सत्वान्न ताद्दशाकारि
केच्छामात्रं शक्तिः · किंतु पदपदार्थसंबन्धत्वविशेषिता सा · तथा च तस्या नानातीरादिसंबन्ध

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

घः प्रतिवसतीति व्यवहारदर्शनाद्गङ्गापदस्य तीरे कथं न शक्तिरिति चेन्न। लक्षणीयपदार्थाना
त·प्र·श· मनन्तत्वेन तया सर्वत्र शक्तिकल्पने गौरवात् शक्यसंबन्धरूपा लक्षणानुक्लृप्तैव। एवमेकसं
बन्धिज्ञानस्यापरसंबन्धिस्मारकतया गंगापदजन्योपस्थितेः शक्यसंबन्धरूपलक्षणाज
न्यत्वमपि क्लृप्तमेव। लक्षणाजन्योपस्थितेः शाब्दबोधानुकूलत्वमात्रं कल्प्यते। शक्तिस्वी
कारे त्वतिरिक्तधर्मिकल्पनमिति धर्मिकल्पनातो धर्मकल्पना लघीयसीति न्यायेन तीरे
लक्षणैव। अथ शक्तिर्नातिरिक्ता किं त्वीश्वरेच्छारूपा सानुक्लृप्तैव। एवं च शक्तेरपि क्लृप्त
तया तज्जन्योपस्थितेः शाब्दबोधानुकूलत्वमात्रमयापि कल्प्यत इति न धर्मिकल्पनाया
इति न्यायावतारः। न चास्माच्छब्दादयमर्थो बोद्धव्य इत्याकारिकेश्वरेच्छाऽक्लृप्तैवेति वाच्यं
गंगापदात्तीरबोधोदये नेश्वरेच्छायास्तादृशाकारत्वावश्यकत्वात्तस्याः सर्वविषयकत्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कल्पकोपस्थिताकाङ्क्षाकांक्षादिज्ञानासंभवेन शाब्दबोधानुपपत्तिः एकस्यैवैकत्वस्योभयप
दार्थत्वात् तद्विवक्षया विभक्त्यर्थसंख्यामादाय भिन्नप्रकारकोपस्थित्यभावेनाकाङ्क्षाद्यभि
त्यत्राभेदान्वयानुपपत्तिश्चेति पदान्निर्विकल्पकस्य तत्स्वीकारोऽनुचित इत्यन्यत्रेदमादिकं· नन्वि
यता पूर्वबाधेन पदज्ञानेन शाब्दसामान्यजननीये शक्तिग्रहः सहकारिणामराणां च तदभावा
च्छाब्दबोध इति विवेचितं· न चेदं संभवति· गंगायां घोष इत्यादौ गंगापदस्य तीरे शक्त्यभावेपि शा
ब्दबोधोदयादित्याशंकते· नन्विति· तीरेति· तीरे गंगापदस्य शक्त्यभावादिति भावः· तत्त्वेन· शक्ति
त्वेन· प्रयोजिका· ज्ञाता सती शाब्दबोधोपयोगिनी· किंतु वृत्तित्वेनेति· प्रयोजिकेति पूर्वेणान्वितं·
वृत्तित्वं च· शक्तिलक्षणान्यतरत्वं· लक्षणेवेति· शाब्दसामान्ये वृत्तिज्ञानत्वेन हेतुतया गंगाप
दस्य तीरे लक्षणारूपवृत्तिज्ञानसत्त्वात्तीरशाब्दबोधो नानुपपन्न इति भावः· ननु गंगायां घो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्तद्रव्यत्वेनाप्युपस्थितेर्नियतात्तदुपस्थितिन नतच्छक्यं धर्म्यंशे शाब्दबोधकादेवतदंशेप्युद्बोधसंभवात्त
त्स्मृतेः शाब्दबोधस्य चोपपन्नत्वात्. यदि च संस्कारस्य कदाचित्तदंशे नोद्बोधस्तदा ऽस्तु वा पदादपि नि
र्विकल्पकं आकाशपदान्निष्प्रकारकमेव स्मरणं. शाब्दबोधश्च पदार्थान्तरमादाय सविकल्पक एव. आ
काशोऽद्रव्यमित्यत्राभिन्नविभक्त्युपनीतसंख्यामादाय भिन्नप्रकारकोपस्थितिसत्त्वादभेदान्वयो नानुपप
न्न इति द्रष्टव्यं. अन्ये तु. नियतानुपस्थितावपि विनिगमकाभावान्न तदशक्यं अक्षादिपदवन्नानार्थ
त्वेनाप्युपपत्तेः. एकत्र धर्मिण्यपि प्रवृत्तिनिमित्तद्वये बाधकाभावात्. वस्तुतस्तु शब्दाश्रयत्वमेव
शक्यतावच्छेदकं लाघवात्. घटत्ववद्रूपान्तरेण बोधस्तु शक्तिभ्रमात्. कं बुध्यावादिमत्त्वेनेव घटस्य.
अत एवानियतोपस्थितिरपि शक्तिभ्रमात्कं बुध्यावादिमत्त्वोपस्थितिवदुपपन्नेति नानार्थत्वमपीति. न२
केचित्तु. व्यक्तेरेवानुगतानतिप्रसक्ततया प्रयोजनाभावेन धर्मे न शक्तिकल्पनमित्याहुः. निर्वि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्यत्वस्यैव शाब्दविषयत्वे तंत्रत्वं ननु स्ववृत्त्युपस्थाप्यत्वस्येति लक्ष्यतावच्छेदकवत्त्वाद्बोधविषयत्वमपि अर्थैवगो
त्वमपि शक्यं न स्यात् यदि च विशेष्यस्यैव संस्कारगत्या शादिशेषणस्मरणे लक्ष्यतावच्छेदकधर्मनियतस्मृतेरनुप
पत्तिः रूपान्तरेण शक्तिग्रहे संस्कारविषयत्वाभावात् किंचान्यसम्बन्धेनाप्यन्यत्र संस्कारेण बोधपदात्प्रसु
प्त तत्त्वाकस्मरणानुपपत्तिः अनुभवविषयतत्ताया अपि नियमेन भानसंभवात् घटशक्तेरेव तद्देशोद्बु
द्बोधकत्वसंभवात् उद्बोधकानुरागानुसारेण च लक्ष्यतावच्छेदकवन्नियतस्मरणानापत्तेः तस्मात्पदान्वि
यतोपस्थितिः स्वसंबन्धसाध्यासच संबंधः परिशेषादृत्तिरेव पर्यवस्यतीति पदान्वियतोपस्थितिशक्ति
साध्येति नियमात्कोत्वं शक्यमिति विभाव्यते तदाशब्दाश्रयत्वेपि तुल्यमिति चेदास्तां तद्विशक्य
यदि नियमेन तदुपस्थितिः आकाशः शब्दाश्रय इत्यस्य चाकाशपदवाच्य इत्यर्थेनैवोपपन्नत्वा
त्पर्यायत्वेपि सहप्रयोगानुपपत्तिः वस्तुतस्तु कदाचिच्छब्दाश्रयत्वेन कदाचिदष्टद्रव्यातिरि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त.प्र.श

रुपस्थापितस्यैवत्वाद्बोधविषयत्वाच्छक्याश्रयत्वंनतुकथंभासेतेतिवाच्यं॰नियमतोयद्धर्म
विशिष्टत्वेनोपस्थितेयत्रशक्तिग्रहस्तत्स्मरणजनकसंस्कारस्यतद्धर्मविषयतानियमेसत्युद्बो
धकादेवतद्वत्रोपस्थितेर्वानियमेनाकाशपदादशाब्दस्यापितस्यभानात्तथाहि॰शक्तिग्रहे
एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकमितिरीत्यापदार्थस्मारिका॰येनरूपेणचोपस्थि
तयोःपदार्थयोःसंवन्धज्ञानंतद्रूपावच्छिन्नज्ञानात्संवन्धांशेउद्बुद्धसंस्कारसहकृतात्तद्रूपाव
च्छिन्नस्मरणंनचचसम्बन्धितावच्छेदकस्यापिजन्यताजनकतावच्छेदककोटिनिवेशआव
श्यकःअन्यथाहस्तिपकेचैत्रत्वेनोपस्थितेभद्रत्वेनचोपस्थितेहस्तिनिसंवन्धग्रहेमनुष्यत्वे
नहस्तिपकज्ञानाज्जत्वेनहस्तिस्मरणापत्ते॰तथाचयद्धर्मविशिष्टेशक्तिग्रहस्तद्धर्मावि
शिष्टमेवतत्स्मारयतीत्याकाशमात्रेशक्तावपिशब्दाश्रयत्वस्यस्मृतिसंभवःइत्युपस्था

३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कत्वात्. यद्यपि शक्यादन्येन रूपेण ज्ञाते भवति लक्षणेति न्यायात् समुदायस्य पद्मत्वे लक्षणा न यु
क्ता. तथापि कर्तृवाचकपद एव सा बोध्या. अत्रेदं चिन्त्यं. स्थले पंकजमित्यत्र पंकजनिकर्तृत्वस्य
पद्मे तात्पर्याभावग्रहे तदनन्वितपद्मत्वस्य साकांक्षत्वमेव. यद्वा प्रथममन्वयस्तत्रापि स्थलपद्मे
तात्पर्यग्रहानन्तरं पुनः स्मृतपंकजपदात्स्वसंबंधोपस्थितिर्लक्षणयैवोपेया. एवं च शक्त्यैव तदा त
दुपस्थितिरास्तां. अयोग्यत्वेनायोगार्थस्यानन्वयादिति. अपि च रूपेणाभिचरन्यजेतेत्यत्र वल
वदनिष्टानुबंधीष्टसाधनत्वरूपविध्यर्थैविशेषणांशमपहाय यथा विशेष्यान्वयः तथाऽ
योग्यतया विशेषणानन्वयेऽपि विशेष्यान्वयबोधे बाधकाभावः. योग्यार्थस्यैव विशेष्यत्वे
च पंकजं कुमुदमित्यत्र तस्य साकांक्षतया लक्षणानुपपत्तेरिति दिक्. इदं तु बोध्यं. आका
शपदे निरवच्छिन्नैव शक्तिः व्यक्तीनामानन्त्याभावेनानुगमकधर्मानपेक्षणात्. न च ह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पदमपि योगरूढमेव । ननु पद्मत्वमेव प्रयोगोपाधिरस्त्विति चेन्न । पद्मत्वज्ञानं न प्रतिबन्धकं अगृहीतनि
त·प्र·श· यतपद्मप्रयोगस्य कुमुदसाधारणबोधदर्शनात् । रूढिज्ञानमेव स्वाभाववत्त्वसंबन्धेन प्रतिबन्धकमि
ति । नन्वयोग्यतया पद्मत्वमपहाय केवलावयवशक्त्या कुमुदबोधोस्तु किं लक्षणया रूढेर्योगप्रति
बन्धकत्वमतेन तथा संभवेपि मणिकृन्मते रूढेरप्रतिबन्धकत्वादिति चेन्न । पद्मान्वितत्वेनोपस्थित
स्य पंकजनिकर्तृत्वस्याथयनिराकांक्षतया स्वतन्त्रोपस्थितये लक्षणाङ्गीकारात् । एवं पंकजप
दात्स्थलपद्मबोधो लक्षणयैव । स्थलपद्मं हि विजातीयमेवेति पद्माकृतिसदृशाकृतौ स्थलपद्मत्व
विशिष्टे वा पंकजपदस्य लक्षणा । यदि चानुगतप्रतीत्या तत्रापि पद्मत्वं जातिस्तथापि स्वतन्त्रोप
स्थितये लक्षणा अथायोग्यतया योगार्थानन्वयेपि योग्यतया रूढ्यर्थः पद्ममेव बउअनरतीति चे
न्न । योग्यार्थगतपद्मत्वेन पद्मस्यैवोपस्थित्या निराकांक्षत्वात् । स्वतन्त्रोपस्थितये तदावश्यप

कर्मारम्भादयेत्यादौ वाक्यमात्रे स्वलक्षणापत्ते प्रत्येकं तात्पर्ये योग्यतादिवन्नाविशिष्टबोधान्न लक्षणेति चेत् प्र
कृतेपि समानं तस्मात् दुष्टिज्ञानप्रति[illegible]बन्धकत्वकल्पनमेव लक्षणासम्भवः विरोधाविषयकत्वेपि सिद्धेरनुमिता
विव स्मृतिज्ञानप्रतिबन्धकत्वमिति स्मृतपदार्थान्वयानुपपत्त्यनन्तरं कुमुदधारिति लक्षणाव्यवहारो वस्तुतो मु
ख्यतयैवेति मणिकृन्मतेगतिरिति। ननु पंकजपदस्य पद्मे लक्षणा यौगिकार्थवाक्ये शक्यभावेपि न हृदके न
सम्भवात् न च शक्यलक्ष्यसाधारणैकरूपाभावेनाजहत्स्वार्थायास्तस्या अभावात् उक्तपदद्वित्तिद्वयविरो
धापत्तिरिति वाच्यं सति तात्पर्ये गंगायां घोषमत्स्यौ स्त इत्युक्तेव मणिकृन्मते तस्या दोषत्वादिति चेन्न श
क्ये बाधके सत्येव लक्षणेति मुख्ये बाधकाभावेन लक्षणोपनीतानपेक्षणे कुमुदसाधारणबोधापत्ते
तात्पर्यानुपपत्त्यायष्टीः प्रवेशयेत्यनेव लक्षणोपपादनेपि पद्मकुमुदयोस्तुल्यत्वापत्तेः लक्ष्यत्वा
विशेषात् तथा च पद्मान्वयानुपपत्तिप्रतिसंधानानन्तरं कुमुदधारिति सिद्धान्तव्याकोपः। एवं चेतु

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्षणीयत्वात्‌ अवयवापेक्षया समुन्निष्यादायस्याभिन्नत्वेनपद्मस्यापि भिन्नपदोपस्थाप्य
त्वात्‌· अथ कुमुदबोधकत्वभ्रमेणैवास्मां पंकजपदस्य कुमुदत्वेन शक्तिरिति प्रवादस्तु काचित्काभि
प्रायेण यत्र योगरूढिभ्यां पद्मानुभवस्तदनन्तरं कुमुदतात्पर्यज्ञानं तत्र स्यात्‌ अन्योपस्थित्यभावे
कुमुदे लक्षणैव स्यात्‌· परं विशेषो यः संप्रदायमते सर्वत्र लक्षणामपि छन्नते काचित्की
ति चेन्न· तत्रापि पंकजनिकर्तृत्वस्य कुमुदेनातपर्यग्रहकाले पुनः स्मृतपंकजपदेन शा
ब्देवकुमुदोपस्थापनसंभवात्‌· पद्मेतात्पर्याभावाभ[illegible]ये न कुमुदे तात्पर्यनिश्चयसत्त्वे
न च पद्मेऽन्वयासंभवात्‌· अन्यथा लक्षणानापत्तेरिति· पद्मत्वस्य कुमुदेभानापद
तदर्थानुसंधानपक्षे वाक्यार्थविषयाणुरूपोपस्थितिकत्वं लक्षणया पंकजनिकर्तृत्व
स्य पदार्थतया लघूपस्थितिकत्वमिति· तत्र· पंकजन्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

माशीमत्त्रादिन्यायेन प्रतिबन्धकत्वेमानाभावात् इत्थंच पद्मानुभवसामग्रीसत्वात् पद्म
स्यैव बोधो न तु कुमुदस्य सामग्र्यां सत्यां हि फलाभावेन प्रतिबन्धकत्वकल्पनादिति वदन्ति अ
त्रेदं चिंत्यते पंकजं कुमुदमानयेत्यादौ यत्र पंकजपदस्य पद्मे तात्पर्य्याभावः कुमुदे च तात्
पर्यग्रहः तत्र लक्षणां विनैव कुमुदबोधापत्तेः पद्मानुभवसामग्रीविरहात् पद्मे तात्प
र्याभावनिश्चयस्यैव तत्र बाधकत्वेन बाधकं विना व्याक्ति वचनानीं संनिहितविरोधपरत्वा
दिति न्यायस्य तत्रानवतारात् घटेनु जलमाहरेत्यत्र सछिद्रघटस्य प्रथमोपस्थितत्वाद
न्वयवारणाय बाधकं विनेत्यस्यावश्यकत्वात् तथाच गृहीतपद्मप्रयोगस्य पद्मान्वया
नुपपत्तिपुरःसरैव कुमुदधीरिति न स्यात् कुमुदं पंकजमित्यत्र कुमुदस्यैव प्रथमसं
निहितत्वसंभवाच्च कुमुदस्य भिन्नपदोपस्थाप्यत्वेपि प्रथमोपस्थितिमात्रस्यैवापे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भ्यत्वात्. पंकजपदाद्योगेन कुमुदस्यापि बोधप्रसङ्गाच्च. मन्मते कदाचित्कुमुदबोधस्तु ल
क्षणयैव. न तु रूढिस्वीकारेऽप्युद्भित्पदेन खनित्रमिव पंकजपदात्कुमुदमपि बोध्येत यो
गसत्वात्. अत्र प्राञ्चः. यत्र योगरूढिभ्यामेकार्थबोधस्तत्र केवलयौगिकार्थबोधे रूढेः प्र
तिबन्धकत्वान्न कुमुदबोध इति तन्मा शङ्कत. रूढ्याभिमतस्य तत्पद्ममेव कर्तृरू
पव्यक्तिवाचकडप्रत्ययेन पंकजनिकर्तृतयाऽनुभाव्यते बाधकं विना व्यक्तिवचनानां
सन्निहितविशेषपरत्वनियमात्. व्यक्तिवचनानां किंचिद्व्यक्तितात्पर्यकाले संसन्नि
हितः प्रथममुपस्थित इत्यर्थः. तथा च पद्मतात्पर्यसत्वेन पंकजनिकर्तृतया तदेव
योगेनापि प्रतीयते न तु कुमुदमिति रूढेर्न प्रतिबन्धकतया ग्राह्याभावानवगाहित्वात्. जन
कसानाविरोधित्वाच्च सिद्धेरनुमितिप्रतिबन्धकत्वस्यानायत्त्वास्वीकारेऽप्यत्र ज्ञानस्य

र्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दापत्तेः असंसर्गाग्रहापत्तेः काव्यादावनुभवसिद्धस्यापि संसर्गानुभवस्यापलापे लिङ्समभिव्याहारे
प्यपलापएव स्यादिति भावः नन्विष्टापत्तिरत आह तथा चेति ननु प्रथमं कार्यान्वितएव शक्त्यवधा
रणात् तत्सहकारिकार्यतावाचकपदस्य कारणाभावाद्विधिसमभिव्याहारस्थलेऽसंसर्गाग्रहए
वोपेयते कारणाभावे कार्याभावस्यावश्यकत्वात् विधिसमभिव्याहारस्थलेतु बाधकाभावेन
शाब्दानुभवएवोपेयते ~~कारणाभावेकार्य~~ अतएव शाब्दप्रामाण्यमपीष्यत आह किं चैवमिति
एवं कार्यतावाचकपदसमभिव्याहारस्थलेएव शाब्दानुभवस्वीकारे स्यादिति तादृशपदस
मभिव्याहाराभावादिति भावः ननु केषांचिदप्रामाण्येपि लिङ्समभिव्याहृततत्पदमात्रे
वशादप्रामाण्यं स्यादेवेति तेषामप्रामाण्येष्टापत्तिरित्यत आह तथा चेति पुराणादीनां
मप्रामाण्याङ्गीकारेचेत्यर्थः मिथौ वाचस्पतिमिश्रौ अद्धवस्तुरिति अद्वैतकस्यापिश्च

त्वापेक्षया गुरुतया शक्यतावच्छेदकत्वासंभवेन कार्यान्वितघटत्वावच्छेदेन शक्यभावेन तेन रूपेण तत्र शक्ति ×२

तिबाधके प्रथमप्रवृत्तत्वस्यैव बलवत्वेनं जत्वादित्यत आह· चरमकल्पनाया इति· लाघवेति·
पूर्वान्वितघटादौ शक्तेरवायेपि कार्यान्वितत्वविशिष्टघटत्वस्य घटकल्पनेवा घ: स्यादेव तद्धर्मा
वच्छिन्नाभाववति तद्धर्मावच्छिन्नप्रकारकज्ञानत्वमेवाह भ्रमत्वमिति भाव:· ननु कंबुग्रीवादिमत्वं
घटत्वापेक्षया गुर्विति गौरवज्ञानसत्वेपि कंबुग्रीवादिमानास्तीति प्रतीत्युदयात् यथा गुरुधर्म
स्य प्रतियोगितावच्छेदकत्वमुपेयते तथा गौरवेपि प्रथमप्रवृत्तत्वात् कार्यान्वितघटे शक्ति
स्यादेवेत्यत स्तस्यं तुं दुर्जनन्यायेनाह· किंचैवमिति· एवं कार्यान्वितघटादौ शक्तिकल्प
नेशक्तिज्ञानेन च शाब्दसामान्ये जननीये कार्यतावाचकपदजन्योपस्थिते: सहकारित्वे
चेत्यर्थ: अनुभवसिद्ध इत्यनेन दुरपह्नवत्वं सूचितं· नस्यादिति· लिङादिपदरूपकारणा
भावादिति भाव:· न चेति· पदार्थोपस्थितिवाधाभावमात्रादेव व्यवहारादिति भाव:· न

कार्यतावच्छेदकमस्त्वित्यर्थः. नत् अन्यलभ्यत्वं घटमात्र इति. घटविषयकशाब्दत्वं कार्यतावच्छे
दकमित्यर्थः. सा. कार्यान्विते शक्तिकल्पना. बाध्यतां. अप्रामाण्यग्रहविषयीक्रियतां. गौरवा
त्. घटमात्रशक्तिकल्पनापेक्षया गौरवात्. ननु सामान्यतः प्रथमप्रवृत्तकल्पनायाः बलव
त्वेन कथं तद्बाध इत्याह. अथैवमिति. ननु प्रथमप्रवृत्तत्वस्य बलवत्त्वप्रयोजकतया कथं न ब
लवत्त्वमत आह. नहीति. शास्त्रादिति. शतयोजनश्चन्द्र इति चन्द्रपरिमाणबोधकाज्ज्यो
तिःशास्त्रादित्यर्थः. तथा च चक्षुरादिनाज्ञानस्वल्पतायामप्रामाण्यज्ञानवदत्रापि घ
टपदादेः कार्यान्वितघटादौ शक्तिज्ञानेऽप्रामाण्यं कल्प्यत इति भावः. ननु चन्द्रादौ
शास्त्रजन्यमहत्परिमाणज्ञानेन बाधात् तत्र स्वल्पपरिमाणज्ञानेऽप्रामाण्यं कल्प्य
ते. प्रकृते च प्रथमं कार्यान्वितघटादिपदशक्तिकल्पने बाधकाभावान्न तद्बाधः. असं

नत्वेन कारणत्वग्रह इति भावः । नान्विति । ननु घटपदादेः कार्यान्वितघटविषयकशाब्दत्वं कार्यता
वच्छेदकमित्यर्थः । अन्यलभ्यत्वादिति । कार्यतावाचकपदजन्यबोधविषयत्वादित्यर्थः । घ
टविषयकशाब्दत्वावच्छिन्नं प्रति घटपदज्ञानत्वेन कार्यत्वविषयकशाब्दत्वावच्छिन्नं प्रति
लिङादिपदज्ञानत्वेन हेतुता । यत्र च लिङादिपदसमभिव्याहारस्तत्र तादृशसमभिव्याहा
रादेव कार्यत्वबोधः । यत्र तु नैतत्समभिव्याहारस्तत्र केवलघटादेर्बोध इत्यर्थवादस्यापि
प्रामाण्यमिति भावः । । नन्वन्यलभ्यत्वं न स्वरूपसत्प्रतिबन्धकं किंतु ज्ञातं यादृशवाक्यं
स्यार्थोऽन्यलभ्यं न स्यादिति तर्कस्यानेनोत्पादनात् । तथा च यत्र तन्नोपस्थितं तत्र का
र्यान्विते शक्तिग्रहे बाधकाभावस्त्वाशंकते प्रथममिति । प्रथमं लिङादिपदस्य कार्ये श
क्तिग्रहात्पूर्वं कार्यान्विते शक्तिग्रहोऽस्तु घटपदज्ञानस्य कार्यान्वितविषयकशाब्दत्वं

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तिजनिका तत्रेति · कार्यान्वितविषयकशाब्दत्वावच्छिन्नंप्रति घटपदज्ञानत्वेन हेतुत्वे इत्यर्थः
स्मारिकाचेति · जातिशक्तिज्ञानात्के वलं घटत्वजातिस्मृतिः शक्तिज्ञानस्योद्बोधकविधया पदा
र्थस्मृतिहेतुत्वादिति भावः · ननु कार्यान्वितबोधे घटादिपदज्ञानस्य हेतुतया तत्सत्वे कथं नानु
भवजनकत्वमत आह · कार्यत्वान्वयबोध इति · घटादिपदेन कार्यत्वान्वयस्य विषयकशाब्द
बोधे जननीये कार्यतावाचकलिङादिपदजन्योपस्थितेः सहकारित्वादित्यर्थः · · नार्थवाद
स्येति · विशेषसामग्रीसहकृताया एव सामान्यसामग्र्याः फलोपधानेतत्र तया कार्यत्वो
पस्थापकलिङादिपदाभावेन तज्जन्यकार्यत्वोपस्थितेः सहकारिणा अभावात् शाब्दा
नुभवजनकत्वरूपं प्रामाण्यं नार्थवादस्येत्यर्थः · लाघवात् · कार्यान्वितघटविषयकशा
ब्दत्वापेक्षया लाघवात् घटादिमात्र इति · घटविषयकशाब्दत्वावच्छिन्नं प्रत्येव घटपदज्ञा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न०प्र०टी०

पि कार्यता वाचकपदत्वात् कार्यतावाचकपदासभिव्याहारप्रयुक्तमप्रामाण्यं कथमर्थवादस्ये
त्यर्थः॰ अत्र यद्यपि पदानां कार्यान्वितेऽभिधारूपैव शक्तिः॰ घटादिपदात्कार्यान्वितघटत्वा
दिनैव पदार्थोपस्थितिः॰ घटादिपदेन कार्यान्वितविषयकशाब्दबोधजननीये इतराविशे
षणात्तया कार्यत्वोपस्थापकलिङादिपदस्य सहकारित्वाच्च न सिद्धार्थकार्थवादस्याप्रामा॰
ण्यप्रामाण्यमिति कार्यान्वितेऽभिधारूपशक्तिमादायार्थवादस्याप्रामाण्यमुपपादयितुं
शक्यते तथापि कार्यत्वोपस्थित्यर्थं हि घटादिपदानां कार्यान्विते शक्तिः॰ सा चावश्यापेक्ष
णीयलिङादिपदादेव जातेति व्यर्थं घटादिपदानां कार्यान्वितेऽभिधारूपशक्तिकल्पनेन॰
एवं कार्यान्वितत्वेन शाब्दबोधेऽनुभववाधश्चेत्यत अभिधारूपशक्तिमपेक्ष्यानुभाविकश
क्तिमादाय समाधत्ते॰ अग्रोच्यत इति॰ आनुभाविका शाब्दानुभवजनिका स्मारिका पदार्थस्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्ने घटो नास्तीत्यादौ· कार्यता वाचकेति· कार्यता वाचका लिङ्लोट्तव्यप्रत्यय : प्रश्नमत्नकारः·
कस्यश्चेति विधिप्रत्ययास्तत्समभिव्याहारे नास्तीत्यर्थः· विध्यसमभिव्याहृतं वैदिकवाक्यमर्थ
वादः मूकमेव· शाब्दबोधानुपधायकमेव· ननु तर्हि प्रवर्त्तकज्ञानाभावात्प्रवृत्त्याद्यनुपपत्तिरत
आह· व्यवहारस्त्विति· प्रवृत्तिस्त्वित्यर्थः·· असंसर्गेति· असंसर्गाग्रहाभावात् बाधाभावादिति
यावत्· तन्मते सर्वत्र प्रवृत्तिं प्रति विशिष्टज्ञानस्य हेतुत्वानभ्युपगमादिति भावः;· ननु शब्दसा
मान्यस्यैव कार्यान्विते शक्तत्वात् कार्यान्वितशक्तिज्ञानस्यैव शाब्दबोधहेतुतया विधेरिव श
ब्दसामान्यस्यैव कार्यतावाचकपदत्वात् कथं सिद्धार्थकार्यवादानाम प्रामाण्यमित्याशंक
ते· नन्विति· कार्यान्वितेति· कार्यताविशिष्टान्वितेत्यर्थः· तद्वाचकेति· कार्यतावाचकपदेत्य
र्थः· विधेरिव पदसामान्यस्यैव कार्यतावाचकपदत्वादिति भावः;· असंगतं चेति· सर्वस्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वं संभवति· कार्यताविशिष्टज्ञानस्य प्रयोजकत्वे च कार्यान्वितज्ञानस्यापि प्रवृत्तिप्रयोजक
त्वानपायात्· कार्यान्वित एव शक्तिः· न च कार्यतावाचकलिङादीनां कार्यान्वितशक्तत्वा
संभवादिति वाच्यं· सर्वपदानां कार्यान्वयशालिगोचरज्ञानजनकत्वात्· तच्च कार्यान्वितस्वा
र्थप्रतिपादकतया तदन्वितकार्यरूपस्वार्थप्रतिपादकतया वेति· तथा च कार्यान्वयशा
लित्वं कार्ये तद्भिन्ने चाविशिष्टमिति सर्वत्र कार्यान्वित एव शक्तिरित्याशयः इत्यर्थः· आ
वापोद्वापाभ्यां· संग्रहत्यागाभ्यां प्रथमेति· शब्दसामान्ये कार्यान्वितशक्तिकल्पनानु
रोधादित्यर्थः· ननु लाघवात् तथास्त्वित्यत आह· आद्येति· शब्दसामान्ये कार्यान्वितं क शक्ति
ल्पनाया विरोधापत्तेरित्यर्थः· शब्दसामान्यस्य कार्यान्वित एव शक्तत्वे चेत्यर्थः· यत्र भू
शब्दसामान्यस्य कार्यान्वित एव शक्तत्वे च विधेरेव प्रामाण्यं न त्वर्थवादस्येति दर्शयति इत्थं चेति· ×

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कारणजिज्ञासायां शब्दमेव. घटमानयेतिशब्दमेव. तथा. कार्यत्वविशिष्टज्ञानहेतुत्वेन.
तन्निर्वाहिकां. शब्दे कार्यत्वविशिष्टविषयकज्ञानोपधायकत्वनिर्वाहिकां. कार्यान्विते
शक्तिं. यद्यपि घटानयनगोचरप्रवृत्तौ घटानयनगोचरकार्यताविशिष्टज्ञानत्वेन हेतुत्वं
नतु कार्यान्वितज्ञानत्वेनेति कार्यान्वितेशक्तौ बीजाभावस्तथापि न केवलं कार्यमिति ज्ञा
नात्प्रवृत्तिः किंतु घटानयनं कार्यमिति ज्ञानात् तच्च कार्यताविशिष्टज्ञानं कार्यान्वितज्ञा
नमेवेति तत्र शक्तिः. एवमनाकलितपदविभागस्य घटमानयेति वाक्यस्य कार्यतावि
शिष्टज्ञानजनकत्वं कार्यान्वितशक्त्यैव निर्वहति. अन्यथैकपदस्यैव कार्यताविशिष्ट
शक्तौ इतरपदस्य वैयर्थ्यात्. कार्यान्विते शक्तौ सर्वेषामपि कार्यताविशिष्टज्ञानजनक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तावच्छेदककोटिनिवेशो न तत एव तीरभानोपपत्तेस्तत्र लक्षणास्वीकारो व्यर्थः · इतिनोहिनं
स्वरूपसत्युपयुज्यते किंतु ज्ञाते वेति व्याचक्षुः तत्सन्दर्भविरोधादुपेक्षणीयं · प्राभाकरास्त्व
ति · कार्यान्विते इति · कृतिसाध्यान्वयनाद्यन्वितं इत्यर्थः · तत्प्रयोजकतया · प्रवृत्तिप्रयोजकतया ·
कार्यताविशिष्टज्ञानमिति · कार्यता कृतिसाध्यता तद्विशिष्टविषयकं ज्ञानमित्यर्थः · अनु
स्थे मिनोतिं प्रयोज्यवृत्तिशेषः ; अयं घटानयनगोचरकार्यताविशिष्टज्ञानवान् घटानयनगोच
रप्रवृत्तिमत्वात् स्तनपानगोचरप्रवृत्तिविशिष्टमद्भूत् इत्यनुमानाकारो बोध्यः · अप्रयो
जकत्वमाशंक्याह · स्वप्रवृत्ताविति · स्वप्रवृत्तौ स्वीयस्तनपानगोचरप्रवृत्तौ · तेन बाले
न · कार्यताविशिष्टज्ञानस्य · कृतिसाध्यत्वविशिष्टज्ञानस्य · हेतुत्वावधारणादिति · तथा
च कार्यकारणभाव एवानुकूलस्तर्क इति भावः · तद्धेत्वाकांक्षायां कार्यताविशिष्टज्ञान

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ग्रहात्. वात्वेन घटपदादेरानुभाविकशक्तिग्रहात्. शक्तिरेव. आनुभाविकशक्तिरेव. अ
न्वितविषयकशाब्दत्वं घटपदशक्तिज्ञानकार्यतावच्छेदकमित्यर्थः. अन्यलभ्यत्वात्. अ
न्वितशाब्दत्वस्यानुपूर्वीज्ञानकार्यतावच्छेदकतया तत्कोटिप्रविष्टत्वादित्यर्थः. अनन्यलभ्य
स्य च. आनुपूर्वीज्ञानादिरूपप्रकारान्तरेणलभ्यस्य शब्दार्थत्वात्. घटपदशक्तिज्ञानकार्य
तावच्छेदककोटिप्रविष्टत्वादित्यर्थः. तथा चान्वयविशेषशाब्दत्वस्यानुपूर्वीज्ञानकार्य
तावच्छेदकत्वावश्यकत्वे अन्वयविषयकशाब्दत्वस्य घटपदशक्तिज्ञानकार्यतावच्छेद
कत्वे मानाभाव इति भावः. ननु शक्तिज्ञानकार्यतावच्छेदककोटिप्रविष्टस्यैव शाब्दवि
षयत्वमिति नियमान्यथेत्यत आह. अन्यथेति. तादृशनियमम् अभ्युपेत्य तथा कल्पने
लक्षणेति. तादृशनियमाभ्युपगमे तीरविषयताया अपि गंगापदशक्तिज्ञानकार्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पपत्तेरित्यन्यलभ्यत्वाज्ञन्ने न शक्तिः शक्यस्यैव शाब्दविषयत्वनियमो तु तीरेपि गंगापदशक्यत्वप्रस
ङ्गेन लक्षणोच्छेदापत्तेरित्यर्थः इदमुपलक्षणं अन्विते शक्तिस्वीकारे ऽन्वितत्वेन पदार्थोपस्थितिः
प्र६ अन्वयसंस्कारक शाब्दबोधश्च स्यात् न त्वेतदनुभवसिद्धं ननु अन्विते शक्तिः स्वरूपसत्युपयुज्य
ते न तु ज्ञाता जातौ तु ज्ञातैवोपयुज्यते इति तन्मतनिष्कर्ष इति चेन्न यद्विषयकत्वेनैव ज्ञाता शक्ति
रनुभवहेतुस्तत्रैव च शक्तिरित्यन्वये शक्तिस्वीकार एवेत्यर्थात् शक्यस्यैव शाब्दविषयत्वमि
ति नियमस्य लक्ष्ये व्यभिचारादिति रहस्यमनुसंधेयम् केचित्तु भट्टमते ज्ञातावेवाभिधा
रूपा शक्तिः अन्वितविषयकशाब्दत्वावच्छिन्नं प्रति घटपदशक्तिज्ञानत्वेन कारणतेति घ 5
टपदादावन्विते आनुभाविका शक्तिः नैयायिकमते आनुपूर्वीज्ञानस्यैवान्वितशा
ब्दत्वं कार्यतावच्छेदकं भट्टमते घटपदशक्तिज्ञानस्येति मतभेदः अन्वयविशिष्टे शक्तिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शक्तेर्लाभः। अन्वयस्य चाक्षेपेणाऽनाभासंभवाद् शब्दबोधने चातिप्रसङ्गादन्वयेऽपि शक्तिः। इत्थं च ज्ञा
तो अन्वये चाभिधारूपा शक्तिरिति भट्टमतं दर्शयति। भट्टास्त्विति। अन्वयविशिष्टे शक्तिग्रहात्। अ
भिधारूपशक्तिग्रहात्। अन्वयेपि। वाक्यार्थरूपेऽन्वयेपि शक्तिरेव अभिधारूपा शक्तिरेव। अन्व
यस्येति। गौः अश्व इत्यत्र वाक्यार्थरूपान्वयस्येत्यर्थः। अन्यलभ्यत्वात्। अन्वयविषयकशाब्द
बोधे तत्तदानुपूर्वीज्ञानत्वेन हेतुतया तत्तद्देवान्वयभानोपपत्तेरित्यर्थः। अन्वयविशेषभाना
र्थं तत्तदानुपूर्वीज्ञानहेतुतायास्तत्र व्याप्यावश्यकत्वादिति भावः। नन्वन्यलभ्यत्वेपि शक्तौ बाध
काभाव इत्यत आह। अनन्येति। शब्दार्थत्वात्। शब्दशक्यत्वादित्यर्थः। ननु शक्यस्यैव शब्दवि
षयत्वमिति नियमादन्यलभ्यत्वेपि तत्र शक्तिरावश्यकीत्यत आह। अन्यथेति। अन्यथा श
क्यस्यैव शब्दविषयत्वमिति नियमाभ्युपगमे शक्तिकल्पने। लक्षणेति। लक्षणया नीरबोधो

हेतुत्वेनानतिप्रसङ्गादित्यर्थः । गोत्वेऽपि च शक्तिस्वीकारे च गोत्वत्वधर्मितावच्छेदकक शक्तिग्रहस्य ×२

द्बोधं प्रति गोत्वधर्मितावच्छेदकक शक्तिग्रहस्यैव हेतुतया गौरवाज्जातावेव शक्तिरिति ध्येयम् । ननु जाति
विशिष्टे शक्तिस्वीकारेण शाब्दे व्यक्तिभानोपपत्तावपि वाक्यार्थरूपान्वयस्यापि शाब्दविषयतया त
त्रापि शक्तिः स्यात् । न चेष्टापत्तिः । जात्याकृतिव्यक्तयः पदार्थ इति अक्षपादीयसूत्रविरोधात् इ
ति संप्रदायमतेऽशंकते । स्यादेतदिति । नन्वभेदोऽपि शाक्य एवेत्यत आह । तस्येति । जातिविशिष्ट ए
व शक्तिस्वीकारादिति भावः । ननु योग्यतादिबलात् सोऽपि भासतेऽत्याह । न चेति । अतिप्रसङ्गात्
घटादेरपि बोधप्रसंगात् । गोशक्तेहीति । इतरपदसमभिव्याहृतगोपदमित्यर्थः । गवान्वये नि
न च गोऽन्यकरस्तत्राभेदः । गामानयेत्यत्रान्यविधः संसर्गो भासते इत्यत्र किं विनिगमकमिति नियामक
वाच्यम् । अभेदान्वयबोधे समानविभक्तिकत्वन्तत्पदसमभिव्याहाररूपानुपूर्वीज्ञानस्य । अ
न्यत्र च तदानुपूर्वीज्ञानस्य हेतुत्वादिति भावः । पदानां जानावधर्मिधारूपा शक्तिरुक्षे पेरणाच

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयत्वेऽस्या विशेषादिति भावः । प्रत्यायकइति । गोत्वप्रकारकगोविशेष्यकशक्तिमत्त्वेन हेतु
तया न घटादिबोधापत्तिः । पूर्वं तु तत्र व्यक्तित्वेनापि गोर्निवेशः । इह तु गोत्वेनैवेति विशेष इति द्रष्ट
व्यं । ननु एकस्य प्रवाहसम्बन्धस्य तीरत्वतीरयोरभावाच्छक्यसम्बन्धरूपाया एकस्याः लक्षणा
याः लक्ष्यतावच्छेदकलक्ष्ययोरसंभवितया लक्ष्यतावच्छेदकविशिष्टे लक्षणा अनंगीकारेण गंगा
यां घोषइत्यादौ स्ववृत्त्युपस्थापितस्यापि तीरत्वस्य शाब्दबोधे भानवत् शक्यतावच्छेदकस्याभा
वे पिता दृष्टा कार्यकारणभावबलादेव गोत्वभानानिर्वाहेऽनंतत्र शक्तिकल्पनेनेति संप्रदायमते
ऽस्वरसं प्रकाशयन्नव्यमतमाह । जात्येवेति । गौरवात् केवलं न शक्तिस्वीकारेणोपपत्तौ जाति व्यक्ति
विशिष्टव्यक्तौ शक्तिकल्पने गौरवादित्यर्थः । नचैवमिति । एवं गोत्वे शक्यस्वीकारे घटादेरपि
बोधापत्त्याऽशक्यस्य शाब्दाविषयतया गोत्वबोधानापत्तिरित्यर्थः । गोत्वेति । गोत्वविशिष्टशा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथा च वैशिष्ट्येपि शक्तिः· एवमवयवसंयोगविशेषरूपाकृतौ तद्वैशिष्ट्ये च शक्तिः गोपदाज्जात्याकृ गोपद
तिविशिष्टस्यैव प्रतीतेः· तदुक्तं· जात्याकृतिव्यक्तयः पदार्थ इति· एकशक्तिसूचनाय पदार्थ इत्ये
कवचनम्· ननु तत्प्रकारं तद्विशेष्यकशाब्दबोधं प्रति तत्प्रकारकतद्विशेष्यकशक्तिज्ञानत्वेन
हेतुत्वमित्या[illegible]तं तत्प्रकारीस्थगविशक्यग्रहाद्बोधानापत्तिरूपबाधकग्रस्तमित्याशंकते·
न चेति उक्तदोषः शक्तिग्रहाविषयीभूतव्यक्तिबोधानापत्तिरूपदोषः समाधत्ते। गोत्वेति·
तथा च सर्वत्रापि शक्तिग्रहाच्छक्तिग्रहाविषयव्यक्तेरलौकिकतया न तद्बोधानुपपत्तिरिति भावः
सामान्यलक्षणानङ्गीकारेप्याह· अस्तु वेति· एकदेव लौकिकसाक्षात्कारविषय एव· अ
न्यगवीति· शक्तिग्रहाविषयगवीत्यर्थः· ननु योग्यतावलाच्छक्तिग्रहाविषयव्यक्तेरपि भाने
बाधकाभाव इत्यत आह· अन्येति· अतिप्रसङ्गात्· गोपदात् घटादेरपि बोधापत्तेः· शक्तिग्रह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कारे गोत्वप्रकारकशक्तिज्ञानत्वेन हेतुत्वासंभवः । व्यक्तौ शक्त्यभावेन शक्तिज्ञानस्य भ्रमत्वापत्तेरितिवा
च्यं । शक्तेर्न स्वरूपसती शाब्दहेतुः अपभ्रंशादपि शाब्दबोधोदयात् किंतु ज्ञाता । तथा च यदंशे शक्तिज्ञा
नं हेतुस्तदेव शाब्दमिति जातिवद्व्यक्तिवैशिष्ट्यं च शाब्दमेव । अन्यथा व्यक्तावेव शक्तिः । व्यक्तिश
क्तिज्ञाने च जातेरपि प्रकारत्वात् समानप्रकारकत्वेनैव कार्यकारणभाव इति जातावपि शक्तिरु
वा च्येत । न च यद्विषयत्वेन शक्तिज्ञानं हेतुस्तद्विषयं शाब्दमिति नियमाज्जातावपि शक्तिरि
ति वाच्यं । तर्हि यद्विषयकत्वेन शक्तिज्ञानस्य हेतुता तद्विषयं शाब्दमिति नियमेन व्यक्तिविषयकत्वेन श
क्तिज्ञानस्य हेतुत्वाद्व्यक्तिशक्तिस्वीकारस्यौचित्यादिति दिक् । नैयायिकमतं दर्शयति । त
स्मादिति । गोत्वविशिष्ट इति । जातौ व्यक्तौ वैशिष्ट्ये च शक्तिरित्यर्थः । तृतीयोपस्थाप्यकरण
कत्वयोरिव जातौ व्यक्तौ च विशकलिततया शक्तौ गोत्वं व्यक्तिश्चेति बोधप्रसङ्गान्न तु गौरिति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गोत्वविषयकगोपदशक्तिमती गौरित्याकारकं शक्तिज्ञानं हेतुः ननु गोत्वविशिष्टविषयकगोपदशक्ति
मती गौरित्याकारकं गोत्वमस्तीत्यादौ नमाद्श गोत्वप्रकारकशक्तिज्ञानाभावान्न गोत्वविशिष्टबोधा
पत्तिरित्याहुः तदसत् गोत्वविषयकगोपदशक्तिमती गौरित्याकारकस्य गोत्वविषयकत्वेन श
क्तिज्ञानस्य हेतुत्वे गोत्वविषयकत्वस्य कारणतावच्छेदककोटौ निवेशे गौरवात् अथ मास्तु गोत्व
विषयकत्वनिवेशः तथापि गोपदशक्तिमती गौरिति गोत्वप्रकारकशक्तिज्ञानत्वेनैव गोत्ववि
शिष्टशाब्दबोधं प्रति हेतुता न चैवमविवाद इति वाच्यं व्यक्तिविषयतायाः कारणतावच्छेदककोटौ
निवेश इत्येव तन्मतनिष्कर्षात् दैशेन न रूपगोबोधानुपपत्त्या समानविशेष्यकत्वेन कार्यकार
णभावासंभवेन लाघवेन च समानप्रकारकत्वेन कार्यकारणभावोपगमौचित्यादिति चेन्न व्यक्ति
विषयतायाः कारणतावच्छेदककोटावविनिवेशे व्यक्तौ शक्तिस्वीकारवैयर्थ्यात् न च तदस्वी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्यतैर्हेतुत्वोपगमेनतत्सिद्धत्वभंगाच्चेति. एवमुपाधिप्रवृत्तिनिमित्तस्थलेतैरप्युपाधिविशिष्टेशक्तिः
स्वीकारात्. यथापङ्कजपदस्यलोमवदाङ्कूलविशिष्टेशक्तिस्तथाजातिविशिष्टेपि. अनुभवस्यतुल्यत्वा
त्. नचजातेर्व्यक्तिविशेषणत्वनियमाद्व्यक्तेर्लाभउपाधौतुतादृशनियमाभावाद्व्यक्तिबोधार्थमु
पाधिविशिष्टेशक्तिरितिवाच्यं. नहिनियमबलादेवव्यक्तेर्भानंकारणनियम्यत्वात्कार्यस्य. तथा
चजातिविशिष्टबोधेजातिशक्तिज्ञानस्यकारणत्ववदुपाधिविशिष्टबोधेउपाधिशक्तिज्ञानस्या
पिकारणत्वस्यक्लृप्तत्वादितिदिक्. कुत्रशक्तिवादिनस्तुजातौव्यक्तौचशक्तिः. परंतुजातिवि
षयकत्वेनैवज्ञाताशक्तिर्व्यक्तिविषयकशाब्दबोधेकारणं. व्यक्तिशक्तिस्तुस्वरूपसत्युपयु
ज्यते. नचैवंव्यक्तिशक्तिस्वीकारेवैयर्थ्यमितिवाच्यं. तत्पदशक्यस्यापिभानेघटादेरपिभानप्र
सक्तेर्नव्यक्तिशक्तिस्वीकारस्यावश्यकत्वात्. तथाचगोत्वप्रकारकगोविशेष्यकशाब्दबोधंप्रति

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चगोत्वत्वस्यशक्यतावच्छेदकत्वावच्छेदकतयातदपेक्षयागोत्वजातेरेवतथात्वमुचितमित्यपिलाघवमवसे
यं॰ अथगोत्वेनिरवच्छिन्नैवशक्तिः गोपदंगौरित्याकारकंशक्तिसम्बन्धेनस्वरूपतोगोत्वप्रकारकगो
पदत्वावच्छिन्नविशेष्यकशक्तिज्ञानंगोत्वविशिष्टशाब्दबोधेहेतुरितिनबाधकालेशाब्दबोधापत्तिः
गोत्वपदंगोत्ववदितिगोत्वत्वेनरूपेणगोत्वप्रकारकशक्तिज्ञानंचगोत्वशाब्दबोधेहेतुरितिनगो
त्वमस्तीत्यतोगोत्वविशिष्टबोधापत्तिरितिचेन्नतथापिगोपदात्कदाचित्समवायेनगोत्ववि
शिष्टबोधः कदाचित्कालिकादिसंबन्धेनतद्विशिष्टबोधइतिनियमानुपपत्तिः॰ गोत्वविषयकश क
क्तिज्ञानस्याविशिष्टत्वात्॰ अस्मन्मतेतुसमवायेनगोत्वविशिष्टशाब्दबोधंप्रतिसमवायेनगोत्ववि
शिष्टशक्तिज्ञानस्यहेतुत्वेनानुपपत्त्यभावात्॰ नचतात्पर्यज्ञाननियमात्तथानियमः॰ तथासति
ज्ञातावपिशक्तिस्वीकारेप्रयोजनविरहात्॰ एवंगोत्वंगोपदशक्यमित्याकारकस्यैवशक्तिज्ञान

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

धकाभावादित्यत आह · अन्यथेति · अथवा · ननु तत्पदाशक्यबोधनेऽतिप्रसङ्गाऽजातिविशिष्टशक्तेरेव व्यक्तिबो
धिकेत्येवास्त्वामित्यत आह · अन्यथेति · व्यक्तिशक्तिज्ञानस्य कारणत्वे देशान्तरस्थगोबोधानुपपत्त्या जाति
शक्तिज्ञानत्वेनैव हेतुत्वकल्पनादिति ध्येयं · तथा सतीति · जातावेव शक्तिस्वीकारे तेन गोत्वविशिष्टविष
यकशाब्दं प्रति गोत्वविषयकशक्तिज्ञानत्वेन हेतुत्वस्वीकारे इत्यर्थः · गोत्वमस्तीति · गोत्वपदस्या
पि गोत्वशक्तत्वेन गोपदगोत्वपदयोरविशेषाद्गोत्वविशिष्टशाब्दबोधापत्तेरित्यर्थः · नच गो
त्वं गोपदशक्यमिति निर्धर्मितावच्छेदककगोपदशक्तिज्ञानं गोत्वविशिष्टशाब्दबोधे हेतुः गोत्वत्वध
र्मिताधर्मितावच्छेदककगोत्वपदशक्तिज्ञानं गोत्वत्वरूपेण गोत्वशाब्दबोधे हेतुरिति नातिप्रसङ्ग इति
वाच्यं · गोत्वं न गोपदशक्यमिति बाधकालेऽपि निर्धर्मितावच्छेदककशक्तिज्ञानसंभवेन गोत्वविशि
विशिष्टशाब्दबोधापत्तेरिति गोत्वत्वधर्मितावच्छेदककशक्तिज्ञानहेतुताया आवश्यकत्वात् · एवं

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त. पु. श सामान्यातिरिक्ता व्यक्तिभासकसामान्यवरूपमुपेया नच शाब्दस्थलेतथा नियमः तथा च जाति
भासकसामग्र्या व्यक्तिबोधोपधायकत्वेन ततो घटादेरपि कुतो न बोधः नच व्यक्तिबोधे समान
वित्तिवेद्यत्वमेव नियामकमिति वाच्यं नहि व्यक्तिबोधे समानवित्तिवेद्यत्वेन कारणता त
था च व्यक्तिविषयतायाः कारणनियम्यत्वावच्छेदकत्वे व्यक्तिशक्तिज्ञानमेव कारणं स्यादित्य
स्वरसादाह यद्वेति जातिशक्तेरेवेत्येवकारेण व्यक्तिशक्तिव्यवच्छेदः तथा च व्यक्तिविषयता
या जातिशक्तिज्ञानकार्यतावच्छेदककोटौ निवेशनान्नतस्याः कारणनियम्यत्वमिति भावः
गोत्वशक्तिज्ञानस्य घटबोधं प्रत्येव हेतुत्वमाशङ्कामित्यत आह अन्यथेति गो[redacted]दाज्ञोरेव बो
धो न तु घटादेरतो गोशाब्दं प्रत्येव हेतुत्वकल्पनादित्यर्थः यद्वा ननु व्यक्तेरेव जातिविशि शक्ति
ष्टबोधिकेत्येव किं न स्यात् भवन्मते तत्पदशक्यव्यक्तेरिव मन्मतेऽपि जातेर्भानेवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न्मते प्रमाणाभावेनैतियावत्. तथैव. गोत्वविशिष्टप्रत्येव. कल्पनात्. गोत्वशक्तिज्ञानस्य हेतुत्व
कल्पनादित्यर्थ इति. वस्तुतस्तु जातिभासकसामग्र्या एव व्यक्तिभासकत्वादिति. अग्रे च जा
तिशक्तिरेव व्यक्तिबोधिकेति ग्रंथपर्यालोचनया कुब्जशक्तिवादमादाय. यद्वा पूर्वग्रन्थस्य गम
ने गोत्वपदस्य व्यक्तौ शक्त्यभावेन तथा सति स्याग्रिमदूषणदानस्य. यद्वा पूर्वकल्पेऽसंभवित
यानैवं व्याख्येयं. न च यद्वेति निष्कृष्टमत एव तया सतीति दूषणदानमिति वाच्यं. सर्वं भा
अडुडेरपरिहारात्. किं त्वन्यथैव तथाहि. जातिभानेति. जातित्वावच्छिन्नमेव जातिशक्तिज्ञान
कार्यतावच्छेदकं जातिभाने च जायमाने प्रत्ययविषयकस्य तस्याभावाद्व्यक्तिरपि भासते य
द्येन विना न भासते तद्बोधकस्य तद्बोधकत्वनियमात्. जातिभासकसामग्र्या एव व्यक्तिबो
धोपधायकत्वादित्यर्थः. ननु जातिविषयतां विनापि व्यक्तिप्रत्यक्षोदयाऽज्जातिभासक

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यानव्यक्तिबोधनेकापिक्षतिरितिभावः उत्तरयति गोत्वशक्तमिति गोत्वप्रकारकगोविशेष्य
कशाब्दबोधंप्रतिगोत्वशक्तिज्ञानत्वेनकारणतयानघटादिबोधापत्तिरित्यर्थः नन्वु गोत्वप्रका
रकगोविशेष्यकशाब्दबोधंप्रतीवशक्तिज्ञानस्यकारणत्वमुपेयतेतिर्घटत्वप्रकारकघटवि
शेष्यकशाब्दबोधंप्रतितुनेत्यत्राविनिगमकाभावः अशक्यत्वाविशेषादित्यत आह अन्यथानु
पपत्त्येति गोपदाद्गोत्वविशिष्टस्यैवबोधः नतुघटत्वादिविशिष्टस्येतिफलानुपपत्त्येत्यर्थः
तथैवगोत्वविशिष्टशाब्दबोधंप्रत्येवकल्पनात् गोत्वशक्तिज्ञानस्यहेतुत्वकल्पनात् एव
कारेणघटादिशाब्दबोधंप्रतितुनतथाहेतुत्वकल्पनेफलाभावादितिसूचितं अथवापूर्वो
क्तकुब्जशक्तिवादिमते स्वरसंप्रकाशयति अन्यथेति अन्यथाकुब्जशक्तेस्वीकृत्यव्यक्ति
बोध[illegible]पादने अनुपपत्त्या उपपत्त्यभावेनेति व्यक्तौकुब्जशक्तिस्वीकारेप्रयोजनविरहेणत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ननु कुब्जशक्तिवादिमते व्यक्तिशक्तिज्ञानस्याहेतुतया तत्स्वीकारे प्रयोजनाभावः । न च तथा सति जाति
विषयकशाब्दत्वमेव जातिशक्तिज्ञानकार्यतावच्छेदकं योग्यताबलाच्च व्यक्तिरपि भासत इत्येवोपे
यम् तथा च घटादेरपि भानापत्तिः अशक्यत्वाविशेषात् मन्मते च तत्पदशक्यविषयकशाब्दत्व
स्यैव कार्यतावच्छेदकत्वेऽनुपपत्त्यभावादिति वाच्यं जातिप्रकारकव्यक्तिविशेष्यकशाब्दबोधं
प्रति जातिविषयकशक्तिज्ञानत्वेन कारणत्वेऽक्षतिविरहादित्यस्तं कुब्जशक्तिवादिमते नेत्य
त आह यद्वेति तथा चेष्टापत्तिरिति भावः कुब्जशक्तिवाद्येकदेशिमतेनेति नैतत्स्वीकारे
तेषां सिद्धान्तविरोध इति भावः जातिशक्तिरेवेत्येवकारेण व्यक्तौ कुब्जशक्तेः स्वरूपसदु
पयोगित्वव्यवच्छेदः अन्यथा शक्त्या जातिशक्त्या अन्यबोधने तत्पदशक्यबोधने अतिप्र
सङ्गः घटादिबोधप्रसङ्गः तत्पदाशक्यत्वाविशेषात् मन्मते च व्यक्तेरपि तत्पदशक्यत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जातिशक्तिज्ञानस्य हेतुतया तद्भानाज्जातिशाब्दबोधे जायमाने व्यक्तिरपि भासते· तत्पदशक्यविषयकशाब्दबोधे ×२

न·प्र·श धर्मेधर्मीत्याशंकते· इदमेवेति· समानविभक्तिविशेष्यत्वमेवेत्यर्थः· जातिभासेति· जातिविषयकशाब्दबोधे तत्पदनिरूपितजातिशक्तिज्ञानस्य हेतुत्वादित्यर्थः· इदंतु गुरुमते कुञ्जशक्तिस्वीकारे बोध्यं· तथाहि· तन्मते जातौ व्यक्तौ च शक्तिः परंतु जातिविषयकशक्तिज्ञानमेव जातिविशिष्टव्यक्तिविषयकशाब्दबोधे कारणं· व्यक्तिशक्तिस्तु स्वरूपसदुपयुज्यते· न च जातिविशिष्टव्यक्तिशाब्दबोधे व्यक्तिशक्तिज्ञानमेव कारणं जातिशक्तिस्तु स्वरूपसदुपयुज्यते इत्येव किं न स्यादिति वाच्यं· तथा सति देशान्तरस्थगोविशेष्यकशक्ति शाब्दबोधे व्यक्तिशक्तिज्ञानमेव कारणं जातिशक्तिस्तु स्वरूपसदुपयुज्यत इत्येव किं न स्यादिति वाच्यं तथा सति देशान्तरस्थगोविशेष्यकशक्तिज्ञानाभावेन तद्बोधानापत्तेः· एवं च घटादिबोधापत्तिरपि न तत्पदशक्यविषयकशाब्दबोधं प्रति तत्पदनिरूपितजातिशक्तिज्ञानत्वेन कारणत्वादिति कुञ्जशक्तिवादनिष्कर्षः·

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गपदशक्तिद्वयविरोधेमानाभावादितितन्न· शक्यादन्येनरूपेण ज्ञातेभवतिलक्षणा· यथागंगा
योघोषइत्यत्रनीरत्वेनज्ञाते· नह्यत्रव्यक्तिः गोत्वादव्यतिरिक्तेनरूपेणज्ञाताव्यक्तित्वेनसास्ना
दिमत्वेनज्ञातेचतेनैवशाब्दबोधापत्तिः· लक्ष्यतावच्छेदकरूपेणैवलक्ष्यस्यभाननियमात्·
किंच· जातिमात्रेशक्तिः व्यक्तौलक्षणेतितदास्याद्यदिजातिमात्रेमुख्यःप्रयोगः नचैवंकिं
च गामानयगौरस्तीत्यादौमुख्यार्थान्वयानुपपत्त्यभावेनलक्षणायांमानाभावात् व्यक्ति
बोधानुपपत्तिश्चेतिध्येयम्· तस्मादिति· अन्यविधाक्षेपस्यदुर्वचत्वादित्यर्थः· समानेति·
एकज्ञानविषयत्वमेवेत्यर्थः· इदमेवविशदयति· यावतीहीति· व्यक्तिप्रत्यक्षंविनाजातिप्र
त्यक्षाभावेनतत्रैवतन्नियमावधारणादित्यर्थः· ननुप्रत्यक्षस्थलेसंयुक्तसमवायादि
रूपजातिप्रत्यक्षसामग्रीसत्वेसंयोगादिरूपव्यक्तिभासकस्यसत्वादस्तुतथाशाब्देतुके

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न.प्र.स. वधारणात्. नचप्रकृतिपदतात्पर्यविषयएवतदन्वयइतिनियमइतिवाच्यं. लक्षणोच्छेदापत्तेः गो
इवाश्व. नचपचतीत्यत्र यथा आक्षेपलभ्येनैवकर्त्रासंख्यान्वयः तथा आक्षेपलभ्यव्यक्त्यापि
तदन्वयःस्यात् आहत्य नियमस्य चतत्रैवाव्याप्तिसंकोचादितिवाच्यम्. तत्रापिचैत्रइतिपदमध्याहृ
त्यैवान्वयबोधस्वीकारात्. तदिदमुक्तम्. अयमेवहिआक्षेपोयत्प्रथमान्तपदोपस्थाप्यत्वंनामे
ति असंकोचेनोपपत्तौ व्युत्पत्तिसंकोचे मानाभावाच्च. नह्येकत्रसंकोच इत्यन्यत्रापिसः व्यु
त्पत्तिमात्रोच्छेदापत्तेरिति. वस्तुगोपदस्यगोत्वेशक्तिः व्यक्तौलक्षणेतिमण्डनमिश्राः तदुक्तं
जातावस्तित्वनास्तित्वेनहि कश्चिद्विवक्षति. नित्यत्वाल्लक्षणीयायाव्यक्तेस्तेहिविशेष
ण इति. अस्तित्वेनास्तित्वेउत्पत्तिविनाशौ गोरुत्पन्नः गोर्नष्ट इत्यादौ गोत्वस्यनित्यत्वेनो
त्पादविनाशयोरसंभवाद्व्यक्तौलक्षणा तात्पर्यज्ञानसत्त्वेगांगायांघोषमत्स्यौस्त इत्यत्रेवप्र

ख्यातेन इतिमात्रप्रतीतिः कर्तृत्वं भवतु आक्षेपादेव अन्यथा सकर्मकक्रियाया एवावगतेस्तत्रापि
कर्तरि शक्तिः प्रसज्यते अन्यलभ्यत्वान्नात्र न शक्तिरिति चेत् अत्रापि तुल्यत्वादिति ध्येयं अनुपप
त्तीति ग्राममानयेत्यादौ गोत्वस्यानयनेऽन्वयानुपपत्त्या व्यक्तेराक्षेपसंभवेऽपि गौरस्तीत्यत्र गोत्व
स्यास्तित्वेऽन्वयसंभवेन अनुपपत्तिज्ञानस्यैवासंभविततया न व्यक्तेर्लाभसंभव इत्यर्थः ननु अ
नुपपत्तिज्ञानं विनापि व्यक्तिबोधस्यानुभविकतया तदनुपपत्तेरित्यर्थः तथा सति पचतीत्यत्राप्या
ख्यातस्य कर्तरि शक्त्यापत्तेः अनुभवस्य तुल्यत्वात् अत एव ग्राममानयेति विहाय गौरस्तीत्येवो
क्तमिति चिन्तामणिकृतस्तु व्यक्तेरपदार्थत्वे तु वचनसंख्यादीनां तत्रान्वयासंभवः सुविभक्तीनां
प्रकृत्यर्थान्वितस्वार्थबोधकत्वनियमात् तिङर्थसंख्यादीनां कर्तर्येवान्वयात्तद्विशेषः जाता
वेव शक्तिस्वीकारे पश्वादिपदे उपाधिविशिष्टव्यक्तौ तैरपि शक्तिस्वीकारेण न वैवं तन्नियमा

पि

त.प्र.श. पपत्तिज्ञानाद्यधिकरणेनापिज्ञानवर्श्यौविनोगृहाभावेनबहिःसत्वसिद्धिरितिभावः तथाचगोशब्द
ज्ञोत्वस्यशाब्दबोधः व्यक्तेस्त्वनुमितिविषयत्वं अर्थापत्तिविषयत्वंवा नतुशाब्दबोधेतस्याः प्रवेशः।
भट्टमतेपदोपस्थिताएवशाब्दबोधेभासंते यथागामानयेत्यादौपदानुपस्थिताएववा यथा
पत्पतःश्वेतमारूपंदृष्ट्वाशब्दंचशृण्वतः खुरविक्षेपशब्दंचश्वेताश्वोधावतीतिधीरित्यत्रपदा
नुपस्थितानामेवशाब्दबोधविषयतातत्रशाब्दयामीत्यनुभवात् नतुकेचित्पदोपस्थिताः केचि
च्चपदानुपस्थिताइति अर्द्धजरतीयन्यायस्यभट्टैरनङ्गीकारात् नचगौरितिपदान्युगपदेवजा
तिव्यक्त्योःप्रतीतिर्व्याहन्येत एवंगोपदाज्ञोत्वधीः ततः अनुपपत्तिज्ञानेततश्चव्यक्तिधीरिति
ज्ञानधाराकल्पनंचेति गौरवमितिवाच्यं गोपदस्यजातिमात्रवाचकत्वे सिद्धेयुगपत्प्रतीत्ने
रसिद्धेः ज्ञानधाराकल्पनस्यचफलमुखत्वेनादोषात् यथापचतीत्यत्रकृतिमात्रशक्तार

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पगमे पदादेरपि बोधापत्तेरिति भावः. ननु आक्षेपोऽनुमानं तच्चन संभवति साध्यहेतुप्रयोगासंभ
वात्. तथा हि. इयं गौः गोत्वादिति तावत् अनुमानमसंभावि शब्दा[illegible]क्षाद्यनात्. नापि गोत्वं
गवाश्रितं गोत्ववत्वादिति. पक्षतावच्छेदकहेत्वोरैक्येन सिद्धसाधनात्. अथ गोत्वं व्यक्त्याश्रितं
जातित्वादित्यनुमानेन पक्षधर्मतावलाक्ष्ता व्यक्तिसिद्धिरिति चेन्न. जातित्वादेर्लिं
गस्य पदादनुपस्थितेः. व्याप्त्यादि प्रतिसन्धानमन्तराव्यक्तिबोधस्यानुभवसिद्धत्वाच्चेति क
थमाक्षेपाद्व्यक्तिलाभ इत्याशयेनाशंकते. ननु कोयमिति. समाधत्ते. तस्येति. गवादिधर्मि
णइत्यर्थः. अर्थापत्तिमेवाह. गोत्वंहीति. अनुपन्नमिति. आनयनाद्यन्वयेऽनुपपन्नमित्य
र्थः. तं स्वाश्रयं. आक्षिपतीति. अनुपपत्तिज्ञानजन्यार्थापत्त्यात्मकज्ञाने व्याप्त्यादि ज्ञान
स्यानपेक्षितत्वात्. अत एव शतवर्षजीविनो गृहेऽभावो बहिः सत्वं विनाऽनुपपन्नं इत्यनु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

श.प्र.टी सन्निकृष्टत्वेन तत्र शक्तेरग्रहाच्छाब्दबोधानुपपत्तिरिति तद्विशेष्यकशाब्दबोधे विच्छिन्नं प्रति तद्विशेष्य
कशक्तिग्रहत्वेन कारणतावच्छेदकत्वे चेति शाब्दत्वशक्तिज्ञानत्वाभ्यामेव कार्यकारणभावो वाच्यः
योग्यतावत्वाच्चागृहीतशक्तिव्यक्तेरपि भानमुपेयं· एवं च घटपदात्पटशाब्दबोधापत्तिर्जाग
र्त्येवेत्यनुपपत्त्या शाब्दप्रमितिरनुमित्यन्तर्गतैव· एवं च घटपदात्पटशाब्दबोधापत्तिः तन्नि
रूपितव्याप्तिज्ञानादेरभावादित्याखण्डलभावार्थो विस्तरेयः· अत्र शाब्दत्वशक्तिज्ञानत्वाभ्यां
कार्यकारणभावविचारे· गोत्वस्यैवेति· गोत्वविशिष्टे शक्तिस्वीकारआवश्यकत्वात् नागृही
तविशेषणान्यायेन गोत्वस्य च शक्तिः। विशिष्टे शक्तिस्वीकारमपेक्ष्य विशेषणे शक्तिस्वी
कारे लाघवात्· तदिदमुक्तं· विशेष्यं नाभिधा गच्छेत्क्षीणशक्तिर्विशेषणे इति· कथं तर्ही
ति· व्यक्तेरशक्यत्वे इत्यर्थः· नाम· बोधविषयता· अशक्यस्यापि शाब्दबोधविषयत्वो

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मूलमित्याशंकते· अस्त्वेक एवेति· सएवेति सार्वज्ञादिशालीमनुत्वेनभवदभिमत इत्यर्थः· तथा च
नाम्नैव भेदो नाम भवतीति भावः· द्विमिति· स्वोपादानगोचरजन्यापरोक्षज्ञानचिकीर्षाकृत्यजन्यानिज
न्मानि सकर्तृकाणि कार्यत्वाद्घटवत् इत्यनुमानमपि ईश्वरसाधकमवसेयं· ननु शक्तिज्ञानस्य हेतु
त्वे पि घटपदं घटे शक्तमिति शक्तिज्ञानकाले पटशाब्दबोधापत्तिः· न च तदा घटशाब्दबोधोत्पत्त्या
शाब्दत्वावच्छिन्नं जायत एव पटशाब्दत्वावच्छिन्नो [illegible]त्पादकाभाव एवेति वाच्यं· योग्यताज्ञानादेरे
वतदवच्छिन्नोत्पादकत्वादित्याशंकते· स्यादेतदिति· ननु तदर्थविषयकशाब्दत्वावच्छिन्नं प्रतितच्छ
क्तपदज्ञानत्वेन हेतुत्वकल्पनान्नोक्तापत्तिरित्याशंकते· अथेति· देशान्तरस्थस्य पुंसः·
तस्या एव काशीस्थितगोरेव· अप्रतीतेरिति· असन्निकृष्टत्वादिति भावः· गोः काशीष्ट
त्तिरिति वाक्यजन्यबोधिकाशीस्थगोरेव विशेष्या· एवं च देशान्तरीयपुंसः तादृशगौर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

–त.
१.रा

न्नैवं तन्नैवं यथा गगनादीति व्यतिरेक्यनुमानमेव तदानीमन्यदृष्टसंभवादीश्वरसाधकमिति हृ
द्यम्. मन्वादय इति. तथा च नेश्वरसिद्धिरिति भावः. नेति. यद्येवं तावता न संकेतग्रहानुपप
त्तिः तथापि प्रसङ्गादीश्वरोऽपि साध्यत इति भावः. तेषामिति. कपिलमन्वादीनां सर्वज्ञत्वे भवतु
व्यवहारहेतुत्वं परन्तु तेषां तत्त्व एवं विवाद इति भावः. ननु व्यवहारान्यथानुपपत्तिर्भवन्मते ईश्वर
इव मन्मतेऽपि तेषु सर्वज्ञत्वे एव मानं स्यात्. धर्मिकल्पनातो धर्मकल्पना याऽएव लघीयस्त्वं चे
त्याह. व्यवहारेति. एवमपि पूर्वसर्गसिद्धसर्वज्ञत्वकमन्वादिस्वीकारेऽपि. अनुपपन्नोऽस्तीति.
पूर्वसर्गात् पूर्वसर्गसिद्धसर्वज्ञत्वकः कश्चिद्यदि स्यात्तदा ततस्तत्र व्यवहारप्रवर्त्तना स्यात्. स एव
तु नास्तीति भावः. तत्रापि पूर्वसर्गेऽपि. अन्य एवेति. स्वपूर्वसर्गसिद्धसर्वज्ञत्वकस्यान्य एवे
त्यर्थः. तथा भावः व्यवहारप्रवर्त्तकत्वं. ननु सर्वदा सर्वज्ञत्वादिशालीएको मनुरेव सर्वत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धेयभावइतिभावः । वस्तुतस्तु शब्दादिरूपकार्याधिकरणत्वाद्गगनेऽतिव्याप्तिरतः कालेति । आगमेति ।
धाता यथापूर्वमकल्पयदितिवेदसिद्धत्वादित्यर्थः । तथा च संसारस्य प्रवाहानादित्वं नत्वनादित्वमे
वेतिभावः । कालकपालान्यावृत्तिर्घटप्रागभावः कार्यद्रव्यानधिकरणकार्याधिकरणावृत्तिरभाव
त्वात् गगनवृत्तिघटात्यन्ताभाववत् । पक्षधर्मताबलाच्च प्रागभावे ईदृशकालवृत्तित्वं सिद्ध्यतीति । ख
ण्डप्रलयवृत्तित्वमादाय पर्यवस्यतीत्यनुमानमपि तत्साधकं बोध्यं । शरीरद्वयं प्रयोज्यप्रयोजकद्व
द्व्यशरीरद्वयं । तथा पूर्ववत् । संकेतं घटादिपदसंकेतं । नन्वेवं संभवतीश्वरे मानसत्वेन देवानुनेत्याशंक
ते । ईश्वर एवेति । व्यवहारेति । शक्तिग्राहकाभावाद्बालस्य ग्रहे घटादिगोचरप्रवृत्त्यनुपपत्तिरेवेश्व
रे मानमित्यर्थः । यद्यप्यर्थापत्तेर्नास्मन्मते प्रमाणान्तरत्वं तथापि सर्गाद्यकालीनशक्तिग्रहः प्रयो
ज्यप्रयोजकवृद्धव्यवहारप्रयोज्यः प्रयोज्यप्रयोजकवृद्धव्यवहाराप्रयोज्यत्वे सति प्रयोज्यत्वात् । प

मो

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त॰प्र॰टी नुसंसारस्यानादित्वात् खण्डप्रलयाद्यभावेन सर्गाद्यकालाभावात्कथं तदसंभव इत्याशंकते
प्रलय इति· खण्डप्रलय इत्यर्थः· कार्यद्रव्येति· सृष्टिकालवारणाय कार्यद्रव्यानधिकरणे
ति· कालिकसंबन्धेनाधिकरणत्वं बोध्यं· कार्यानधिकरणोक्तावसंभवः· खण्डप्र
लयेपि परमाण्वादौ रूपक्रियादिसत्वादतः कार्यद्रव्येति द्रव्यानधिकरणे उक्तावपि तथा
परमाण्वादेः सत्वादतः कार्येति· कार्यद्रव्यानधिकरणोक्तौ महाप्रलयेऽतिव्याप्तिरतः का
र्याधिकरणेति· कार्यत्वं चात्र ध्वंसप्रतियोगित्वं· तेन महाप्रलये ध्वंसरूपकार्याधिकरण
त्वेपि नातिव्याप्तिः अभावातिरिक्तकार्यपरं कार्यपदं सामान्यस्य विशेषपरत्वादित्यपि· पद
कश्चित् महाप्रलयस्य चरमदुःखध्वंसादिरूपतया प्रतियोगितासंबन्धेन कार्याधि
करणत्वात्कालेपि कालिकसम्बन्धेनाधिकरणत्वबोधकं भिन्नकालीनयोर्नाधारा ०मः
ति·

२०१५

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भित्याहारेण शक्तिग्रह इति ध्येयम्. ननु कोशस्य शक्तिग्राहकत्वे गुणे शुक्लादयः पुंसि गुणिलिंगास्तु
तद्वतीत्यनेन शुक्लादिपदानां गुणे गुणविशिष्टे च शक्तिप्रतिपादनात् गुणविशिष्टेऽपि शक्तिः स्यादि
ति चेन्न. अनन्यलभ्यस्यैव शब्दार्थतया शुक्लादिपदानां गुणविशिष्टलक्षणयैवोपपत्तौ न त
त्र शक्तिः कल्प्यते असति बाधक एव कोशस्य शक्तिग्राहकत्वात्. अत एव व्याकरणे नाख्या
तस्य कर्तरि शक्तिप्रतिपादनेऽपि लाघवात् कृतावेव शक्तिरिति वक्ष्यत इति दिक्. तयोः प्रयोज्य
प्रयोजकवृद्धयोः. पर्पतावात्वेन. अनयोः स्वपूर्वकालीनप्रयोज्यप्रयोजकवृद्धयोः अन
वस्थेति. तयोर्व्यवहारोऽपि अन्यव्यवहारपूर्वक एवेत्यनवस्थापत्तेरित्यर्थः. इयं अनवस्था
बीजांकुरवत् अनाद्यनवस्था न दोषाय प्रामाणिकत्वादिति भावः. तदसंभवादिति. तत्राद्यो
त्पन्नबालस्य स्वपूर्वकालीनप्रयोजकवृद्धव्यवहारदर्शनाच्छक्तिग्रहासंभवादित्यर्थः. न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न·प्र·श

अविरलप्रवाहिचिरस्थायीच्छामात्रयोनिदुःखासंभिन्नसुखत्वं शक्यतावच्छेदकत्वेन तत्रदुःखध्वंसोऽभिरेव·
अतएव तत्प्रकारकबोधस्यानुभवसिद्धत्वात् इत्यप्याहुः· नच ग्रन्थमिति· अयन्तस्थिरं चिरस्थायित्वं प्रवा
हस्येति बोध्यं। विवरणात्· यथा पचति पाकं करोतीति यत्नार्थककरोतिना सर्वाख्यातविवरणात्· आ
ख्यातस्य यत्नत्वविशिष्टे शक्तिः· यद्यपि पूर्वोच्चरितवाक्यस्य स्वसमानार्थकोत्तरोच्चरितवाक्येनार्थ
कथनरूपविवरणस्य शक्तिग्राहकतानस्त्यविधया· इदं पदमत्र शक्तमिति शक्तिबोधकपदाभावा
त्·तथापि· आख्यातपदं यत्नत्वविशिष्टे शक्तं· यत्नत्वविशिष्टशक्तकरोतिधातुप्रतिपादितार्थकत्वा
त्·आकं(?)खविशिष्टशक्तपचधातुप्रतिपादितार्थकपदवत्·यद्धर्मविशिष्टशक्तप्रतिपादितार्थकं भव
ति तत्तद्धर्मविशिष्टे शक्तं भवतीति सामान्यमुखी व्याप्तिरत्राभिमता· इह सहकारतरौ मधुरं पिको
रौतीत्यत्र सहकारतरुरूपप्रसिद्धपदसमव्याहारेण पिकपदं कोकिले शक्तमिति प्रसिद्धपदसम

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देन दुःखासंभिन्नत्वादिकं नानैव शाक्यतावच्छेदकमित्याहुः तन्न नानार्थत्वकल्पने गौरवात् तथा ता
त्पर्यग्राहकस्याभावाच्च केचित्तु यावति नवेद्यर्थ तदेव शाक्यतावच्छेदकमित्याहुः अपरेतु दुःखा
सम्भिन्नत्वादिकं न शाक्यतावच्छेदकं किंत्वधर्माजन्यशरीरजन्यसुखत्वोपलक्षितमिदं योगिनांतु
नाधर्माजन्यं शरीरं तत्र दुःखोत्पत्तेरधर्मजन्यत्वात् सुखमात्रावच्छेदके तच्छरीरे मानाभावात्
अथ मरणस्य दुःखनियतत्वात्स्वर्गशरीरेपि मरणजन्यदुःखसंभवादसंभवः न च तेन दुःख
स्वमत्यवइत्यनेन विरोधः तस्य दुःखान्यत्व परत्वात् इति चेन्न अनुकूलतर्काभावेन मरणस्य
दुःखनियतत्वे मानाभावात् भावे वा मरणजन्यदुःखजनकाधर्माजन्ये शरीरजन्यसुखत्वस्य प्र
वृत्तिनिमित्तत्वात् एतेन स्वर्गेपि पातभीतस्येति प्रवरणात्स्वर्गशरीरस्य सुखमात्रावच्छेदकत्वेन
तत्र दुःखधीर्भ्रान्तिरेव अतस्वतत्कर्ममात्रजन्यमेवेति तदविशेषणोपि क्षतिविरहइत्याहुः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नेपि कंग्वादिशक्तिमत्वे बाधकाभावः नानार्थत्वेनापि वेदोपपत्तिरिति वाच्यं अन्याय्यं चानेकार्थत्वमि
न.प्र.शा. तिन्यायेन वेदस्य वलवत्वानन्नैव शक्तिपरिच्छेदात् एवं यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरं अ
भिलाषोपनीतञ्च तत्सुखं स्वःपदास्पदमित्यत्र वेदादेव स्वःपदशक्तिग्रहः नन्वदुःखासंभिन्नत्वं न
दुःखासमानाधिकरणत्वं आद्यावन्त्ये च दुःखसत्वेनासंभवात् नापि दुःखासमानकालीनत्वं
अस्मदादिसुखेपि तथात्वात् न चानन्तरमित्यस्याविरलतरगन्तप्रवाहीत्यर्थकतया विरलत
ग्नप्रवाहस्य दुःखासंभिन्नत्वप्राप्सा नातिव्याप्तिरिति वाच्यं अस्मदादिसुखस्यापि कतिपयका
लावच्छेदेन तथात्वसंभवात् चक्रवर्त्तिसुखे तथात्वसंभवेनाभिलाषोपनीतमित्यनेनापि तन्नि
रासासंभवात् अन्यथा विशेषणान्तरवैयर्थ्यापत्तिरिति चेत् अत्र केचित् एकस्मात्मावच्छे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रत्ययादीनां शक्तिग्रहो व्याकरणादित्यर्थः कोशादेरिति अप्येकदन्तहेरंबलंबोदरगजाननादिष्व
त्र गणेशत्वविशिष्टे शक्तिग्रह इत्यर्थः नन्वत्र गणेशत्वविशिष्टस्य पदार्थतया पदार्थस्य पदार्थता
वच्छेदकस्य वा भेदाभावात्कथं द्वन्द्व इति चेन्न कोशस्य शक्तिग्राहकतया रदपदमत्र शक्तमिति ग्रहस्यै
व तस्माद्द्वये न तत्र पदानामेव पदार्थतया तद्भेदसत्वात् आदिपदाद्वाक्यशेषविवरणप्रसिद्धपदसा
मानाधिकरण्यपरिग्रहः वाक्यशेषात् यथा यवमयश्चरुर्भवतीत्यत्र यवशब्दो म्लेच्छप्रसिद्धिवशा
त्कंगोर्वाचकः आर्यव्यवहारदर्शनाद्दीर्घशूकविशिष्टस्य वाचकः व्यवहारस्योभयत्राविशेषा
दिति संदेहे वसन्ते सर्वसस्यानां जायते पत्रशातनं मोदमानाश्च दृश्यन्ते यवाः कणिशशालि
न इति वाक्यशेषाद्दीर्घशूकविशिष्टे शक्तिनिर्णयः नन्ववेदेन दीर्घशूकविशिष्टे शक्तिबोध

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त॰प्र॰श॰

ति॰ तदर्थविषयकशाब्दत्वावच्छिन्नंप्रति ज्ञायमानतच्छक्तपदत्वेन कारणत्वान्नातिप्रसङ्ग॰ इति भावः
नन्वेवंव्यवहारएवशक्तिग्राहकःस्यायात॰ इत्थंच शक्तिग्रहंव्याकरणोपमानकोशाप्तवाक्याद्व्यव
हारतश्च॰ वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धा इति प्राचीनगाथाविरोधः स्यात आ
ह॰ तदनन्तरमिति॰ आद्यशक्तिग्रहानन्तरमित्यर्थः॰ व्यवहारात्॰ गवानयनगोचरप्रयोज्यप्रयोज
कवृद्धव्यवहारात्॰ पूर्वंतु घटानयनगोचरो व्यवहार उक्त इति नाभेदः॰ अनवस्थाभिया॰ पूर्वं व्यवहा
र एव शक्तिग्राहकः॰ ततश्च व्यवहारेणोपमानेन वा शक्तिग्रहो जायत इत्यत्र नास्माकमाग्रह इति
न प्राचीनगाथाविरोध इति भावः॰ उपमानादिति॰ गोसदृशो गवयपदवाच्य इत्युपमानात्॰ गवयो
गवयपदवाच्य इति शक्तिग्रहो भवेदित्यर्थः॰ शब्दादिति॰ आप्तवाक्यादित्यर्थः॰ कोकिलः पिक
पदवाच्य इत्याप्तवाक्यात्पिकपदादेः कोकिले शक्तिग्रहादिति भावः॰ व्याकरणादिति॰ प्रकृति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्षणाक्रियात्वात् मक्रियावदित्यनुमिनोतीत्यर्थः · ज्ञानं घटानयनगोचरं ज्ञानं · अयं घटानयनगो
चरप्रयत्नः घटानयनज्ञानजन्यः घटानयनगोचरप्रयत्नत्वात् स्वीयस्तनपानगोचरप्रयत्नवत् · यो
यद्गोचरप्रयत्नः स तज्ज्ञानजन्य इति सामान्यमुखी व्याप्तिः अतो न दृष्टान्तासङ्गतिरिति दृष्टान्तमेवा
ह · स्वप्रयत्न इति · स्वीयस्तनपानगोचरप्रयत्न इत्यर्थः तेन बालेन तथा निश्चयात् ज्ञानजन्यत्वनि
श्चयात् · तद्धेत्वाकांक्षायां · घटानयनगोचरज्ञानहेत्वाकांक्षायां · शब्दमेव · घटमानयेति शब्दमेव ·
आवापोद्वापाभ्यामिति · आवापः संग्रहः · उद्वापस्त्यागः · यथा घटमानय पटं नयेत्यादि · तत्ते
चतस्मिन्निति · घटपदे घटधीजनकत्वेन्द्रूपे चेत्यर्थः · अतिप्रसङ्गभङ्गाय · घटपदं घटधीजनकं
मित्यपि स्यादित्यतिप्रसङ्गभङ्गायेत्यर्थः · वस्तुतस्तु · अतिप्रसङ्गभङ्गाय · अगृहीतशक्तिकानामपि
घटशाब्दबोधातिप्रसङ्गभंगायेत्यर्थः · तज्जननानुकूलं · घटधीजननानुकूलं · किमनुपपन्नमि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न संकेतग्रहासंभवात्कथं शक्तिज्ञानं हेतुरित्याशंकते · स्यादेतदिति · कथं ग्राह्य: केन प्रमाणेन ग्रा
न·प्र·श ह्य: शंकते · उपमानादितीति · तत्र अतिदेशवाक्यार्थज्ञानरूपोपमानस्य · वाक्यार्थज्ञाने
ति · गोसदृशो गवयपदवाच्य इत्यतिदेशवाक्यार्थज्ञानं तावदस्त्येवं · तच्च गोसदृशोहितिरवगत
वाक्यार्थज्ञाने समस्त्यादित्यर्थ: तस्य गोसदृश इति वाक्यार्थज्ञानस्य · शक्तिग्रहमूलकत्वा
त् · गोपदं गाविशक्तमिति शक्तिज्ञानमूलकत्वादित्यर्थ: तथा च तच्छक्तेरप्युपमानान्नश
क्षेऽनवस्थापत्तिरिति भाव: व्यवहारादिति · प्रयोज्यप्रयोजकवृद्धव्यवहारादित्यर्थ: ·
व्यवहारश्च · घटानयनादिक्रियारूप: · केनचित्प्रयोजकवृद्धेन कश्चन प्रयोज्यवृद्ध: त
दर्थं प्रयोजकवृद्धवाक्यार्थ: घटमानयेति · घटानयनानुकूलश्चेष्टावानू भवति तथा कि
यया घटानयनक्रियया · तस्य · प्रयोज्यवृद्धस्य प्रयत्नमिति · इयं क्रिया प्रयत्नपूर्विका विल

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नेपि शाब्दबोधानुदयाच्छक्तित्वेन तज्ज्ञानं हेतुः· शक्तित्वं च तादृशेश्वरसंकेतत्वं तथा च पामराणामी
श्वरज्ञानात् संकेतस्येश्वरसंकेतत्वेनाज्ञानात् कथं बोध इत्याशंकते· कथं तर्हीति· ईश्वरमविदुषामि
ति पामराणां मीमांसकानां चेत्युभयत्रान्वेति· तथेति· संकेतत्वेनेत्यर्थः· तेषामपि संकेतत्वप्रका
रकज्ञानसत्त्वादिति भावः·· चैत्रशब्दादयमर्थो बोद्धव्य इत्यास्माकीनेच्छाविषयाणां चैत्रादिशब्दा
नामशक्तत्वापत्तिः तत्रेश्वरसंकेताभावादित्याशंकते· आधुनिकेति· कागतिरिति· तत्रेश्वरेच्छा
रूपसंकेतज्ञानाभावादिति भाव· तस्यापि· आधुनिकसंकेतितचैत्रादिशब्दस्यापि· ईश्वरेति·
द्वादशाहःकालीनपित्रुच्चारितनामपदवाच्यः शिशुरित्याकारिकेच्छयेश्वरेण तादृशश्रुति
प्रणयनात्तत्रापीश्वरसंकेतोऽस्तीति भावः· ईश्वरीयज्ञानस्येच्छाया वा कृतेर्वा शक्तिरूप
त्वमिति विनिगमनाविरहादतिरिक्तैव शक्तिरिति नव्याः संकेतग्राहकप्रमाणाभावे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दिति॰ एतत्पदजन्यत्वप्रकारतानिरूपितैतदर्थबोधविशेष्यताशालिनी इच्छेत्यर्थः हन्तैवमिति॰ एवंह
त॰प्र॰श इच्छामात्रस्यैवाभिधातृत्वे पामरादीति॰ गगरीत्यादिशब्दा इत्यर्थः॰ अभिधायकाः स्युरिति॰ तथा च ना
पभ्रंशितवै नम्लेच्छितवैरित्यादिश्रुतिविरोधः शक्त्या प्रतिपादकत्वस्यापभ्रंशानपभ्रंससाधारणात्
अतिरिक्तशक्तिस्वीकारे तु तत्र संकेतसत्वेपि अतिरिक्ताभिधायास्तत्रानंगीकारेणतादृशश्रु
तिविरोध इति भावः संकेतमात्रं तादृशेच्छामात्रं अपभाषिते॰ गगर्यादिशब्दे॰ सोस्ति॰ ईश्वरसंके
तोस्ति॰ मानाभावादिति॰ शास्त्रनिश्चितशक्तीनां गगर्यादिशब्दानां शाब्दरूपफलाभावेनापभ्रंशेन ता
दृशेश्वरसंकेत इत्यर्थः नापभ्रंसितवै इति श्रुतिविरोधश्च बाधको वसेयः॰ ननु शाब्दसामान्ये शक्ति
ज्ञानस्य हेतुतया अपभाषिते शक्त्यभावेन कथं शाब्दबोध इति तटस्थः शंकते॰ कथं तर्हीति॰ शक्ति
भ्रमादिति॰ भ्रमप्रमासाधारणशक्तिज्ञानत्वेन हेतुत्वादिति भावः ननु प्रमेयत्वादिना शक्तिज्ञा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्तुर्वाच्यः तच्च न संभवति· भ्रान्तेः पुरुषधर्मत्वेन भ्रमाद्यजन्यत्वनिर्णयासंभवात् संभ्रमाद्यजन्य(त्वा)थादिप्रहाणिजन

(भ्रमाद्यजन्यत्व) कत्वादेश्च तद्ग्राहलिंगस्य शाब्दबोधोत्तरकालीनत्वादित्यास्तां विस्तरः· ननु शाब्दस्यानुमानान्तर्गतत्वेन

घटमानयेति शब्दाद्घटादिपदे शक्तिमविदुषोपि शाब्दबोधापत्तिः न मतं तत्र व्याप्तिज्ञानाभावादेवत

दसंभवस्तात्र्या येनाशंकते नन्विति· स्वातन्त्र्येण शब्दत्वेनोपामराणां घटादिपदे अगृहीतशक्तिकानां·

सहकारित्वादिति· स्वेतरकारणचक्रसमवहितकारणस्यैव फलोपधायकत्वेन केवलशाब्दसत्वेपि श

क्तिज्ञानरूपसहकारिविरहान्न तत्र फलोपधानमिति भावः उपोद्घातसंगत्या शक्तिं निरूपयितुमा

शंकते अथेति· इयं शब्दसहकारिग्रहविषयः· पदार्थान्तरमिति · तत्तत्पदार्थभावच्छेदकाभावरूप

वदित्यर्थः तेनन्नासिद्धसिद्धव्याघातः संकेतग्रहमिति· वक्ष्यमाणसंकेतजन्यग्रहविषयइत्य

र्थः आवश्यकत्वादि(हि)अभिधाज्ञाने भवतामप्यपेक्षणीयत्वात् संकेतं निरूपयति· सचेति अस्मा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वश्य

त.प्र.रा. एकप्रतीतीच्छयोच्चरितमिदमिति तात्पर्यनिर्णयस्य शाब्दबोधात्पूर्वमवश्यमपेक्षिततया लौकिकवाक्यम
नुवादकं तस्माल्लौकिकवाक्यं सर्वमेवानुवादकत्वादप्रमाणं वेदेतु तदभावात्प्रामाण्यमित्यूचुः तदसत् ए
कपदार्थविशिष्टापरपदार्थविशेष्यकएकपदार्थप्रकारकप्रतीतीच्छयोच्चरितत्वरूपयथार्थतात्पर्यनि
श्चयत्वेन हेतुत्वे याथार्थ्यनिवेशे गौरवात् । किंतु नानार्थानुरोधेन शाब्दसामान्ये एकपदार्थप्रकारकापरपदा
र्थविशेष्यकप्रतीतीच्छयोच्चरितत्वरूपतात्पर्यज्ञानस्यैव । न चैवं वह्निना सिंचतीत्ययोग्यवाक्यादपि प्रमाप
त्तिरिति वाच्यं एकपदार्थे परपदार्थवत्त्वरूपयोग्यताप्रमाया एव संशयनिश्चयसाधारणरूपेण कारणत्वा
त् । अपि चेदं वाक्यं भ्रमादिविशिष्टज्ञानयोरन्यतरजन्यं वाक्यार्थज्ञानजन्यवाक्यत्वात् तत्र भ्रमादेर्वा
धे अयं वक्ता स्वप्रयुक्तवाक्यार्थगोचरयथार्थज्ञानवान् भ्रमाद्यजन्यवाक्यार्थज्ञानजन्यवाक्यप्रयो
क्तृत्वात् अहमिवेति वक्तृयथार्थज्ञानानुमानपूर्वकमेव यथार्थवाक्यार्थप्रती[illegible]परत्वनिश्चयो हे

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पदार्थत्वेन रूपेण तत्तत्पदार्थघटितं विशिष्यतत्तत्पदार्थघटितं च तत्र वेदस्थले घटपदार्थविशिष्टाम्पदार्थविशे
ष्यकघटपदार्थप्रकारकप्रतीतीच्छयोच्चरितत्वरूपतात्पर्यमेव हेतुः ननु विशिष्य तत्तत्पदार्थघटितं लोके तु घटवि
शिष्टकर्मता विशेष्यघटप्रकारकप्रतीतीच्छयोच्चरितत्वरूपतात्पर्यज्ञानमेव हेतुः तत्र सामान्यतो घटपदार्थत्वा
दिना तात्पर्यग्रहेपि पदादेरपि लक्षणादिना घटपदार्थत्वसंभवेन घटविशिष्टकर्मताविशेष्यकप्रतीतीच्छयोच्च
रितं न वेति विशिष्यसंदेहेपि शाब्दबोधापत्तेः वेदे तु लक्षणादिनान्यार्थासंभवेनैकपदार्थत्वेन ज्ञाने विशिष्यवि
शिष्यसंदेहाभावात् यथा कपिञ्जलानालभतेत्यादौ प्रथमोपस्थितत्वरूपलाघवतर्कनिर्णीतत्रित्वावि
शिष्टकपिंजलपदार्थपरं बहुवचनान्तं कपिंजलपदमिति सामान्यतः कपिंजलपदार्थत्वरूपेण ता
त्पर्यनिर्णयेपि विशिष्यकपिंजलत्वादिरूपेण तात्पर्यसंशयासंभवात् लोके तु यत्र क्वचनेत्यपि तात्प
र्यसंभवेन लाघवतर्कानवतारात् विशिष्यसंदेहसंभवेन घटविशिष्टकर्मत्वविशेष्यकघटप्रका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न·प्र·श· नौपाधिकत्ववारणाय ज्ञानोपयोगित्वसंभवतीति बाधाभावादिवारणाय व्यभिचारित्वेन लक्षणपादिति तदर्थस्त्वा
२जनक भासव्यावृत्तत्वं धर्मभिन्नत्वमिति यावत् वस्तुमात्रस्यैव लिंगविधया धर्मजनकतया ज्ञायमानलिंगत्वाति जनक ३
रिक्तरूपेण धर्मजनकत्वं विवक्षणीयं न च तन्मते तत्प्रसिद्धिः विसंवादिप्रवृत्त्यादिज्ञानमात्रस्यैव तथा
त्वात् न चाबाधितत्वादितथा बाधस्य विपरीतनिश्चयसंभवे ज्ञानमात्राभावेन तदभावस्य ज्ञानमात्रेप्रयो
जकत्वादिति ननु तन्मते गृहीतासंसर्गकग्रहणस्मरणात्मकज्ञानद्वयस्यैव धर्मतया विसंवादिप्रवृ
त्तिजनकत्वेन तस्य च निधर्मितावच्छेदकतया बाधाभावस्य न तत्र हेतुत्वमिति कथमेतत् अत्र केचित् वि
संवादिप्रवृत्तिजनकत्वेन न ज्ञानस्य प्रवेशः अपि तु स्मृतित्वेन तथा च स्मृतिजनकतावच्छेदकावच्छिन्ना
न्यत्वादितितदर्थः जनकता चोद्बोधकव्याप्तत्वान्तेन नासिद्धिरिति असंसर्गाग्रहविशिष्टज्ञानद्वयेऽन्व
यव्यतिरेकाभ्यां बाधस्याविरोधित्वमित्यन्ते एव तेस्यापि कश्चिदित्यादिक् । न च तत्पर्यसामान्यतः तन्नत्

ताकरणानोभयसाधारणस्य जनकतात्वस्यैकस्याभावादिशिष्येव निवेशो करणत्वात्मकजनकताप्रसक्तेर्न प्रवेशः
ननु करणतातिरिक्तजनकतात्वेन प्रवेश इति व्यर्थत्वशंकाया अनवकाशाच्च उद्बोधकव्याद्याच्च स्मृतिजनकतानि त
वेशनीया नातउद्बोधकतया जनकतामादाया असिद्धिः प्रागभावस्य तद्व्यक्तित्वेनाहेतुत्वाच्च न प्रमानुमिति प्रागभा
वे व्यभिचार इति दिक् केचित्तु एवं प्रकृतविषयवैशिष्ट्यावगाहि ज्ञानमेव प्रकृते प्रमितिशब्दार्थ इत्याहुः अथवा
ज्ञायमानकरण इत्यत्राधेयत्वं सप्तम्यर्थः तथा च यज्ज्ञानीयज्ञायमानकरणनिष्ठत्वे सति यज्ज्ञानोपयोगित्वे स
ति व्यभिचारि वैलक्षण्यं भवतीति तज्ज्ञानानिरूपितस्याननिष्ठकारणतायां विषयतासम्बन्धेनावच्छेदकं भवती
ति व्याप्त्यर्थः सल्लिंगपरामर्शस्तु न ज्ञायमानकरणधूमादिनिष्ठः अथात्मलिंगकानुमितिं प्रति ज्ञायमा
नेकरणे आत्मनि तस्य ईश्वरेर्न तद्वारणमिति चेन्न तज्ज्ञानानधिकरणत्वस्य ज्ञायमानकरणेनि वे
शात् अत एव प्रागभावस्य तद्व्यक्तित्वे न हेतुत्वेऽपि न प्रमानुमितिप्रागभावे व्यभिचारः धूमनिष्ठा

त॰प्र॰ग्र॰

न्तत्वं प्रमित्वजनकज्ञानजनकज्ञानसामग्र्यप्रविष्टत्वमिति याचत्. न चैवं सर्वांशे भ्रमाभावेन प्रमित्यजनिका
ज्ञानजनिका सामग्र्येवाप्रसिद्धा प्रमितिपदेन भ्रमभिन्नत्वविवक्षणे च तन्मते भ्रमाप्रसिद्ध्याप्रसिद्धिरिति वा
च्यं स्वव्यधिकरणप्रकारावच्छिन्नविशेष्यताशाल्यनुभवत्वस्य प्रमितिपदेन विवक्षणात् तादृशी च स्मृति
सामग्र्येव प्रसिद्धा अथानुभवस्य स्मृतिकारणतया सहितोपरामर्शस्यानेनैव वारणे ज्ञानविशिष्टकार
णसहकारीत्यत्र ज्ञानविशिष्टेत्यस्य वैयर्थ्यमिति चेन्न करणातिरिक्तज्ञानजनकनाश्य कारण
कलापस्यैव ज्ञानजनकसामग्रीपदेन विवक्षितत्वात् अन्यथा स्वात्मककूटलिङ्गकानुमितिस्थाना
भिषिक्तसाध्यस्मृतिमादाय स्मृतिसामग्र्यप्रविष्टत्वस्य व्याप्तावप्यसत्त्वेन दृष्टान्तासिद्ध्यापत्तेः
अवरणाभावघटकत्वाच्चासिद्धिवारकत्वोपि करणातिरिक्तेत्यस्य न वैयर्थ्यं वस्तुमात्रस्यैव स्वा
त्मककूटलिङ्गकानुमितिस्थानाभिषिक्तसाध्यस्मृतिजनकतया ऽसिद्धिवारकत्वाच्च जन

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मनिष्ठरूपादौ व्यभिचारवारणाय ज्ञानोपयोगीत्यत्र ज्ञानमात्रवृत्तिधर्मावच्छिन्नकरणताकज्ञानपरस्य
ज्ञानपदस्य निवेशात्। अत्रेदं चिन्त्यं। परामर्शरूपमानलिङ्गसत्त्वे संदिग्धलिङ्गपरामर्शाभावसंभवात् कथं संदिग्ध
लिङ्गपरामर्शे व्यभिचारनिरासः। न च यत् ज्ञानप्रत्युपयोगिता तज्ज्ञानकरणतावच्छेदकज्ञानविशिष्टक
रणसहकारित्वं विवक्षितं सत्परामर्शरूपमानलिङ्गसत्त्वेन प्रमानुमितिहेतुत्वेन संदिग्धलिङ्गपरामर्श
स्य प्रमानुमितिं प्रत्येवोपयोगितया प्रमानुमितिकरणतावच्छेदकसत्परामर्शविशिष्टलिं
गसत्त्वे सत्परामर्शे ~~प्रमानुमितिं प्रत्येवोपयोगितया प्रमानुमितिकरणतावच्छेद~~ भावासंभवदिति इति ४
च्यं। तथा सति व्याप्तिवदिति दृष्टान्तासंगतेः। व्याप्तिपक्षधर्मतावद्घटितत्वेन प्रमानुमितिं प्रत्येवोपयोगि
तया सत्परामर्शविशिष्टलिंगसत्त्वे व्याप्तसमभावासंभवेन तादृशसहकारित्वस्य व्याप्तासाध्यभावादि
ति आत्ममनोयोगबाधाभावादिवारणाय व्यभिचारित्वे तत्स्वरूपादिति। तच्च प्रमितिजनकव्यापार

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त॰प्र॰श॰ स्वज्ञानविशिष्टेत्वर्थात् लिंगपरामर्शस्य ज्ञायमानकरणसहकारित्वात् यस्मिन्सति यदभावात् का
र्याभावः तस्यैव तत्सहकारित्वेन स्वविशिष्टे स्वासहकारित्वात् तथा च तज्ज्ञाननिरूपितकरणतावच्छेद
कज्ञानविशिष्टकरणस्य ज्ञायमानत्वघटितधर्मावच्छिन्नकरणताकज्ञाने जननीये सहकारि
त्वमर्थः पर्यवस्यति परामृश्यमानलिंगत्वेनैवानुमितिकरणतया परामर्शविशिष्टसत्वे परामर्शा
भावासंभवान्न व्यभिचारः ह्रदो वह्निमान् ह्रदत्वादित्यादौ परामृश्यमानलिंगसत्वेपि व्याप्त्य
भावेन प्रमानुमित्युत्पत्त्यभावाद्व्याप्तिवदितिहेत्वज्ञसंगतिः व्याप्तिपक्षधर्मताविशिष्टलिंगत्वेन प्र
मानुमितिकरणत्वात् ज्ञायमानशब्दसत्वे शब्दसमवायाभावासंभवेनैव तादृशसहकारित्व
स्य शब्दसमवाये अभावेपि भायक्षणो धूमत्वसामान्यलक्षणाजन्यपरामर्शविशिष्टधूमसत्वेपि धू
मनिष्ठरूपाभावेन धूमचाक्षुषानुदयात्परामृश्यमानधूमस्य प्रत्यक्षे जननीये सहकारित्वाभू

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रणत्वात् व्याप्तिवच्छब्दशक्तिश्चेति । नञ्ज्ञानं हेतुत्वेन ज्ञानमुपयुज्यते शाब्दबोधनिरूपितज्ञाननिष्ठकारणतायां
विषयतासंबन्धेनावच्छेदकं शाब्दबोधनिरूपितज्ञानावच्छिन्नकारणताश्रयस्य शब्दस्य शाब्दबोधजन
नीये उपयोगित्वे सति सहकारित्वे सति व्यभिचारित्वे लक्षणत्वादिति तदर्थः । सामान्यमुखी च व्याप्तिः
यद्यज्ज्ञाननिरूपितज्ञानावच्छिन्नकरणताश्रयस्य यज्ज्ञाने जननीये सहकारित्वे सति व्यभिचारि
त्वे लक्षणं भवति । तज्ज्ञाननिरूपितज्ञाननिष्ठकारणतायां विषयतासम्बन्धेनावच्छेदकं भवति ।
यथा व्याप्तिः शब्दशक्तिश्चेति । अत्र भूयोऽवयवेन्द्रियसन्निकर्षे व्यभिचारवारणाय ज्ञायमानं कर
णमिति शाब्दबोधं प्रति ज्ञायमानकरणस्य शब्दस्य स्वप्रत्यक्षे जननीये उपयोगिनि शब्दनिष्ठो
त्रसम्बन्धे व्यभिचारवारणाय ज्ञानोपयोगीति । तथा च यज्ज्ञानं प्रति यज्ज्ञायमानं करणं त
ज्ज्ञाने जननीये सहकारीत्यर्थान्न दोषः । न च साध्यव्याप्तिज्ञानपक्षे व्यभिचारः । ज्ञायमानत्वस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त॰प्र॰श॰ दादः भिन्नस्य वेदस्य नित्यत्वात् नित्यानुमेये वेदे तदर्थज्ञापकत्वेन ज्ञानमन्येव सामग्रीति न
व्यभिचारः शुकवाक्येपि शिक्षकवाक्यमादायोपपत्तिः वर्णानां तन्मते नित्यैकरूपत्वात्
न च देवदत्तसंपन्नशुकबालादिवाक्ये गत्यभाव इति वाच्यं तस्याप्रमाणत्वात् व्यवहारस्तु
प्रत्यक्षादसंसर्गाग्रहाद्वेति केचित्तु शुकबालादिभिन्नलौकिकवाक्ये यथार्थवाक्यार्थप्र
तीतिद्वयोर्व्यभिचारितत्वं वेदे वेदत्वात् शुकबालादिवाक्ये अबाधितार्थकत्वं नानेव कारणत्वं प्रमाप्र
योजकमेकत्रान्ति मत्त्वेन च तेषां कारणत्वमिति नाननुगमः न च सर्वत्राबाधितार्थकत्व
मेव प्रयोजकमस्त्विति वाच्यं यत्रान्यघटाभिप्रायेणागेहे घटोस्तीत्युक्ते घटान्तरं दृष्ट्वा तमा
नयति तत्रान्यपरत्वेनाप्रमाणेपि प्रामाण्यापत्तेः तदुक्तं यत्परः शब्दः स शब्दार्थोऽन्तरति
इतीत्याहुरिति दिक् न च ज्ञातमुपयुज्यते ज्ञायमानकरणे ज्ञातोपयोगि व्यभिचारित्वेलक्षण
त्वेसति

तः तस्या पारवमसामर्थ्यं इच्छाविषयीभूतवर्णानुकूलत्वमिति यावत् इति चेन्न· धान्यप्रतार
कवाक्ये संवादेन प्रमाणेऽप्रतारणारूपदोषसत्त्वेन व्यभिचारात्· अन्यथाप्रतीतस्याविषमानार्थ
स्यान्यथाप्रतिप्रिपादयिषाया एवात्राप्रतारणात्वेन उक्तदोषोद्धारेऽपि सर्वसाधारणदोषत्वस्ये
च्छाभावेन तज्जदभावस्य प्रत्येकं कारणत्वे भ्रमसत्त्वेऽप्यन्यदोषाभावसत्त्वात्प्रमात्वापत्तिः अ
कू८५ भावे[illegible]चकारणत्वे गौरवात्· विसंवादिउक्तवाक्यादपि प्रमापत्तेश्च· तस्माद्यथार्थतात्प
र्यकत्वमेव लोकवेदसाधारणं शाब्दप्रमाप्रयोजकं यथार्थतात्पर्यकत्वं च· यथार्थवाक्यार्थप्र
तीतीच्छयोच्चरितत्वं· एकपदार्थविषयपरपदार्थप्रतीतीच्छयोच्चरितत्वमिति यावत्· उच्चरितत्वं चानु
सन्धीयमानत्वं· तेन तन्मते वर्णानां नित्यैकरूपत्वेऽपि नासंभवः· न वा मौनिश्लोकादावव्
याप्तिः· वेदे तु पूर्वपूर्वाध्यापकेच्छा मादाय संगतिः· सर्वप्रमाणवेदस्तु पौंरुषप्रमाणवे

त्. योग्यतासंशयवदिति दिक्. प्राभाकरास्तु. क्वचिच्छाब्दभ्रमः क्वचिच्च प्रमेति नियमं तिरोहाय द्वयप्रमात्वं
शाब्दप्रमात्वावच्छिन्नं प्रति किंचित्कारणमुपेयं. तच्च न योग्यता. अन्वयप्रयोजकरूपवत्त्वरूपयो
ग्यतायाः करकाभिप्रायप्रयुक्तपयसा सिंचतीत्ययोग्यवाक्येपि सत्वात्. अथ दोषाभावस्तथा
स्तु. दोषाश्च भ्रमप्रमादविप्रलिप्साकरणापाटवरूपा वक्तृनिष्ठाः. भ्रमश्च उच्चारणीयवाक्या
र्थगोचरो भ्रमः प्रमादो नवधानता. सा च वाक्यार्थज्ञानस्वरूपयोग्यस्य वक्तुरुच्चारणीयवा
क्यार्थनिश्चयव्यतिरेकः अकीयवाक्यार्थनिश्चयव्यतिरेकवारणाय यथ्यज्ञानिवेशः. अन्य
था प्रतीतस्यार्थस्यान्यथा प्रतिपिपादयिषा प्रतारणा स्वप्रतीतविरुद्धार्थप्रतिपादनेच्छेति या
वत्. सैव विप्रलिप्सा. इच्छाविषयीभूतवर्णानुकूलकरणतात्वाद्यभिघातानुत्पाद
कालीनापरवर्णानुकूलतात्वाद्यभिघातः. करणापाटवं करणाकरणतात्वाद्यभिघा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णापद्यमानमन्वादिवाक्ये ऽपौरुषेयत्वाभिमानिनो गौडमीमांसकस्य शाब्दबोधोदयेन व्यभिचा
रात् नापि द्वितीयः लौकिकत्वेनाज्ञातलौकिकवाक्यस्थले स्फुटशाब्दसामान्यसामग्रीत ए
व लौकिकत्वेनाज्ञातवाक्यादपि शाब्दोत्पत्तिसंभवेन तस्याकारणत्वात् न च पक्षसंशयस्या
दिनियमेन तद्धेतुत्वमिति वाच्यं तत्संशयेपि वाक्यार्थबोधोत्पत्त्या तत्संशयस्याप्रतिबन्धकं
त्वात् अव्यभिचारसंशयव्यतिरेकनिश्चयप्रतिबध्यव्याप्तिज्ञाने व्यभिचारेणाप्रयोजकत्वेन च त
द्व्यानियमाभावाच्च एतेन शाब्दसामान्ये ऽनाप्तोक्तत्वशंकाविरहो हेतुः स च लौकिके आप्तोक्त
त्वानुमानात् न चापौरुषेयत्वनिश्चयदशायामेव वेदस्यानुभावकत्वे दोषवक्त्रनुप्रणीतत्व
द्रष्टारितत्वरूपहेतुज्ञानसत्त्वेन पदार्थसंसर्गसिद्धिसंभवात् वेदस्याप्यनुभावकतापत्तिरिति
वाच्यं व्याप्तिस्मृतिविलंबेन तद्विलंबादिति परास्तं अनाप्तोक्तत्वसंशयस्याप्रतिबन्धकत्वा

वेदःपौरुषेयत्वानुमानात २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त. प्र. रा. रणत्वं स्वसमानाधिकरणस्वाव्यवहितपूर्ववर्त्तिस्वसमानाकारनिश्चयविषयाविषयकेतर
तद्विशेष्यकतत्प्रकारकानुभवकरणत्वमिति यावत् । स्वसमानाकारत्वं च स्वस्मिन् यादृशी
तद्विशेष्यत्वावच्छिन्नतत्प्रकारिता तादृशीतद्विशेष्यकत्वावच्छिन्नतत्प्रकारिताशालित्वमित्यू
ह्यः । तदसत् । व्याप्तिस्मृतिविलम्बेनाप्तोक्तत्वानुमितिसामग्रीभावेन प्रथमम् एव शाब्दबोधो
त्पादः अननुवादकत्वेन प्रमाणत्वात् । ननु लौकिकवाक्यमिदं न वेति संशये शाब्दबोधानुद आप्तोक्तं
यात् । यः संशयातिरिक्तनिश्चयो यत्र प्रतिबन्धको तन्निश्चयस्तत्र हेतुः एवमितो व्याप्तेर
वेति न्यायेनाप्तोक्तत्वनिश्चयस्य हेतुत्वात् शाब्दबोधात्पूर्वं तस्यावश्यकतेति चेन्न । तत्का
र्यतावच्छेदकं हि शाब्दत्वं वा लौकिकवाक्यजन्यशाब्दत्वं वा लौकिकत्वेन ज्ञानवाक्य
जन्यशाब्दत्वं वा । नाद्यः । वेदे तदभावात् । न द्वितीयः । आप्तोक्तत्वानिश्चयेऽपि वेदानुकार

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यायिकेभ्यरति वैशेषिकं स्य शब्दे वारयितृत्वेपि लिङ्ग विधयैतद्बोधकत्वान्नैयायिकेभ्य इत्युक्तं नैयायिकाना
शब्दे तु वैयेवो आरणात् शब्दतात्पर्यज्ञानसम्भवाच्छब्दो न स्वतन्त्रोनुमितिभावः अत्र मीमांसकास्तु लौकि
कवाक्यस्थले शाब्दबोधात् पूर्वं प्रकृतवाक्यार्थगोचरयथार्थज्ञानवदुक्तत्वरूपाप्तोक्तत्वानुमितिसामग्री
सत्वेनाप्तोक्तत्वानुमितिसंभवात् वाक्यार्थज्ञानस्यावश्यकत्वात् तदुत्तरं च वेदस्थलेप्युक्तप्र[illegible]
सामग्रीतः शाब्दोत्पत्तेः लौकिकशब्दोनुवादकः अनुवादकत्वस्य गृहीतग्राह्यनुभवमात्र
शाब्दे जनकत्वरूपत्वात् स्वसमानाधिकरणास्वाव्यवहितपूर्ववर्त्तिस्वसमानाधिकरणनिश्चयावि
षयीविषयकतद्विशेष्यकतत्प्रकारकानुभवमात्रजनकत्वरूपत्वादिति यावत् स्वपदं
मनुभवपरं वेदस्य त्वपौरुषेयत्वेनाप्तोक्तत्वानुमित्यसंभवादननुवादकत्वात् प्रामाण्यं
अनधिगतार्थानुभवकरणत्वस्यैव प्रामाण्यरूपत्वात् न च गृहीतग्राहित्वेनानुभवकर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवंभिन्नेविषयेऽनुमितिसामग्र्याः शाब्दसामग्र्याः प्रतिबन्धकताद्वयकल्पनेगौरवं·१

त·प्रु·२ बन्धकत्वैककल्पनेगौरवं· मन्मते तत्र शाब्दात्मकानुमितिस्वीकारेण तद्प्रतिबन्धकत्वेनैवोपप
न्नेरत आह· प्रतीयन्ते चेति अनुमिन्वन्तीति· नन्वव्याप्तिज्ञानादिघटितसामग्रीजन्यत्वानुमितित्वाभाव
एव तद्विषयइति वाच्यं· व्याप्त्याद्यप्रतिसन्धानेपितस्यानुभवसिद्धत्वात्· असाक्षात्कृतमिति· पद्य
पिनोपपद्यतामित्यपि वक्तुमुचितं· तथा प्युपमितेः शक्तिमात्रविषयकतया घटादिविषय
कज्ञानस्य तत्रासंभवेन तन्निराकरणस्याप्रयोजकत्वात्· नोपमितमितिशेषस्यापि क॰
श्चित्· तथा च शाब्दजन्यज्ञानेऽनुमितित्वाद्यभावेन विलक्षणप्रमितित्वाङ्गीकरणस्यावश्य
कतया तत्करणस्य प्रमाणान्तरत्वमावश्यकमिति भावः· श्रुतमिति· नैयायिकशब्दजन्य
शाब्दबोधविषयइत्यर्थः· श्रुधातोर्ज्ञानार्थकत्वेन शाब्दत्वविशिष्टेऽशक्तत्वात्· अतएव
आत्मा वा अरे मैत्रेयि द्रष्टव्यः श्रोतव्य इत्यादिश्रुतिरप्युपपद्यते· इदंघटज्ञनयनादि·ने

कर्मका १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

साध्य

पत्वमितिवाच्यं · गौरवान्साध्यव्याप्यवान्नवेति संशयादनुमित्यापत्तेश्चेति चेन्न · अयमालोकोधूमो
ऽनुभयथापि वह्निव्याप्य इत्यत्र हेतुतावच्छेदकसंदेहेपि नैयायिकैरनुमितेरभ्युपगमात् · व्याप्य
वत्तानिश्चयत्वेनैवानुमितिहेतुत्वं · तस्य च योग्यतारूपहेतुनिश्चयस्य सन्देहेपि संभवान्न का
प्यनुपपत्तिरत आह · इष्यते चेति · ननु व्याप्तिभ्रमादेवानुमितिरस्तु · न च भ्रमात्मकपरामर्श
जन्यत्वादनुमितेर्भ्रमत्वापत्तिरिति वाच्यं · विषयबाधस्यैव भ्रमत्वनियामकत्वेन दोषा
भावादित्यत आह · इष्यते चेत्यपि कश्चित् · व्याप्तीति · पदनिष्ठव्याप्तिज्ञानजन्यानामित्य
र्थः · न चेति · नहि भ्रमः · अयं व्याप्तिज्ञानजन्यकालीनः शाब्दप्रत्ययोऽप्यनुभवः · तस्याः
अनुमितेः · ननु इयं व्याप्तिज्ञानाजन्याविलक्षणैवानुमितिः · न च तत्रानुमितित्वसत्त्वे
मानाभावः · समाने विषये शाब्दसामग्र्याः बलवत्त्वादनुमितिं प्रति शाब्दसामग्र्याः प्रति

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्यभिचार इति : कच्छः नदीसम्बन्धवान् । अव्यवनदीपदसमभिव्याहृतपदो पस्थापितत्वादि ~~अनुमाने~~ । निरुक्तहेतुमति कच्छे तात्पर्याभावेन नदीसम्बन्धरूपसाध्यासत्वादिति भावः ।
१

न. प्र. रा. पूर्वं जलत्वादिना रजतादेरुपस्थितत्वादितरबाधवल्लाने न रूपेणानुमितौ भानसंभवात् अत एव सकर्तृक
त्वानुमाने लाघवोपनीतमेकत्वादिकमपि भासते । नापवत्तानेतरबाधातिरिक्तस्थल एव व्यापकतानवच्छे
दकरूपेण भानानुपगमात् यथा एते पदार्थाः तात्पर्यविषयमिथःसंसर्गवन्तः आकांक्षादिमत्पदस्मारित
त्वादित्यनुमाने न विशिष्यरजतत्वादेः पक्षतावच्छेदकतात्सिद्धिः । ननु नदीजलसंसर्गपरतयोच्चारिते प्र.प्रा.
४ वा अहो विमलं जलं नद्याः कच्छे महिषश्चरतीति वाक्ये अप्रत्यायके नदीकच्छपदार्थयोर्व्यभिचारः तात्पर्य
गर्भसाध्यासत्वादिति वाच्यं । तात्पर्यगर्भपरस्य निरूपिताकांक्षादिमत्वाभावेनैव व्यभिचारात् । ननु तथा
पि हेतुतावच्छेदकावच्छिन्नहेतुमत्तानिश्चयस्यैवानुमितिहेतुतया परगयोग्यतासंशयस्तत्र योग्यतागर्भ
हेतुमत्तानिश्चयाभावादन्वयावोधप्रसक्तः । न च योग्यतासंशयस्य बाधसंशयपर्यवसन्नतया सा
ध्यसंदेहस्य चानुमित्यनुगुणतया पक्षताघटकसंशयातिरिक्तसंशयान्यत्वमेव हेतुमत्तानिश्च

अव्यभिचारादिति : अव्यवनदीपदसमभिव्याहृतपदस्यापितत्वे सति पक्षीनद्यापदोपस्थापितनदीसम्बन्धित्वेन तात्पर्यविषयत्वरूपविशि
ष्टहेत्वसत्वादिति भावः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

लिङ्गकानुमानमाशयबाधः · नन्विदं घटानयनादिरूपार्थवत् · शब्दवत्वादित्यनुमानं स्यादत आह · शब्दस्येति ·
अर्थाव्याप्यत्वात् · स्वजन्यप्रतिपत्तिविषयार्थनिरूपितव्याप्यभाववत्वादित्यर्थः · अव्याप्यत्वमेव दर्श
यति · नहीति · तदवृत्तित्वात् · आकाशादिवृत्तित्वात् · तथा चाव्यभिचरितसामानाधिकरण्यरूपव्याप्तिः शब्दे
न संभवति · साध्यहेत्वोर्वैयधिकरण्यादिति भावः · ननु घटमानयेति पदानि तात्पर्यविषयस्मारितपदार्थसं
सर्गज्ञानपूर्वकाणि · आकांक्षादिमत्पदकदम्बत्वादित्यत्र वैयधिकरण्यं · नच रजतज्ञानवानयमिति ज्ञाना २५
द्रजितप्रवृत्त्यापत्तिवारणाय पुरोवर्त्तिविशेष्यकइष्टतावच्छेदकप्रकारकज्ञानस्यैव प्रवर्त्तकतया नत
सानयनादि- त्सिद्धिरिति वाच्यं · लाघवात्प्रवृत्तिविषयेष्टतावच्छेदकवैशिष्ट्यावगाहिज्ञानत्वेनैव प्रवर्त्तकतयासाध्य
स्थज्ञानपदस्य प्रमापरत्वेन प्रमात्वघटकतया प्रकृते तस्याप्यक्षमत्वात् · न चानुमितेर्व्यापकतया
वच्छेदकप्रकारकत्वनियमेन स्मारितपदार्थत्वेनैव रजतादिसिद्धेः · ननु रजतत्वादिना · प्रमेयत्वादिना
तादृशज्ञानस्य प्रवर्त्तकत्ववारणाय रजतत्वादिप्रकारकज्ञानस्यैव प्रवर्त्तकत्वादिति वाच्यं · पूर्वरज

इष्टतावच्छेदकप्रकारकज्ञानस्यापि ·

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्र...।आद्यप्रमितिकरणत्वं

व्याप्य...।रायत्वं

न·प्र·टी· निरूपितप्रमाणविभाजकोपाधिनियतधर्मावच्छिन्नजनकताश्रयो नवे तर्कारिका· अन्यविधिकोटिर्नै
यायिकानां· निषेधकोटिर्वैशेषिकानां विधिकोटिप्रसिद्धिः प्रत्यक्षप्रमाणे· इन्द्रियस्यैव प्रत्यक्षप्रमाण
तयाप्रत्यक्षंप्रतिइन्द्रियत्वेन हेतुत्वेन तादृशजनकताश्रयत्वात् निषेधप्रसिद्धिश्च यदादाने वसुलभा·
अर्थसिद्धसाधनवारणायानुमितित्वासमानाधिकरणप्रमितिविभाजकोपाध्यवच्छिन्नत्वनिवेशः
प्रत्यक्षे विषयस्य हेतुत्वमादाय शाब्दस्यापि साक्षात्कारत्वावच्छिन्नजन्यतानिरूपितजनकताशा
लित्वात्प्रमाणविभाजकोपाधिनियतधर्मावच्छिन्नत्वनिवेशः· अनुमितिभिन्नशाब्दाविषयक
प्रमितिकरणं न वेति प्रत्यक्षानुमित्यन्यतरत्वव्याप्यानुभवनिष्ठजन्यतासामान्यकोनवेत्याका
रणा· पृथगिति· अनुमितिभिन्नशाब्दाविषयकप्रमितिकरणमित्यर्थः· अतो न सिद्धसिद्ध्याघा
तः· नन्वनुमानं· ननु प्रत्यक्षानुमित्यन्यतरत्वव्याप्यानुभवनिष्ठजन्यतासामान्यकं अतो नशाद श्रीः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वनास्तीत्यत आह · तज्जनकत्वमपीति · तस्य शाब्दस्य जनकत्वमपि शाब्दप्रमितिजनकत्वमपीत्यर्थः
वस्तुतस्तु · सोयं शाब्द इति पाठः शाब्दयामीति प्रतीतिसिद्धः शाब्दबोध इत्यर्थः · तज्जनकत्वमपि · शा
ब्दे तादृशशाब्दप्रमितिकरणत्वमपीत्यर्थः · तथा · उरपङ्कं · तत्र हेतुमाह · आगोपालेति · प्रतीते
रिति · वाक्यादमुमर्थं प्रत्येमीति ज्ञानस्य प्रत्यक्षविषयत्वासंभवेन प्रत्यक्षातिरिक्तप्रमितिस्वीकारः
तत्करणस्वीकारश्च आवश्यक इति भावः · नन्वस्तु शाब्दस्य प्रमाणत्वमास्तां तज्जन्यज्ञानस्य प्रत्य
क्षातिरिक्तप्रमात्वं तथाप्यनुमित्यात्मकत्वमेव तज्जन्यज्ञानस्यास्त्वतो व्यर्थः पृथङ्निरूपणमि
त्यत आह · केवलमिति · अनुमानविधया अनुमानत्वेन · अन्यथा वेति · शाब्दविधया वेत्यर्थः · न
नु तस्य प्रत्यक्षातिरिक्तप्रमितिजनकत्वमेव नास्तीति विवाद इति भावः । विप्रतिपत्तिं दर्शयति · वि
प्रतिपत्तिश्च शाब्दः अनुमितित्वासमानाधिकरणप्रमितिविभाजकोपाध्यवच्छिन्नजन्यता

त·प्र·श· यथाहि शोध्यताकत्वांशे स्वजन्यज्ञानजन्यशोध्यताकत्वांशे भ्रमभिन्नज्ञानत्वस्य विवक्षितत्वा
दित्याहुः· इदं च वुबोधयिषापूर्वकवाक्यत्वावच्छिन्नं प्रतिवाक्यार्थज्ञानं हेतुरिति संप्रदायम
तेन· वस्तुतस्तु ओबोधयिषया अन्यथासिद्धतया न तस्य कारणत्वासंभवेन तदपेक्षया शाब्द
प्रमितिकरणं शब्द इति फलघटितमेव लक्षणमत्र कृतमिति ध्येयं· प्रत्यक्षातिरिक्ते प्रमा
णासत्वे मानाभाव इति शब्दस्याप्रमाणतया व्यर्थं तन्निर्वचनमिति चार्वाकमतं कणक्षयु
नु शब्दस्य प्रमाणत्वं साधयति· सोयं शब्द इति· शाब्दप्रमितिकरणं शब्द इत्यर्थः· सकल
न्ति· शब्दश्च गोमीत्यनुभवविषय इत्यर्थः· इत्यपह्नवति नाद्दशप्रत्यक्षस्यान्यविषयक
त्ववाधाद्धवद्विषयकत्व एव पर्यवसानेन शाब्दसिद्धिः· प्रतीतिसाधकत्वेनार्थमात्रो
छेद इति भावः· ननु नवं शाब्द एव नास्तीति भ्रमोऽपि तन्नस्यातिरिक्त प्रमितिकरणत्वमे
न

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्गकतन्मन्प्रकारकतत्तद्विशेष्यकभ्रमभिन्नज्ञानजन्यत्वाद्वेंतत्कालीनतत्पुरुषीयप्रमाणशब्द
त्वमितिपर्यवसितोऽर्थः वह्निनासिंचतीत्यादौवह्निकरणकसेकानुकूलकृतिमानितिबोधोद
येनतद्विषयविषयकज्ञानस्यभ्रमत्वान्नतत्रातिव्याप्तिः एवंशाब्दोऽद्रव्यमित्यादावपिभ्रमात्म
कसमूहालंबनजन्येपयसासिंचतीत्यादौतुईश्वरीयप्रमामादायसंगतिः एवं शाब्देऽप्रमि
त्यादावपिभ्रमात्मक मन्यत्रउक्तोदीरितवाक्येमौनिश्लोकादावपि अथयत्रवह्निनासिं
चतीतिपयसासिंचतीत्यादिवाक्याभ्यांवह्निकरणकसेकानुकूलकृतिमान् पयःकरणक
सेकानुकूलकृतिमानितिसमूहालंबनरूपबोधः तत्रपयसासिंचतीतिवाक्येऽव्याप्तिः
तद्वाक्यजन्यंज्ञानंयद्यद्विशेष्यताकंतत्तद्विशेष्यताकभ्रमभिन्नज्ञानाप्रसिद्धेरितिचेन्नैवं॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ग.प्र.श. एवं शब्दो द्रव्यमिति वाक्यस्यापि तादृशवाक्यजन्यज्ञानविषयतया तादृशवाक्यजन्यज्ञानवि
षयवाक्यविषयकवाक्यरूपेष्टसाधनताप्रमाभावात् शब्दो द्रव्यमित्ययोग्यवाक्येऽतिव्याप्
तिः आपिब पयः करणकसेकानुकूलकृतिमान् पुरुषश्च द्रव्यमित्यांशिकभ्रमात्मकसमूहा
लंबनजन्ये पयसा सिंचतीति वाक्ये ऽ[illegible] व्याप्तेः तादृशवाक्यार्थज्ञानस्य भ्रमभिन्नत्वाभावात् ई
श्वरीयवाक्यार्थज्ञानस्य च स्वसमानजातीयास्मदीयवाक्यार्थज्ञानसापेक्षतया तदादाय लक्षणगम
नात् अन्यथा तदीयपदार्थतत्त्वज्ञानमादायायोग्येऽतिप्रसङ्गे ईश्वरवाक्यं न दिति चेन्नैवम् यादृ
शार्थतत्त्वज्ञानं स्वसमानजातीयज्ञानान्तरानपेक्षं सत् प्रयोगहेतुस्तज्जन्यत्वमिति न लक्षणार्थः किं
तु प्रयोगहेतुभूतं पदार्थतत्त्वज्ञानं [illegible] प्रकृतवाक्यार्थविषयकं तत्त्वज्ञानं तज्जन्यत्वं त
क्षणं तत्कालीनतत्पुरुषीयस्वजन्यज्ञानं यद्धर्मसंसर्गकयद्धर्मप्रकारकयद्धर्मविशेष्यताकं तत्तत्सं श्रीः

प्रमाणमात्रस्य लक्ष्यत्वे प्रत्यक्षादावव्याप्तेर्लक्षणेऽपि शब्दपदमनुषंजनीयम्: ननु तत्कालीनतत्पु
रुषीयत्वजन्यज्ञानविषयविषयकं यत्प्रमात्मकं ज्ञानं स्वस्मिन्जननीयं तत्कालीनतत्पुरुषी
यत्वजन्यज्ञानविषयविषयकज्ञानान्तरानपेक्षत्वे गादाप्रमाजन्यशब्दत्वं तत्कालीनतत्पु
रुषीयप्रमाणशब्दत्वमिति फलितं प्रमात्वं च यावद्रूपभिन्नत्वं नातः आंशिकप्रमामादाया
तिप्रसङ्गः इत्थं च वह्निना सिंचतीत्यादेः पदार्थतत्त्वज्ञानस्य स्वसमानजातीयवाक्यार्थज्ञाना
न्तरापेक्षितत्वात्तदादायातिव्याप्तेरभावेऽपि कण्ठाभिघाते वाक्यरूपेष्टसाधनतामादाया
तिप्रसङ्गः वह्निकरणकसेकानुकूलकृतिमानिति प्रकृतवाक्यजन्यज्ञानविषयकरणता
धारकीभूताभावादिविषयकत्वेनेष्टसाधनताज्ञानस्यापि प्रकृतवाक्यजन्यज्ञानविषयवि
षयकार्थतत्त्वज्ञानत्वात् तेन च वाक्ये जनयितव्ये सजातीयज्ञानान्तरानपेक्षणादिति।

स्वोत्तरोत्पन्नत्वमपि

न.प्र.रा. पूर्ववर्त्तिपदार्थतत्त्वज्ञानस्यापेक्षणादसंभवः अन्यथा तस्याऽहेतुत्वापत्तेरिति स्वजन्यज्ञानवि
षयविषयकज्ञानान्तरं विनोच्चरणीयं तथा च तत्कालीनतत्पुरुषीयस्वजन्यज्ञानविषय
विषयकयत्प्रकृतवाक्यार्थप्रमात्मकं ज्ञानं स्वाव्यवहितजननीयं तत्कालीनतत्पुरुषीयस्वो
त्तरोत्पन्नस्वजन्यज्ञानविषयविषयकप्रमान्तरं नापेक्ष्यते तादृशप्रकृतवाक्यार्थज्ञानजन्य
शाब्दत्वं तत्कालीनतत्पुरुषीयप्रमाणशाब्दत्वमिति फलितं अत्र स्वोत्तरोत्पन्नेत्यत्र स्वपदा
र्थतत्त्वज्ञानपरं स्वपदानन्तरालिप्रकृतवाक्यघटकपदार्थतत्त्वज्ञाने तच्च वाक्ये जननीयं स्वो
त्तरोत्पन्नप्रकृतवाक्यजन्यज्ञानविषयविषयकवाक्यार्थज्ञानस्यापेक्षणात् पदार्थतत्त्वज्ञा
नजन्यत्वमादायायोग्येऽतिव्याप्तिरिति। संस्कारादावतिव्याप्तिवारणाय लक्षणे शाब्दपदं

श्री

2

ति इत्थं चार्थपदस्य वाक्यार्थपरत्वपर्यवसानात्पदार्थतत्त्वज्ञानमादायातिव्याप्तिः तथाहि हेतु
पदसमभिव्याहृतभूतपदस्य भू प्राप्ताविति धात्वनुसारादितरनैरपेक्ष्यव्युत्पन्नतयासज्ञा
तीयनैरपेक्ष्यस्यात्र विवक्षिततया तत्प्रयोगप्रतिपाद्यज्ञानं प्रयोगे कर्त्तव्ये प्रयोगप्रतिपाद्यज्ञा
नान्तरं नापेक्ष्यते तादृशार्थतत्त्वज्ञानजन्यत्वं लक्ष्यं नहि वाक्यार्थज्ञानवत्पदार्थज्ञानमपि अर्थ
ज्ञानानपेक्षं प्रयोगहेतुः वाक्यार्थज्ञानात्मकार्थतत्त्वज्ञानस्यैवापेक्षणीयत्वादिति अतएव
प्रयोगो वाक्यं तथा च तत्कालीनतत्पुरुषीयस्वजन्यज्ञानविषयविषयकज्ञानं स्वस्मिन्ज
ननीये प्रयोगप्रतिपाद्यज्ञानान्तरं तत्कालीनतत्पुरुषीयस्वजन्यज्ञानविषयविषयकज्ञा
नान्तरं नापेक्ष्यते तादृशार्थतत्त्वज्ञानजन्यत्वमर्थः वाक्यार्थज्ञानेन वाक्ये जननीये स्व

त·प्र·श· श्यापदजन्यपदार्थोपस्थितितात्पर्यज्ञानादेरेवशाब्दबोधेहेतुतया शब्दस्यसर्वत्रभानेमानाभावात् यत्रभिन्न
विषयकानुमितिसामग्रीकालेघटमानयेतिशब्देच्छावलाच्छाब्दबोधः तत्रशब्दविषयकशाब्दं जायतामिती
च्छाविरहविशिष्टानुमितिसामग्र्याः प्रतिबन्धकत्वेनशब्दशाब्द - - - पपत्तेश्च घटशाब्देच्छाया अपितत्रो
त्तेजकत्वेनतत्रादिच्छाभावकूटनिवेशेनातिगौरवात् मिथोविशेषणविशेष्यभावेविनिगमनाविरहेणा
नन्तकार्यकारणभावापत्तेश्चेति शब्दाविषयकशाब्दबोधोत्पत्त्याशाब्दत्वस्यपदविषयकत्वाव्यभिचा
रित्वाभावेनासंभवाभावादितिनकिंचिदेतत् जाताविति जात्याद्यावित्यर्थः तज्जात्यभावादिति भा
वः मलिकवस्तु प्रयोगहेतुभूतार्थतत्वज्ञानजन्यशब्दः प्रमाणमितिशब्दलक्षणं प्रयोगोवाक्यंतद्धेतु
भूतंयदर्थतत्वज्ञानंतज्जन्यशाब्दत्वंप्रमाणशब्दत्वमित्यर्थः वाक्यार्थभ्रममादाय वह्निनासिंचतीत्या
दावयोग्येतिव्याप्तिवारणाय तत्वपदं तथापिपदार्थतत्वज्ञानमादायायोग्येतिव्याप्तेः प्रयोगहेतुभूते श्री:

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जन्यधीत्वव्यभिचारीति धीत्वव्यभिचारीति धीजन्यत्वव्यभिचारीति जन्यजन्यत्वव्यभिचारीति वा नोक्तं
अनुमितित्वस्य जन्यत्वज्ञानत्वजन्यज्ञानत्वव्याप्तिज्ञानजन्यत्वव्याप्यत्वाज्जव्यभिचारि जातिशून्यत्वस्यानुमि
नावपि सत्वादिति व्याप्तिः॰ जन्यपदधीत्वव्यभिचारि जातिशून्यत्वमात्रोक्तौ शाब्दत्वस्यापि तथात्वेनासंभ
वापत्तेरिति विशिष्टमुपादेयमेव॰ ननु जन्यपदधीजन्यत्वव्यभिचारि अनुभवत्वाव्यापकजातिशून्यत्व
मेव लक्षणमस्तु कृतं विशेष्यदलेनेत्यत आह॰ उपमितावितिं उपमितेः पदविषयकातिदेशवाक्या
र्थज्ञानजन्यत्वनियमेन जन्यपदधीजन्यत्वव्यभिचारि प्रत्यक्षत्वादिजातिशून्यत्वादिति भावः शू
न्यान्तं पदविषयकत्वाव्यभिचारिजातिशून्यत्वमित्यर्थः। पदविषयकशाब्दबोधे पदस्यापि भानात्प
दविषयकत्वसमानाधिकरणशाब्दत्वशून्यत्वाभावादसंभव इति समानाधिकरणेति। धीत्वाव्यभि
चारीति॰ ननु शाब्दबोधे सर्वत्र भानेबाधकाभावाच्छाब्दत्वस्यापि पदविषयकत्वाव्यभिचारित्वमेवेति चेन्न॰

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चरमधीपदस्यानुभवपरत्वं विना॥ निर्वाहात्सेति पदजन्यत्वव्यभिचारि अनुभवत्वाव्यापकजातिशून्यत्वामि
त·प्र·श तिरुते॥ संभवः ज्ञायमानपदस्य करणत्वासंभवेन शाब्दत्वस्यापि पदजन्यत्वव्यभिचारित्वादतः पद
६ धीति इत्थं च जन्यपदव्याप्तिमाह पदधीति नन्वनुमितित्वस्यापि नादृष्टास्य सत्वात्कथमतिव्याप्ति
रत आह अनुमितित्वस्येति भगवादिति अनुमितित्वस्येऽथवा पदधीजन्यत्वव्याप्यत्वेनाऽमत्वा
दिजातिरेव तथा तच्छून्यत्वं चानुमितावपीत्यतिव्याप्तिः जन्यपदोपादानेऽन्वानुमितित्वस्यापित
थात्वेन तच्छून्यत्वाभावान्न जातिरिति भावः अतः अतिव्याप्यादिना समुदितमिति जन्यपदधी
जन्यत्वव्यभिचारि अनुभवत्वाव्यापकजातिशून्यत्वानामित्यर्थः अत्र च जन्यत्वव्यभिचारीति

श्री: ६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ति अनुभवत्वव्यापके त्यर्थः अनुभवत्वाव्यापके न्यस्य व्याहत्तिमाह जन्येति तथाऽसंभावनाऽगिति जन्यपदधी
जन्यत्वव्यभिचारीत्यर्थः ननु अनुभवत्ववारणायानुभवत्वान्यत्वमेवोपादीयतामित्यत आह आदीना
मिति आदिनाज्ञानत्वपरिग्रहः अनुभवत्वाव्यापकत्वं चानुभवनिष्ठभेदप्रतियोगितावच्छेदकत्वं
तेनानुभवत्वादिव्युदासः ननु अनुभवत्वव्याप्यत्वमेव किं नोपादीयते अनुभवव्यापकत्वघटितत्वेने
ति चेन्न व्यापकसामानाधिकरण्यादिरूपव्याप्यत्वस्य निवेशे गौरवात् एवमनुभवत्वस्यापि स्व
व्याप्यत्वान्तद्वारणाय भेदघटितव्याप्यत्वस्यावश्यं वाच्यतयाऽतिगौरवाच्च मन्मते अनुभवनिष्ठ
भेदप्रतियोगितावच्छेदकत्वस्यानुभवत्वे असत्त्वेनानुपपत्त्यभावात् एवं तावति व्याप्तिवारणाय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

६

ता·प्र·टी धाचतच्छून्यत्वाभावान्नातिव्याप्तिरितिभावः·स्मृतित्वस्यजातित्वमनुभवसामग्रीप्रतिबध्यतावच्छेद
५ कत्वेन·ननुप्रत्यक्षादावतिव्याप्तिवारणायजातिशून्यत्वेसतीत्यास्तां यदिच्छ शाब्देपि ज्ञानत्वादि
सत्वादसंभवइतिविभाव्यतेतदानुभवत्वाव्यापकजातिशून्यत्वेसतीत्येवास्त्वतआह·जातिशून्यत्वा
मितिजातिशून्यत्वमात्रमित्यर्थः·अनुभवत्वेति·अनुभवत्वाव्यापकजातिशून्यत्वमात्रमित्य
र्थः·अनुभवत्वादीनामिति·आदिनाज्ञानत्वगुणत्वसत्वादिपरिग्रहः·तथाच·तादृशजाती
नांसत्वाज्जातिशून्यत्वंनवक्तव्यमित्यर्थः·अत्रयद्यपिज्ञानत्वादीनामित्येवमुक्तमुचितंत
थापितद्व्यापकेत्यत्रतच्छब्देनानुभवत्वपरामर्शायानुभवत्वादीनामित्युक्तं·तद्व्यापके मा·
५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

केशाभानानुपगमात् तथाच शाब्दजन्यघटादिविषयकज्ञानत्वमेवतद्विषयोनत्वतिरिक्तशाब्दत्वजातिरित्यत आह
जन्यपदधीतितीत्याहुः नदस्मत शाब्दलिङ्गकघटानुमितेरपिशब्दजन्यघटविषयकज्ञानत्वेनतदुभयस्मापि
शाब्दयाभातिप्रतीत्यापत्तेः शाब्दत्वजातिस्वीकारस्यावश्यकत्वात् तदस्वीकारमादायद्वितीयलक्षणप्र
साधनेतद्व्यापकशाब्दत्वस्येत्यग्रिमग्रन्थासङ्गतेश्चेत्यवधेयम् जन्यपदधीजन्यत्वव्यभिचारिणीअ
नुभवत्वाव्यापिकानयाजातिः प्रत्यक्षत्वादिस्तद्धन्यत्वेसतिपदविषयकत्वाव्यभिचारिणीयाजा
तिः उपमितित्वं तद्धन्यधीत्वमितिलक्षणार्थः अतिव्याप्तिंवारयति तथेति प्रत्यक्षानुमितिस्मृ
तिष्वित्यर्थः तासांतो जन्यपदधीजन्यत्वव्यभिचारिअनुभवत्वाव्यापिकानांसत्वादिति त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

६

त॰प्र॰श॰ शाब्दजन्यप्रत्यक्षप्रमितिकरणे श्रोत्रेन्द्रियेऽतिव्याप्तम्अत आह शाब्दत्वं चेति तथा च शाब्दत्वरूपजात्यव
४ च्छिन्नप्रमितिकरणत्वं न तत्रातिव्याप्तिरिति भावः केचित्तु अतीतानागतशब्दानुसन्धानादपि शा
ब्दबोधोदयाच्छब्दो न करणं किंतु शब्दज्ञानं इत्थं च शाब्दजन्यप्रमाकरणत्वस्य लक्षणत्वेऽसंभ
वः शब्दज्ञानजन्यप्रमाकरणत्वस्य लक्षणत्वे तु विषयविधया शब्दज्ञानजन्यप्रत्यक्षप्रमा
करणे मनस्यतिव्याप्तिरत आह शाब्दत्वं चेतीत्याहुः शाब्दत्वस्य प्रत्यक्षाद्यन्यत्वरूपत्वे गौर
वादाह शाब्दत्वं चेतीत्यपि कश्चित् ननु लक्षणलक्ष्यतावच्छेदकयोर्भेदः स्यात आह जन्येति केचि
त्तु ननु शब्दादहं घटं प्रत्येमीत्येवानुभवो न तु शब्दात्प्रमिनोमीति आत्मविशेषगुणानां विषयनिर्मो श्रीः
४

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्बोधोदयेन व्यभिचाराच्छब्दप्रमाणे उपमानोपजीवकत्वव्याघातः क्वाचित्कोपजीवकत्वस्य च शा
ब्दप्रमाणादावुपमानप्रमाणेऽपि सत्त्वादविनिगमनादवस्थामिति न किंचिदेतत्. न चास्तु स्वतंत्रे
च्छस्य नियोगानर्हत्वादिति न्याय एव विनिगमकः ननु संगतिरिति न स्यादस्तु व्यत्ययेऽपि न क्षतिरित्याहु
रिति दिक्. निरूप्यत इति लक्षणस्वरूपप्रामाण्यादिप्रकारकवर्त्तमाननिरूपणविषयः शाब्द
इत्यर्थः. तत्र शाब्दे निरूपणीये शाब्देति अयं शाब्दप्रमितिकरणत्वं लक्षणं प्रमाणशब्दवा
च्यत्वं लक्ष्यतावच्छेदकं. प्रमितिकरणत्वमात्रं प्रत्यक्षादावतिप्रसक्तमतः शाब्देति. ननु शा
ब्दत्वं शाब्दजन्यत्वं तथा च शाब्दजन्यप्रमाकरणत्वं लक्षणं पर्यवसितमिति तत्र विषयाविषया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न.प्र.श. नवतारात् । नचातिदेशवाक्यार्थज्ञानस्य शाब्दत्वेनैवोपमितिकरणता शाब्दकल्पनमावश्यकं पदज
न्यपदार्थोपस्थितेरेव शाब्दबोधे हेतुत्वात् शाब्दी शाब्दबोधोपयोगिनी आकांक्षा अन्वयप्रतियोग्युपस्थि
३ तिरूपा शब्देनैव प्रपूर्यते संपादनस्यार्थात् तादृशन्यायस्याप्यवतारादिति वाच्यं अतिदेशवाक्यार्थज्ञानस्य
शाब्दत्वेनोपमितिकरणत्वे मानाभावात् परित्यज्य निश्चितमव्यभिचारकं रूपं गद्घमाणस्य व्यभिचारैके
नैकारणत्वकल्पनानुदयात् । नच निश्चयत्वमपेक्ष्य शाब्दत्वस्य लघुतया तन्निवेश एव सम्यगिति
वाच्यम् । तादृशज्ञानस्योपमानत्वमादिमत्व इवातिदेशवाक्यार्थस्मृतिरूपव्यापाराभावेनैवान
तिप्रसङ्गे निश्चयत्वनिवेशप्रयोजनाभावादिति विभाव्यते न साऽपि व्यवहारादिना शक्तिग्रहाच्छा श्रीः ३

त्वादेरेव तथात्वेन तस्य च प्रमाणतावच्छेदकशाब्दप्रमाणत्वस्य व्यापिकोपजीव्यता निरूपितोपजीवकतावच्छेदकत्वादुक्तदोषाभावात् केचित्तु अत्र कीदृग्गवय इति प्रश्नानन्तरं चित्रलेखादिना तादृशपिंडप्रदर्शनं तत्रातिदेशवाक्यं विना मानसरूपातिदेशवाक्यार्थज्ञानात्मकोपमानोदयेन व्यभिचाराच्छब्दो नोपमानोपजीव्य इति उपमाने शब्दोपजीवकत्वाभावान्नाविनिगम इति वदन्ति तदसत् शाब्दी साकांक्षा शब्देनैव प्रपूर्यते इति न्यायेन तत्रापि ईदृग्गवय इत्याभिप्रायिकशब्दकल्पनाया आवश्यकत्वात् शाब्दी आकांक्षा शाब्दबोधगोचरेच्छा शब्देनैव विषयसिद्धिद्वारा निवर्त्यत इति तदर्थात् यदि च यदा प्रष्टुर्ज्ञानमात्रेच्छा न तु शाब्दबोधे तत्र शब्दकल्पनाया अनवकाशस्तत्र शाब्दगोचरेच्छाया अभावेन तादृशन्यायस्या

६

गकिंचिन्निगमकमिति चेन्न· प्रमाणतावच्छेदकधर्मावच्छिन्नोपजीव्यतानिरूपितोपजीवकतायाः ए

न·प्र·ए· वात्र सङ्गतित्वात्· प्रमाणतावच्छेदकधर्मश्चेन्द्रियत्वादिः अवच्छिन्नत्वं च व्याप्यकत्वं· एवं चोपमान

२ स्य संकेतग्रहग्राहकतया सर्वस्यैवोपमानस्य शब्दप्रमाणोपजीव्यत्वं· शब्दप्रमाणस्यानुमान

सर्वस्यातिदेशवाक्यार्थज्ञानात्मकोपमानोपजीव्यत्वं· घटमानयेति शब्दे तदभावात्· न च प

तथा ३ दशानमत्र वेदत्वावच्छिन्नं प्राप्तहेतु घटमानयेति शब्दनिरूपितशाब्दत्वावच्छिन्नकार्यता

या विवक्षितत्वात्· प्रमाणविभाजकोपाधिश्च साक्षात्कारकरणत्वादिः अवच्छिन्नत्वं चात्रस्व

रूपसम्बन्धविशेषः· इत्थं च शाब्दत्वादि समितिकारणतानियतत्वादतिदेशवाक्यार्थज्ञान श्री:

२४ उपमाने सत्वाद्युक्तेरोचनादवस्थपमितिवाच्यं· प्रमाणविभाजकोपाधि[नियत]धर्मावच्छिन्नाया उपजीवकताया ४२ २

१ [illegible] प्रयोजकतानिरूपितोपजीव्यतानिरूपितनिरूपकत्व... शब्दप्रयोजकतानिरूपितशाब्दबोधजनकत्वम् ... प्रयोजकतानिरूपितप्रयोजकत्वम्

तिद्दारा शाब्दबोधोपजीव्यत्वादिति. केचित्तु उपमानं पदं करणमिति तस्य शक्तत्वेन उपमानमि
त्यर्थः सविशेषणे हि विधिनिषेधौ विशेषणमुपसंक्रामतः सति विशेष्ये बाधे इति न्यायेन स्वगी
धस्य इति वक्तव्यो विशेषणीभूतशक्तिज्ञानमादायोपमानोपजीवकत्वसम्भवेन स्वरूपत उपजीव
कत्वमपि सङ्गच्छत इत्याहुः पदज्ञानस्य शाब्दप्रमाणत्वकारिकार्थं नवीनमतेतु उपमितेः शक्तपद
विषयकत्वेनातिदेशवाक्यार्थज्ञानात्मकोपमानप्रमाणस्योपमित्यात्मकशाब्दप्रमाणोप
जीव्यत्वेन स्वरूपत उपजीवकत्वमक्षतमेवेति ध्येयं. नन्वातिदेशवाक्यरूपशब्दप्रमाणस्य
स्यातिदेशवाक्यार्थज्ञानरूपोपमानोपजीव्यत्वादुपमानमेव प्राक् निरूपितं न तु शब्द इत्य

त·रा· श्रीगणेशाय नमः॥ ॥जटाजूटलसद्गङ्गाजलभूषितमस्तकम् पुनातु गिरिजाप्रेमपात्रमेकम
१ नेकधा १ उपजीव्योपजीवकभावसंगत्या अनुमाननिरूपणानन्तरं शब्दं निरूपयन् शिष्यावधा
नाय प्रतिजानीते अथेति · अत्र गायमानपदस्य शब्दप्रमाणत्वापादे उपमानोपजीवकत्वाभावा
दुपकत्वयोः स्वरूपं फलयोश्च सङ्गतिर्बोध्या तस्याः फलनिष्ठत्वेऽपि तस्या अपकरणत्वात्मकप
रंपरासम्बन्धेन करणनिष्ठत्वात् करणयोरानन्तर्याभिधानं नियामकत्वमत्र बोध्यं · तथा हि शा
ब्दिकपरिच्छित्तिर्वोपमितिः तस्याश्च सर्वस्या एव शाब्दबोधजनकत्वेन फलयो रूपजीव्योपजी
वकत्वसंभवः एवं स्वरूपफलयोरपि · अतिदेशवाक्यार्थज्ञानरूपोपमानप्रमाणस्योपमि श्रीः१

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४०८०

॥ तत्त्वप्रकाशः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न्या·री·
दी·
१

विशयकत्वसामानाधिकरण्यंसूचितं अतएवशब्दविषयकत्वसमानाधिकरणजातिमदित्युक्तौ अनु
मितित्वशाब्दत्वादेरपितथात्वात्तद्वारणायाव्यभिचारीति व्याप्यत्वार्थकं गगनंशाब्दवादित्यनुमितित्वानित
घाकित्वस्यशब्दविषयकत्वव्याप्यत्वात् तदादायानित्यासाधारणाधर्मपदंविहायजातीति श्रावणेति
श्रावणप्रत्यक्षस्यशब्दविषयकत्वावश्यंभावेनश्रावणत्वस्यतादृशजातित्वादितिभावः ननुपरो
क्षत्वंइन्द्रियजन्यभिन्नत्वंतथाचासंभवः ज्ञानमात्रस्यमनोरूपेन्द्रियजन्यतया उपमितेरपिपरोक्ष
त्वाभावादित्यतआह प्रत्यक्षान्यप्रमितेनेथाचनयथोक्तंपरोक्षत्वंयेनासंभवःस्यादितिभावः
ननुकीदृशोयमौषधीज्वरंहंतीतिपृष्टेप्रत्युत्तरेणसदृशोयमौषधीज्वरंहंतीत्युक्तारितेज्वरहरणतादृशो· राम

९